Advaitasabhagranthamala-8.

# BṚHMASŪTRA

# ŚĀṆKARABHĀSHYAM

WITH

SRI NARAYANATHIRTHA'S SUBODHINI

AND

SRI BODHENDRA'S ADVAITA BHUSHANAM

*Edited by*

*Panditapravara*

S. SUBRAHMANYA SASTRI

*Published by*

SRI S. VAIDYANATHAN

Hon. Secretary, Advaita Sabha

KUMBAKONAM

1954

अद्वैतसभाग्रन्थमाला—८.

श्रीः

# ॥ ब्रह्मसूत्रशाङ्करभाष्यम् ॥

श्रीनारायणतीर्थविरचितसुबोधिन्या श्रीबोधेन्द्रसरस्वती-
विरचिताद्वैतभूषणेन च समुद्भासितम्

★

पण्डितप्रवरेत्यादिबिरुदाङ्कितेन
एस्. सुब्रह्मण्यशास्त्रिणा
परिशोध्य मुद्रापितम्

★

जयनामसंवत्सरः
कुम्भघोणम् - अद्वैतसभा,
१९५४.

# उपोद्घातः

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

श्रीशङ्करभगवत्पादभाषितस्य प्रसन्नगंभीरस्य श्रीशारीरकमीमांसाभाष्यस्य प्रधानभूते द्वे व्याख्ये पञ्चपादिका, भामती चेति । ये अधिकृत्य प्रस्थानद्वयं वेदान्तेषु प्रवृत्तम् । तयोश्च व्यवहारमात्रसिद्धविषयेषु क्वचित् क्वचिद्भेदेपि शास्त्रतात्पर्यविषयीभूतब्रह्मात्मैक्ये न कोपि विसंवाद इति निश्चप्रचमेव विदुषाम् । अत एव अद्वैतःसिद्धिकारादयः परिमलकारादयश्च महाप्रभावशालिनः स्वीयनिबन्धेषु द्वयोरपि मतयोः प्रामाणिकत्वं भाष्यमूलकत्वं च व्यवस्थापयन्ति । ब्रह्मसूत्रभाष्यव्याख्यातारः श्रीमन्तः आनन्दगिरिरामानन्दाद्वैतानन्दप्रभृतयः प्रस्थानद्वयमप्यवलम्ब्य भाष्यं व्याकुर्वन्ति । भगवत्पादानां साक्षाच्छिष्यभूताः तत्सकाशादेव त्रिवारमधीतशारीरकभाष्याः तच्चरणानुग्रहलब्धब्रह्मविद्याः तत्र भवन्तः पद्मपादाचार्याः इति परं किञ्चित्पक्षपातः तैः प्रणीतायां पञ्चपाद्यां तदनुसारिणि विवरणे च केषांचिदाचार्याणाम् । तदास्तां तावत् । श्रीमच्छारीरकभाष्यं प्रसन्नगंभीरत्वात् भूयोभूयः व्याख्यातृचातुर्यस्य अवकाशं ददाति । अत एव षट्छास्त्रीपारदृश्वानः साक्षात्कृतब्रह्मतत्त्वाः बहवोऽस्य व्याख्याने प्रायस्यन् । तासु व्याख्यासु मध्ये अद्यावधि मुद्रणशालामप्राप्ते इमे द्वे व्याख्ये सुबोधिनी अद्वैतभूषणं चेति श्रीकाञ्चीकामकोटिपीठाधिपश्रीशङ्कराचार्याणामाज्ञामनुसृत्य ब्रह्मविद्यापत्रिकायां प्रकाशं नीते । तत्राद्या श्रीशिवरामतीर्थशिष्यश्रीनारायणतीर्थैः प्रणीता विवरणानुसारिणी विशदा व्याख्या । अस्यां 'पदच्छेदः पदार्थोक्तिःविग्रहो वाक्ययोजना । आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ॥' इत्यभियुक्तोक्त्यनुसारेण श्रीमद्भाष्यस्य प्रत्यक्षरं व्याख्यानं अपूर्वाणां शङ्कानां समाधानं च दृश्यते । विद्यार्थिनां पण्डितानां च इयं व्याख्या अतीव मोदावहेत्यत्र न संशयः । परं तु चतुस्सूत्र्यन्तैव लब्धेति तावत्येव मुद्रापिता । इमे च श्रीनारायणतीर्थाः रत्नप्रभाप्रणेतृभ्यः श्रीरामान्दाचार्येभ्यः अवरकालिकाः इत्यवगम्यते रत्नप्रभास्थाध्यासलक्षणस्यानुवादात् । १९ पुटे हि एकावच्छेदेनेत्यादिलक्षणमनूद्यते श्रीनारायणतीर्थैः । श्रीरामानन्दाश्च परिमलोदाहरणात् परिमलकारेभ्यः अर्वाचीनाः । परिमलकाराणां च समयः षोडशशताब्दी । ततश्च रामानन्दाः सप्तदशशताब्द्यां बभूवुः । इमे च श्रीनारायणतीर्थाः सप्तदशशताब्द्यन्ते वा अष्टादशशताब्द्यां वा बभूवुरिति वक्तु शक्यते ।

अद्वैतभूषणाख्यं द्वितीयं व्याख्यानं तु श्रीगीर्वाणेन्द्रसरस्वतीनां शिष्यैः श्रीबोधेन्द्रसरस्वतीभिः प्रणीतम् । श्रीबोधेन्द्राश्च हरिहराद्वैतभूषणनामामृतरसायनादिप्रणेतारः श्रीकाञ्चीकामकोटिपीठमधिष्ठाय चोळेषु गोविन्दपुरे विदेहकैवल्यं प्रापुः । श्रीगीर्वाणेन्द्रसरस्वतीनां विश्वाधिकसरस्वत्य इति नामान्तरं यन्नाम्ना ते निर्दिष्टाः हरिहराद्वैतभूषणादौ इति सांप्रदायिकाः । हरिहराद्वैतभूषणं अद्वैतभूषणं इति भूषणान्तनामसाम्यमपि अनयोरेककर्तृकतां गमयति शब्दकौस्तुभः तत्त्वकौस्तुभः इत्यादिवत् । गीर्वाणेन्द्रसरस्वत्यश्च प्रपञ्चसारसङ्ग्रहादिप्रणेतारः श्रीनीलकण्ठदीक्षितानां गुरव इति तत्कृतशिवलीलार्णवे स्पष्टम् ।

ततश्च नीलकण्ठदीक्षितानां यः समयः A D. १६३४ (कलिः ४७३४) स एव गीर्वाणेन्द्राणां समयः । स एव च तदीयापरशिष्याणां श्रीबोधेन्द्राणामपि समयः इति निश्चेतुं शक्यते ।

अद्वैतभूषणस्य विवरणप्रमेयसङ्ग्रह इत्यपरमपि नामास्ति "इति विवरणप्रमेयसङ्ग्रहे षष्ठं वर्णकम्" इतिषष्ठवर्णकान्ते लिखनात् । अयं च ग्रन्थःदुरूहाणामपि विषयाणां सुखेनावबोधकः पण्डितानामतीव हृदयङ्गमः । लौकिकानामपि अनायासेन बोधावहया ललितया च शैल्या निबद्धः । यद्यपि अत्र प्रतिवाक्यं प्रतीकग्रहणं नास्ति तथापि भाष्यस्थः सर्वोपि विषयः व्याख्यात एव श्रीभारतीतीर्थविरचितविवरणप्रमेयसङ्ग्रहवत् । अयमपि ग्रन्थः चतुस्सूत्र्यन्त एव । विवरणस्य तावदन्तत्वात् । ग्रन्थद्वयमपीदं श्रीमद्भाष्येण साकं सम्मुद्रय प्रकाशयितव्यमिति श्रीगुरुचरणानामाज्ञामनुसृत्य मुद्रापितोऽयं ग्रन्थः श्रीचरणानां सन्निधौ समर्प्यते ।

अनयोः व्याख्ययोः मुद्रापणे श्रीमठात् आगतौ द्वौ कोशौ प्रायःशुद्धौ उपायुज्येताम् । तदत्र मदीयमतिमान्द्याद्वा आयसाक्षरयोजकप्रमादाद्वा संभाविताः अशुद्धीः परिहृत्य गुणैकपक्षपातिनो विद्वांसः ग्रन्थमिमं परिशीलयन्तु अनुगृह्णन्तु च मामिति सविनयं प्रार्थयमानः ।

विदुषामनुचरः

एस. सुब्रह्मण्यशास्त्री.

श्रीः

# ब्रह्मसूत्रशाङ्करभाष्यम्

## अद्वैतभूषणसुबोधिनीभ्यामुपबृंहितम्

---

## अद्वैतभूषणम्

यस्मिन्नध्यस्तमेतद्वियदनिलमुखं विश्वमाभात्यबोधात्
पाथः पूरो गभस्तिष्विव मरुधरणीसंश्रितेष्वब्जबन्धोः ।
तन्मे वेदान्तवेद्यं हृदि सततलसन्नित्यनिर्द्वन्द्वरक्तम्
विद्यैकप्राप्यमाशु स्फुरतु हृदि सुखं ज्ञानसत्यात्मरूपम् ॥ १ ॥

अखण्डसच्चिदानन्दमात्मानं भुवनेश्वरम् ।
उमासहायं श्रीकण्ठं दक्षिणामूर्तिमाश्रये ॥ २ ॥

विघ्नान्धकारसन्दोहनिवर्तकविवस्वते ।
गणेशाय नमस्तुभ्यं वाक्यार्थज्ञानहेतवे ॥ ३ ॥

विश्वरूपं च विश्वेशं विश्वसत्ताप्रदं शिवम् ।
वेदयोनिमहंवन्दे व्यासं वेदार्थसिद्धिदम् ॥ ४ ॥

यमाश्रिता गिरां देवी नन्दयत्यात्मसंश्रितान् ।
तमाश्रये श्रिया जुष्टं शङ्करं करुणानिधिम् ॥ ५ ॥

व्याख्यावाचोऽतिदृप्यत्सुरवरतटिनीभङ्गभङ्गप्रवीणाः
श्रुत्वा त्यक्त्वा भिदाशां झटिति भयभरभ्रान्तनेत्रा यदस्य ।
धावन्तो द्वैतिषण्डाः श्रुतिशिखरवचोभावबोधैकदक्षम्
गीर्वाणेन्द्रं प्रपद्ये गुरुवरमनिशं तद्यथार्थाभिधानम् ॥ ६ ॥

गीर्वाणेन्द्रयतीन्द्राणां चरणाम्बुरुहद्वयम् ।
स्वर्गापवर्गदं पुंसां नौमि विघ्नौघशान्तये ॥ ७ ॥

टीकातन्मूलभाष्यादीन् सम्यग्बोधेन्द्रसंयमी ।
आलोच्य तत्वं सङ्गृह्य करोत्यद्वैतभूषणम् ॥ ८ ॥

ओम् । धर्मजिज्ञासासूत्रे ह्येतदवस्थितम्—'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधेः अदृष्टार्थत्वं उत दृष्टार्थत्वमिति विशये विधिवशाददृष्टार्थत्वम् । न च फलाभावः । विश्वजिन्न्यायेन स्वर्गस्य रात्रिसत्रन्यायेनार्थवादिकघृतकुल्यादेर्वा फलत्वोपपत्तेः । न चैवमध्ययनविधेरप्यविवक्षितार्थत्वे अध्ययनाप्रसक्तेः दृष्टार्थत्वादिविचारानवसरः । तत्र लौकिकशब्दतुल्यन्यायप्राप्तप्रामाण्यानपवादात् तदितरवेदवाक्यस्याध्ययनविधिप्रमेयत्वेन घटादिवत् प्रामाण्यापवादात् । तस्मात् अध्ययनविधिः प्रमाणभूतं स्वाध्यायाध्ययनं अदृष्टार्थतया विधत्त इत्यर्थविवक्षाभावात् तद्विचारात्मकशास्त्रं अनारम्भणीयमिति प्राप्ते—दृष्टार्थज्ञानानुष्ठानप्रणाड्या फललाभे नादृष्टार्थता युक्ता । अनुमानादिवत् अन्यं प्रति प्रमेयस्याऽप्यन्यत्र प्रमाणत्वोपपत्तेः इति । यथा च नाध्यापनविधिप्रयुक्तं अध्ययनं, यथा चाध्ययने नित्यविधिः तथा तृतीयवर्णके वक्ष्यामः । एवं सति नित्येन अध्ययनविधिनाऽधीतसाङ्गस्वाध्यायो वेदान्तवाक्येष्वापाततः इदमवगच्छति । मैत्रेयीब्राह्मणे 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इत्युपक्रम्य 'आत्मा द्रष्टव्यः श्रोतव्यः मन्तव्यो निदिध्यासितव्य' इति विधाय 'एतावदरे खल्वमृतत्वं' इत्युपसंहारात् सर्वतो विरक्तस्य आत्मप्रेप्सोः अमृतत्वसाधनब्रह्मसाक्षात्काराय मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं प्रमाणत्वात् प्रमितौ प्रधानं विधीयत इति । अनन्तरं च किं वैराग्यमेवाऽधिकारिविशेषणम् । उत अन्यदपि शमादि। तत्रापि किं प्रमाणम् । श्रवणमपि किं दृष्टफलत्वात् यावत्फलोदयं आवर्तनीयम् । उत अदृष्टफलत्वात् नावर्तनीयम् । पूर्वमीमांसया गतार्थं अगतार्थं वा । ब्रह्मज्ञानमपि कर्मसमुच्चितं मोक्षसाधनं उतासमुच्चितम् । तत्राऽपि किं प्रमाणम् । ब्रह्माऽपि किं सविशेषं निर्विशेषं वा । तत्राऽपि किं प्रमाणं इति विशेषजिज्ञासुं उपलभमानो भगवान् बादरायणः श्रोतव्य इति श्रुत्यपेक्षितन्यायसूचनार्थं अथातो ब्रह्मजिज्ञासेत्यसूत्रयत् । अत एवास्य सूत्रस्य श्रवणविधिमूलत्वात् श्रुतिसङ्गतिः, विचारशास्त्राधिकारिविषयप्रयोजनप्रतिपादकत्वेन शास्त्रप्रवृत्तिहेतुत्वात् समन्वयाध्यायप्रथमपादादौ सङ्गतिश्च ।

ननु नास्य सूत्रस्य श्रवणविधिः मूलम् । श्रवणे विधेरेवाऽसम्भवात् । न तावत् अपूर्वविधिः । श्रवणस्य श्रोतव्यसाक्षात्कारहेतुत्वस्य गान्धर्वशास्त्रश्रवणे अन्वयव्यतिरेकसिद्धत्वेन विध्यनुपपत्तेः । ननु तत्र श्रवणत्वेन श्रोतव्यसाक्षात्कारत्वेन न हेतुत्वम् । तथा

श्रीः

# सुबोधिनी

सर्वज्ञानक्रियाशक्तिसर्वयोगेश्वरं प्रभुम् ।
सर्ववेद्यविदं विष्णुं प्रभविष्णुमुपास्महे ॥ १ ॥
वर्णानामुत्तमो वर्णः पदानामुत्तमं पदम् ।
आरुह्यानन्दयत्येकः तमानन्दमहं भजे ॥ २ ॥

यस्मिन्पुंसि परे चिरन्तनमहामोहप्रभावोदितं
मिथ्याभित्तिविचित्रचित्रमतुलं सोल्लासमुल्लेखितम् ।
तत्तद्बुद्धिविशुद्धदर्पणसमाविष्टं सदेकं जगत्
येनानन्तमिवानुभूतमखिलं सर्वात्मकं तं भजे ॥ ३ ॥

तत्तद्बुद्धिविकल्पितः खलु पुमानेकोप्यनेकायते
नैकेप्येकमिति प्रकाशविषयास्त्वेकात्मतामास्थिताः ।
भेदाभेदविभागविभ्रमपि यन्मायामयं दृश्यते
तं गोपालकबालकाकृतिमहं विद्यानिदानं भजे ॥ ४ ॥

अद्वैतं शिवमित्यतश्शिवपदं संशान्तभेदं तु यद्
यस्मिन्रामपदे चिदात्मनि सुखे सिद्धा रमन्तेऽनिशम् ।
तत्तीर्थं परमार्थतस्सुविदितं तीर्थाग्रणीसेवितं
तं सेवे शिवरामतीर्थमतुलं कैवल्यमस्मद्गुरुम् ॥ ५ ॥

सति धर्मश्रवणस्याऽपि धर्मसाक्षात्कारहेतुत्वापत्तेः । किन्तु गान्धर्वशास्त्रश्रवणत्वेन षड्जादि-साक्षात्कारत्वेन; आत्मश्रवणस्य त्वात्मसाक्षात्कारहेतुत्वमसिद्धमिति तत्र विधिः अर्थवानिति चेत् । न, योग्यश्रोतव्यसाक्षात्कारत्वेन श्रवणत्वेन हेतुत्वात् । ब्रह्मणश्च प्रत्यगात्मत्वेन योग्यत्वात् । नापि नियमविधिः । विकल्पेन साधनद्वयप्राप्तौ नियमविधिः । न च औपनिषदात्मज्ञाने साधनान्तरं प्राप्तम् । ननु लौकिकात्मज्ञाने साधनान्तरं अन्तःकरणं प्राप्तमेव नख-विदलनादिवत् । न च यत्र नियमविधिः तत्र वस्तुतः साधनान्तरप्राप्त्या भवितव्यमिति; अपूर्वीय-व्रीहौ नखविदलनादिसाधनान्तराप्राप्तौ व्रीहीन् अवहन्तीत्यपि नियमविधिः न स्यादिति चेत् । न, प्रकृत एव तर्कितविध्यभावे तर्कितसाधनान्तरप्राप्तौ नियमविधिः । अस्ति

साक्षाच्छङ्करशङ्करार्यकसुहृत्पद्मानानोदञ्चित-
श्रीमद्वक्त्रसरोरुहाद्गलितसद्भाष्यामृतं स्यन्दते ।
वेदव्यासवचस्सरोजनिचयं वेदान्तसिन्धूदितं
सोल्लासञ्च विकासयत्परमहो मज्जाम मुक्त्यै वयम् ॥ ६ ॥

सूत्रभाष्यकृतौ नत्वा सूत्रभाष्यसुबोधिनी ।
सुधियां सुखबोधाय क्रियते ऋजुफक्किका ॥ ७ ॥

इह खलु धर्मार्थकाममोक्षेषु मोक्ष एव परमपुरुषार्थस्समधिगतः श्रुत्यादिषु । तेषु च जन्यत्वात्त्रयाणां अनित्यत्वं निश्चित्य कश्चित्कुतश्चिद्भाग्योदयात् परमपुरुषार्थमेवाभिलषति । तमधिकृत्य मोक्षसाधनब्रह्मज्ञानफलकविचारारम्भं सूत्रयामास भगवान्वेदव्यासः अथातो ब्रह्मजिज्ञासेति । अस्य सूत्रस्य शास्त्रं विषयः । तदनारभ्यमारभ्यं वेति विषयाद्यसंभवसंभवाभ्यां सन्देहे विषयाद्यसम्भवात् अनारभ्यं इति पूर्वपक्षं प्राप्य परमार्थदृष्ट्या विषयाद्यसम्भवेऽपि अनाद्यध्यासमहिम्ना तत्संभवति । तथाहि—

तत्र सूत्रे प्रमातृत्वादिबन्धस्य वास्तवत्वे ज्ञाननिवर्त्यत्वानुपपत्तेः ज्ञानाद्बन्धनिवृत्तिं सूत्रयता बन्धस्याध्यस्तत्वं सूचितम् । बन्धनिवृत्तिः फलञ्च । ब्रह्मणः प्रत्यग्भिन्नत्वे बद्धोऽहमिति प्रतीचि प्रतीयमानबन्धस्य ब्रह्मज्ञानादनिवृत्तेः तज्ज्ञानात्तन्निवृत्तिं सूत्रयता प्रत्यगभिन्नं ब्रह्म विषयश्च । सूत्राणां श्रुत्यनुग्राहकतर्करूपाणां श्रुतीनां चोपकार्योपकारक

---

हि वीहीनवहन्तीति विध्यभावे तर्किते नखविदलनादिसाधनान्तरस्य तर्कितप्राप्तिः । औपनिषदात्मज्ञाने तु श्रवणविध्यभावे तर्कितेऽपि नान्तः करणादिसाधनान्तरप्राप्तिः । किञ्च नियमविध्यङ्गीकारे नियमादृष्टसाध्यं परमापूर्वं वक्तव्यम् । न च तत् संभवति , ब्रह्मज्ञानस्य प्रमाणफलत्वेन तत्र परमापूर्वस्य कारणस्याभावात । नापि परिसङ्ख्या । एकस्य साधनस्य साध्यद्वये युगपत्प्राप्तौ एकस्मित् साध्ये साधनद्वयस्य वा युगपत्प्राप्तौ परिसंख्या । यथा 'इमामगृभ्णन्रशनामृतस्य' इति मन्त्रस्य लिङ्गात् गर्दभाश्वरशनादानयोः साध्ययोः युगपत् प्राप्ताविमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति परिसङ्ख्या । यथा वा पञ्चनखानां एकस्मिन्भक्षणरूपे साध्ये समुच्चित्य प्राप्तौ 'पञ्चैव पञ्चनखा भक्ष्या' इति परिसङ्ख्यानम् । न चात्र लौकिकात्मज्ञाने साधनद्वयप्राप्तिः । नापि साध्यद्वये एकस्य साधनस्य प्राप्तिः तस्माच्छ्रवणे विधेरसम्भवात् न तन्मूलत्वं अस्य सूत्रस्येति । अत्रोच्यते । भाषाप्रबन्धादीनामपि निर्विशेषप्रतिपत्तिसाधनतया स्त्रीशूद्रादीनामिवाधीतस्वाध्यायानामपि प्राप्तौ नियमोपपत्तेः । नियम-

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवत् विरुद्ध-स्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतर–

---

भावः संबन्धः। बन्धनिवृत्तिब्रह्मज्ञानयोः जन्यजनकभावः। श्रुतीनां ब्रह्मणश्च बोध्य-बोधकभावः सम्बन्धः सूचितः। एवं विशिष्टानुबन्धं शास्त्रं आरभ्यमेवेति सिद्धान्तम-भिप्रेत्य सूत्रसूचितं अध्यासं लक्षणसम्भावनासद्भावप्रमाणैः विशदयितुं आदावध्या-समाक्षिपति–युष्मदस्मत्प्रत्ययगोचरयोरित्यादिना मिथ्येति भवितुं युक्तमित्यन्तेन। तत्र कारणाध्या-सस्य कार्याध्यासस्य च साक्षादनर्थानुभावकत्वेन इतरेतराध्यासस्यैव तथात्वादिति इतरेतराध्यासमेवाक्षेपसमाधानाभ्यां दर्शयतीति मन्तव्यम्। अत एवाध्यासभाष्यं सूत्रेण संगतमेव। आदावध्यासमाक्षिपन्भगवान्भाष्यकारः अर्थात् सदैव प्रत्यस्तमिता-नर्थव्रातब्रह्मानन्दानुस्मरणलक्षणं मङ्गलमाचरति। लोके परत्र परैक्यभ्रान्तिः अन्यत्र परैक्यप्रमितिपूर्विका दृष्टा यथा शुक्ताविदं रजतमित्यादौ। एवमिहापि प्रतीचोऽन्यत्वा-रोप्याहङ्काराद्यैक्यप्रमितिपूर्वकत्वं वाच्यम्। सा प्रमितिश्च तदैक्यमिति मत्वा तदसम्भवे त्रिविधं विरोधमाह—युष्मदस्मत्प्रत्ययगोचरयोरिति। तथा हि—युष्मदस्मदर्थावत्यन्त-भिन्नौ, त्रिविधविरोधभाक्त्वात् तमः प्रकाशवत्। युष्मदस्मदर्थावेकत्वप्रमित्यविषयौ त्रिविधविरोधभाक्त्वात् भिन्नत्वाद्वा तमः प्रकाशवदिति। अत्र प्रथमानुमानेन आश्रयविशेषलाभः।

ननु युष्मदस्मत्प्रत्ययगोचरयोरिति द्विवचनेनैव द्वावाश्रयौ लभ्येते। तत्किं भेदसाधकानुमानेनेति चेन्न। लौकिकप्रमाणेनाश्रयभेदासिद्धेः आश्रयासिद्धो हेतुः स्यात्। परस्परविलक्षणाश्रयद्वयसिध्या समुदिताश्रयसिद्धिः प्रथमानुमानफलम्। तेन परीक्षकदृष्ट्या सिद्धौ युष्मदस्मदर्थौ पक्षः। तत्रेतरेतरभावानुपपत्तिः इति भाष्य-

---

विधिसामर्थ्याच्च भाषादिना ब्रह्मजिज्ञासुः अधीतस्वाध्यायः प्रत्यवैति, ब्रह्मज्ञानं वा न प्राप्नोतीति कल्प्यते। न च नियमादृष्टसाध्यपरमापूर्वाभावः सर्वापेक्षाधिकरणे ब्रह्मज्ञानस्य सर्वादृष्टसा-ध्यतायाः वक्ष्यमाणत्वात्। तस्मात् सुष्ठूक्तं श्रवणविधिः ब्रह्मजिज्ञासासूत्रमूलमिति।

नन्वेवमपि युष्मदस्मादित्यादिभाष्यस्य कः प्रसङ्गः। सूत्रार्थासंस्पर्शित्वेन सूत्रव्याख्यानत्व-रूपत्वाभावात्। तथा चासङ्गतत्वात् टीकाकृता न व्याख्येयम्। तथा हि। अस्मिन्सूत्रे निरर्थकानु-वादपरिहाराय श्रवणविधिमूलत्वाय च कर्तव्येति पदमध्याहर्तव्यम्। तथा सति प्रकृत्यर्थस्य ज्ञानस्य प्रत्ययार्थस्य चेच्छायाः प्रमाणपरतन्त्रत्वेन विषयसौन्दर्यलभ्यत्वेन च कर्तव्यत्वात् अन्तर्णीतः

काराभिमतं साध्यम्। तत्र इतरश्चेतरश्च इतरेतरौ तयोः भाव इतरेतरत्वम्, परस्परैक्यमिति यावत्। तस्यानुपपत्तिः असम्भव इत्यर्थः। तदेतद्विशदयति द्वितीयानुमानेन। तत्र युष्मच्छब्दस्य साधिष्ठानाहङ्कारादौ शक्त्या प्रवृत्तस्य अहङ्कारादिजडांशे लक्षणा। अस्मच्छब्दस्याऽपि अहङ्कारादिविशिष्टप्रतीचि शक्त्या प्रवृत्तस्य प्रत्यक्चिन्मात्रे लक्षणा। तथा च लक्षितयोः तयोः त्रिविधविरोधभाक्त्वं, न स्वरूपासिद्धिः। तत्रैक्यस्यासंभवो नाम प्रमित्यविषयत्वमेवेति मूलोक्तसाध्यमेवाविष्कृतं भवति। वस्तुपरीक्षकः किल युष्मच्छब्दस्य अहङ्कारादिदेहान्तसंघात एव लौकिकव्यवहारदर्शनात् अधिष्ठानांशे लौकिकानां बुद्धेरप्रवेशात् अहङ्कारादिरेव युष्मत्पदवाच्यार्थः इति प्रत्येति। एवमसङ्गोऽहमभोक्ताऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावोऽहं इति विद्वद्व्यवहारं दृष्ट्वा केवलमेव प्रत्यगात्मानमस्मदर्थं प्रत्येति। न लक्षणया। यद्यपि तत्त्वमादिवाक्यप्रवृत्तिवेलायां केवलप्रत्यगात्मा लक्ष्यते। तथाऽपि विद्वदनुभववेलायां तु न शक्तिः लक्षणा वा तत्र प्रवर्तते। तस्माद्यथा विद्वान्व्यवहरति तथैवाऽयं प्रत्येति। अतो न तत्र लक्षणा न्याय्या। अत्राऽहं कर्ता भोक्ता सुखी दुःखीत्यध्यासान्तर्गताधिष्ठानारोप्योपस्थापकतया द्वौ शब्दौ प्रयुक्तौ युष्मदस्मदिति। अत्र तत्प्रातिपदिकमेव भाष्यकारैः अभिप्रेतमिति गम्यते। तदर्थगतकर्तृत्वैकत्वादिकं च न विवक्षितमिति। अन्यथा त्वमावेकवचन इत्यधिकृत्य प्रत्ययोत्तरपदयोश्चेति सूत्रेण त्वम इत्यादेशं कृत्वा त्वत्पुत्रो

---

विचारस्सन्प्रत्ययेन लक्ष्यः। साध्यावस्थं च ज्ञानं, प्रकृत्या ज्ञानस्य सुखदुःखाभावयोः अन्यतरत्वाभावात् पुरुषार्थाकाङ्क्षायां अथशब्दोपात्तमुमुक्षाविषयभूतो मोक्षश्च फलत्वेन संबध्यते। तथा च सूत्रस्य श्रुत्यर्थाभ्यामेतावानर्थः। साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति। तत्रेदं भाष्यं न सूत्रार्थकलामपि स्पृशतीत्यसङ्गतत्वात् अव्याख्येयमिति। अत्रोच्यते। अत्र हीदं विचार्यते। ब्रह्मविचारः कर्तव्यो नवेति विषयप्रयोजनसंभवासम्भवाभ्यां सन्देहे न कर्तव्यो विचारः विषयप्रयोजनासंभवात्। ब्रह्मात्मैक्यं विषयः। अनर्थनिवृत्तिः प्रयोजनम्। न च तदुभयं संभवति ब्रह्मात्मनोर्विरुद्धधर्माध्यस्तत्वेनैक्यानुपपत्तेः। अहमर्थस्य कर्तृत्वादेः स्वाभाविकत्वेन ज्ञानान्निवृत्त्यनुपपत्तेश्च। न चानुपपन्नमपि 'ब्रह्म वेद ब्रह्मैव भवति' इति 'तरति शोकं आत्मवित्' इत्यादिवाक्यात् वेदान्तविषयप्रयोजनं सत् तद्विचारशास्त्रस्यापि संभवतीति युक्तम्। वेदान्तानामेव प्रत्यक्षाभिमतेन अबाधितकल्पेन द्वैतावभासेन विरुध्यमानानामयोग्यतानिश्चयेन प्रामाण्यानुपपत्तेः जरद्गवादिवाक्यवत् अनर्थकत्वं स्यात्। तन्माभूदिति द्वैतावभासस्य मिथ्याध्यासत्वप्रदर्शनार्थं अध्यासमाचिक्षेप -युष्मदस्मदित्यादिना। तथापीत्यादिना त्वध्यासात्मतां समर्थितवानिति सूत्रार्थविचारकर्त-

भावानुपपत्तिः इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्यय-गोचरस्य विषयस्य तद्धर्माणां चाध्यासः तद्विपर्ययेण विषयिणस्तद्धर्माणां

---

मत्पुत्र इतिवत् त्वन्मत्प्रत्ययगोचरयोः इत्येव निर्देशः कृतः स्यात्। न च प्रातिपदिकमात्र-ग्रहे समासानुपपत्तिरिति वाच्यम्। "युष्मदस्मदोष्षष्ठीचतुर्थी" "अलिङ्गे युष्मदस्मदी" इत्यादाविव प्रातिपदिकद्वित्वापेक्षया प्रातिपदिकार्थद्वित्वापेक्षया वा द्वन्द्वसमासोपपत्तेः। अत्रात्मानात्मनोः विरोधस्फूर्त्यर्थं इदमस्मत्प्रत्ययगोचरयोरिति वक्तव्ये युष्मद्ग्रहणं अत्यन्तं विरोधस्फूर्त्यर्थम्। नहि युष्मदस्मत्प्रयोगे यथा विरोधस्फुरणं तथेदमस्म-त्प्रयोगे। ननु शास्त्रफलभाक्त्वेन अस्मदर्थस्याभ्यर्हितत्वात् अभ्यर्हितं पूर्वं इति सूत्रेण पूर्वनिपातः युक्त इति चेन्न। अध्यारोपापवादन्यायेनानात्मभ्यो निष्कृष्य शुद्धात्मस्वरूपं निरूपयितुमादौ युष्मत्पदग्रहणम्। वस्तुतस्तु सर्वनामगणपाठे युष्मदस्मच्छब्दस्य पूर्वं पाठात् तत्क्रमेणादौ युष्मद्ग्रहणं कृतमिति मन्तव्यम्। अत्रैवं समासः। युष्मच्चास्मच्च युष्मदस्मदी। तावेव प्रत्ययौ। तावेव गोचरौ तयोरित्यर्थः। अत्र युष्मदस्मदिति युष्मदर्थस्याऽहङ्काकारादेः जडस्वभावस्य अस्मदर्थस्याऽहंकारादिविलक्षणचिन्मात्रस्य च स्वरूपतः विरोधः उक्तः। तथा च प्रतीयत इति प्रत्ययः अहङ्कारादिः। प्रतीतिः प्रत्ययः प्रत्यगात्मा। अनेन प्रतीतितो विरोध उक्तः। तथा कर्ताऽहं भोक्ताऽहमिति पामरव्यवहारगोचराहङ्कारादिः युष्मदर्थः। आरोपितानात्मप्रविलापनेन अहं ब्रह्मा-ऽस्मीति विद्वद्व्यवहारगोचरोऽस्मदर्थः प्रत्यगात्मा इति व्यवहारतोऽपि विरोध उक्तः ऐक्यप्रमित्यभावात् तत्संस्काराभावेन तदध्यासाभावेऽपि तादात्म्यप्रतीत्या तत्संस्कार-संभवात् तदध्यासः स्यादित्यत आह—विषयविषयिणोरिति। चिज्जडयोः विषयविषयित्वेन तादात्म्यासम्भव इत्यर्थः। तत्र यद्यपि युष्मदस्मदिति परस्परविलक्षणौ पराक्प्रत्यञ्चौ विवक्षितौ तत्रेतरेतरभावानुपपत्तिः साध्यते। विरुद्धस्वभावयोः इति हेतुः। तमःप्रकाश-वदिति दृष्टान्तो विवक्षितः। तेनैवाध्यासाक्षेपसम्भवे प्रत्ययगोचरयोरित्यस्य वैयर्थ्यं प्रतिभाति; तथापि एवं योज्यम् जडत्वाजडत्वाभ्यां विरुद्धत्वप्रत्यायनाय विषय-विषयिणोः इति पदे। युष्मदर्थस्य विषयत्वे अस्मदर्थस्य च विषयित्वे प्रमाणमाह—प्रत्यययोरिति। लोके ह्याबालगोपं अयं अहमिति प्रत्येति। तत्र योऽयं इदमंशः

---

व्यताहेतुविषयप्रयोजनसिद्धिहेत्वध्यासोपस्थापकत्वात् सूत्रसङ्गतमेवेदं भाष्यम्। न च अविद्यात्मकत्वस्य विषयप्रयोजनाभ्यां व्याप्त्यसिद्धिः। विशेषतो व्याप्त्यभावेऽपि सामान्यतः

कर्तृत्वाद्याश्रयत्वेन प्रतीयमानमन्तः करणं युष्मदर्थविषयः। तत्रास्मदंशस्साक्षी यः स एवाऽस्मदर्थो विषयीति प्रमाणमुपन्यस्तम्। तत्रैव व्यवहारोऽपि प्रमाणमित्याह —गोचरयोरिति। युष्मदर्थस्य विषयत्वं पामरव्यवहारादवगम्यते। अस्मदर्थस्य विषयित्वं विद्वद्व्यवहारात् इति सर्वं समञ्जसम्।

ननु आत्मानात्मनोर्विरोधादैक्यतादात्म्यप्रतीत्यभावेन तदध्यासाभावेऽपि तद्धर्माणां चैतन्यजाड्यादीनामितरेतरत्र विनिमयेनाध्यासस्स्यादित्यत आह — तद्धर्माणामपीति। स्फटिके लोहितद्रव्यसंसर्गात् लौहित्यप्रतीतावपि अहंकारादिसंसर्गशून्ये प्रतीचि तद्धर्मप्रतीत्ययोगात् धर्माध्यासो न संभवतीत्यर्थः। भेदप्रतीत्यविषयत्वे सत्येकत्वप्रतीतिविषयत्वं ऐक्यम्। यथा स्थाणावेकस्मिन् स्थाणुरयमिति। भेदप्रतीतिविषयत्वे सत्येकत्वप्रतीतिविषयत्वं तादात्म्यम्। यथा शुक्लो गौः कृष्णो गौरिति। धर्मिणोः भेदग्रहेऽपि इतरधर्माणां इतरत्र प्रत्ययो विनिमयः। यथा लोहितः स्फटिक इत्यादि। धर्मिसंसर्गाभावे धर्मसंसर्गः कुतः इत्यभिप्रेत्योक्तं—सुतरामिति। पूर्वग्रन्थसिद्धं इतरेतरैक्यप्रमित्यभावमनुवदति—इतीति। तत्प्रमाजनितसंस्काराभावं अध्यासाभावहेतुत्वेनाऽऽह--अत इति। यतः अध्यासहेतुसंस्काराभावः अत अध्यासो मिथ्या इत्यन्वयः। कस्मिन्कस्याध्यास इत्याकाङ्क्षायां पूर्वसिद्धमधिष्ठानस्वरूपमनुवदति--अस्मत्प्रत्ययगोचर इति। ननु अस्मत्प्रत्ययगोचरत्वं बुद्ध्यादेरप्यस्ति, अतः विशिनष्टि—विषयिणीति। बुद्ध्यादेः विषयत्वान्नास्मदर्थतेति भावः। विषयित्वे हेतुमाह—चिदात्मक इति। आरोप्यस्वरूपमाह-युष्मदिति। —युष्मत्प्रत्ययगोचरस्येति परागर्थस्येत्यर्थः। परागर्थत्वे हेतुमाह--विषयस्येति। विषयस्य स्वरूपतोऽध्यासाभावेऽपि स्फटिकलौहित्यादिवत्तद्धर्माणां जाड्यादिनामध्यासः स्यादित्याह—तद्धर्माणाञ्चेति। धर्मिसंसर्गाभावे धर्माणां विनिमयासंभवात् न तदध्यास इत्यर्थः। नन्वस्मदर्थे युष्मदर्थस्याध्यासाभावेऽपि युष्मदर्थेऽस्मदर्थस्य तद्धर्माणां चाध्यासः सिद्ध इत्यत आह–तद्विपर्ययेणेति। ततो विपर्ययः तद्विपर्ययः तेन, इत्थंभावे तृतीया। युष्मदर्थेऽस्मदर्थे-

---

तत्संभवात्। तथाहि—विचारशास्त्रं आरम्भणीयम्। संभावितविषयप्रयोजनत्वात्। विमतं संभावितविषयप्रयोजनं बन्धनिवर्तकत्वात्। जाग्रद्बोधवत्। न च बन्धस्य शास्त्रजन्यज्ञाननिवर्त्यत्वमसिद्धम्। अविद्यात्मकत्वेन तत्साधनात्।

नन्वेवमपि बन्धस्याविद्यकत्ववर्णनं व्यर्थम्। सत्यस्यैव ज्ञानान्निवृत्तौ विषयादिसिद्धिसंभवात् इति चेत्। तत्र वक्तव्यम्। किं ब्रह्मज्ञानं विषयगतं नियन्तृत्वं निवर्तय-

च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्, तथाप्यन्योन्यस्मिन्नन्यो-न्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोधर्मधर्मिणो

---

क्यादिरूपेण विषयिणः अस्मदर्थस्य तद्धर्माणां चैतन्यसुखादीनां चाध्यासो मिथ्या, नास्ती-त्यर्थः। अत्र मिथ्याशब्दोऽपह्नववचनः। तथा च मातृत्वादिबन्धस्य सर्वलोकप्रसिद्ध-स्यानध्यस्तत्वेन ज्ञाननिवर्त्यत्वाभावे सति शास्त्रप्रयोजनासिध्या प्रत्यक्षसिद्धजीवब्रह्म-भेदस्यापह्नोतुमशक्यत्वात् विषयासिद्धिः। विशिष्टाधिकारिणोऽपि दुर्वचत्वादिदं शास्त्रं अनारम्भणीयमिति पूर्वपक्ष्याशयः। पूर्वपक्षमुपसंहरति—इतीति। भवितुं युक्तमिति, आक्षेपस्संभावनामात्रेण, न युक्तिसह इति भावः। अध्यासस्यासंभवः किमयुक्तत्वात् अभानाद्वा इति विकल्प्य आद्यमङ्गीकरोति—तथापीति। एतदनुरोधेन पूर्वं यद्यपीति वक्तव्यम्।

तत्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति।

---

दात्मगतं नियम्यत्वमपि निवर्तयति। उताश्रयगतं नियम्यत्वं निवर्तयद्विषयगतं नियन्तृत्वम्। अथवोभयगतकर्तृत्वादिकम्। नाद्यः। नीलज्ञानस्य स्वविषयगतनीलनिवर्तकत्वादर्शनात्। न द्वितीयः। नीलज्ञानेनाश्रयगतधर्मादिनिवृत्तिप्रसङ्गात्। न तृतीयः। सत्तादेः निवृत्ति-प्रसङ्गात्। ननु न दर्शनबलात् ज्ञानात् सत्यस्य निवृत्तिं ब्रूमः। येनातिप्रसंगः स्यात् किन्तु 'तथा विद्वान्नामरूपाद्विमुक्त' इति शास्त्रात्। न च श्रुतस्यैव ज्ञाननिवर्त्यत्वस्यानुपपत्त्या अविद्यात्मकत्वं बन्धस्य कल्प्यते, यथा अग्न्यादीनामधिकारापूर्वसाधनभावस्यानुपपत्त्या मध्य-वर्तीन्यवान्तरापूर्वाणि कल्प्यन्ते, यथा वा स्वर्गसाधनत्वस्यावगतस्यानुपपत्त्या परमापूर्वं कल्प्यते। तद्वदिति वाच्यम्। तत्राऽऽशुविनाशिनः कालान्तरभाविफलजनकत्वस्य व्यापारपूर्वकत्वव्याप्तेः तथाऽस्तु। न त्विह व्याप्तिरस्ति। सत्यब्रह्महत्यायाः सेतुदर्शननाश्यत्वात्, विषयदोष-दर्शनस्य सत्यरागनिवर्तकत्वात्, तार्क्ष्यस्मरणस्य सत्यविषनिवर्तकत्वादिति चेत्। न। सेतु-दर्शनमात्रस्य निवर्तकत्वे सेतुस्नानान्म्लेच्छानामपि पापनिवृत्तिप्रसङ्गादिति दूरदेशागमनछत्र-पादुकाविधुरस्वकृतोद्घोषणाद्युपकृतस्य तथात्वम्। तादृशं चेच्छया कर्तुं शक्यत्वात् क्रियारूप-मेव। विषयदोषदर्शनमपि न रागनिवर्तकम्। किन्तु रागविरोधिचेतोवृत्तिविशेषः। तार्क्ष्यस्मरणमपि मण्याद्युपकृतं क्रियारूपमेव विषनिवर्तकमिति ममापि व्याप्तिसत्वात् श्रुतोपपत्त्यर्थं

इति सकारणस्य बन्धस्य प्रत्यगात्मनि कालत्रयेऽप्यसंसर्गावगमात् "असङ्गमरसं" "असङ्गोऽह्ययं पुरुष" इत्यादिश्रुतशतेभ्योऽध्यासगन्धोऽपि संभावयितुं न शक्यते। तथा च विद्वदनुभवप्रसिद्धिमादायाध्यासाक्षेपोऽस्माकमिष्ट एव। तर्हि विषयाद्यसम्भवादनारब्धव्यमेव शास्त्रमिति चेदुच्यते। न हि वयं विद्वत्प्रसिद्ध्या विषयादिसिद्धिहेतुमध्यासं ब्रूमः। किन्त्वविद्वत्प्रसिद्ध्या, अविद्यावदधिकृतत्वाच्छास्त्रस्य। तदेतदाह—अयं लोकव्यवहार इति। अहं कर्ता भोक्ता सुखी दुःखीति लोकोऽयं व्यवहरति। अत्र विद्वत्प्रसिद्धाधिष्ठानरूपे पामरप्रसिद्धाहङ्कारादेः लोकप्रसिद्धसंबन्धाभावेनाध्यासिकसम्बन्धेनाध्यस्त एवाहङ्कारादिरिति प्रतिपत्तव्यम्।

---

अविद्यात्मकत्वकल्पनं अद्वितीयब्रह्मप्रतिपादकवेदान्तवाक्ययोग्यतासिद्ध्यर्थं चेति तत्प्रतिपादकं भाष्यं सूत्रार्थकर्तव्यतोपयोगिविषयप्रयोजनसिद्धिहेत्वध्यासप्रतिपादकत्वात् सूत्रसङ्गतमिति व्याख्येयमेव।

ननु तथाऽपि लोके शिष्टानामभिमतकार्यारम्भसमये तदुचितमङ्गलाचरणदर्शनात् तदकरणे भाष्यकारस्याशिष्टत्वेन व्याख्येयसूत्रार्थे अप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्त्यादिसम्भावनया चानुपादेयवचनत्वप्रसङ्ग इति। नैष दोषः। अध्यासाक्षेपार्थयुष्मदस्मदित्यादिभाष्ये प्रवृत्तस्य सर्वोपप्लवरहितमात्मानं प्रतिपद्यमानस्य भगवतः भाष्यकारस्य सर्वदा सर्वकार्येष्वित्यादि स्मृतिप्रतिपाद्यतत्वानुस्मरणलक्षणमङ्गलाचरणे कुतो वाऽशिष्टत्वम्। कुतश्चाप्रतिपत्त्यादिशङ्का। तस्मादुक्तसर्वदोषरहितमिदं व्याख्यायते। तत्र **युष्मदस्मदित्यादि** तथापीत्यन्तोऽध्यासाक्षेपार्थः। तथापीत्यादि लोकव्यवहार इत्यन्तः समाधानार्थः। तत्र युष्मदस्मदिति प्रत्यक्पराग्रूपविरोधः उक्तः। प्रत्यय इत्यनेन भावकर्मव्युत्पत्तिभेदात् प्रतीतिरूपत्वं प्रतीतिकर्मत्वं विरोध उक्तः। गोचर इत्यनेन प्रत्यक्त्वपराक्त्वव्यवहारतो विरोध उक्तः। आत्मानात्मनोः विषयविषयिणोः सहावस्थितत्वात् तादात्म्यायोग्यत्वमेव विरोध इति प्रदर्शनार्थं विषयविषयिणोरित्युक्तम्। तथा च विरुद्धस्वभावत्वान्नात्मानात्मनोः अध्यासनिमित्तसादृश्यसम्भवः। अत एव न विवेकाग्रहः। तादात्म्याभावात्। तादात्म्याहितसंस्काराभावाच्च। तथा हि—आत्मानात्मानौ न वस्तुतः तादात्म्यवन्तौ। तादात्म्यायोग्यत्वलक्षणविरुद्धस्वभावत्वात्। तमःप्रकाशवत्। अत एव तद्धर्माणामपि इतरेतरत्र इतरेतरस्य भावानुपपत्तिरिति अध्यासव्यापकाभावात् अध्यासो नोपपद्यते। ननु तमःप्रकाशयोः भावाभावरूपत्वात् तादात्म्यं तदनुभवो वा माऽस्तु। आत्मानात्मनोस्तु भावयोः तादात्म्याभावे नायं दृष्टान्त इति चेत्। न। तमसः अभावत्वासिद्धेः। उपचयाद्यवस्थावत्वात्, रूपवत्वाच्च, द्रव्यत्वेन भावरूपत्वात्। ननु तमः न भावः, भावोत्पत्तिप्रतीतिकारणविधुरत्वात्।

नन्वहं कर्ता भोक्तेति प्रतीतेः भ्रमत्वसिद्धौ तद्विषयस्याहङ्कारादेः अध्यस्तत्वसिद्धिः। तस्याध्यस्तत्वसिद्धौ तत्प्रतीतेः भ्रमत्वसिद्धिः इत्यन्योन्याश्रयान्नाध्यासः सिध्यति। किञ्च प्रतीतिबलेन कर्तृत्वादिविशिष्टाहंप्रत्ययी कश्चित्सिध्यति। तद्विलक्षणस्यानुभवानारूढस्य कथमस्तित्वावगमः। कथं वा तस्याधिष्ठानत्वसिद्धिः। तस्मान्निरधिष्ठानविभ्रान्तेरभावादहङ्कर्तेत्यादिप्रतीतिः प्रमैव स्वीकर्तव्या, बाधकाभावादिति चेत्। उच्यते। कर्तृत्वाद्यभिमानपूर्वको योऽयं जननमरणादिदुःखरूपः संसारः तस्य ज्ञानान्निवृत्तिः श्रूयते। "तरति शोकमात्मवित्"। "तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत्सर्वमभवत्"। "अथ सोऽभयङ्गतो भवति"। अतोऽन्यदार्तम्"। "अथात आदेशो नेति नेति"। "तमेव विदित्वाऽतिमृत्युमेति। नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिशतेषु। तथा चानध्यस्तस्य ज्ञाननिवर्त्यत्वायोगात् अध्यस्त एवाहङ्कारादिः इति गम्यते। सर्वस्यापि वेद्यजातस्य ज्ञाननिवर्त्यत्वश्रुत्या सर्वाधिष्ठानं केनापि प्रमाणेन निषेद्धुमशक्यम्, सर्वदृश्यविलक्षणं नित्यसिद्धं ब्रह्मात्मस्वरूपमवगम्यते। "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः" इति न्यायात्। तथा चाहङ्कारादेः अधिष्ठानयाथार्थ्यज्ञाननिवर्त्यत्वश्रुत्याध्यस्तत्वे सिद्धे तत्प्रतीतेर्भ्रान्तित्वं सिद्धमिति नाऽन्योन्याश्रयदोषः इत्येतत्सर्वमभिप्रेत्याह—अयमिति।

---

घटाभाववत्। तथा हि। किं तमसश्चतुर्विधाः परमाणवः उपादानकारणम्। उत अन्यत्। नाद्यः। तेषां द्व्यणुकादिक्रमेण कार्यारम्भकत्वात् आलोकविनाशसमनन्तरं झटिति महान्धकारानुपलम्भप्रसङ्गात्। न द्वितीयः। अन्यस्यानुपलम्भात्। आलोकवितते देशे निमीलितनयनस्योपलभ्यमानं तमः न बाह्यम्, असम्भवात्। नान्तरम्, आन्तरस्य अतिसन्निहितत्वेन चाक्षुषत्वानुपपत्तेः। अन्यथा चक्षुस्संयुक्ताञ्जनस्यापि ग्रहणप्रसङ्गात्। तथा च सत्ताप्रतीतिकारणयोः अभावात् तमसो रूपवत्त्वादिप्रतीतिः विभ्रम इति चेत्। न। परमाणुभिर्वा अविद्यया वा झटिति महाविद्युदादिवज्जन्मोपपत्तेः। निमीलितनयनस्याप्यान्तरमेव तमः प्रतीयते। न चाञ्जनग्रहप्रसङ्गः। तस्यायोग्यत्वात्। अस्य च फलबलेन योग्यत्वात्। अतः रूपवत्त्वादिप्रतीतेः बाधकाभावात् भावरूपमेव तमः नाऽभावरूपम्, धर्मिप्रतियोगिप्रतीतिनिरपेक्षप्रतीतित्वाच्चेति न दृष्टान्तवैषम्यम्। ततः कारणत्रयाभावान्नाध्यासो युक्त इति। अत्रोच्यते। किं अध्यासस्य सत्त्वं अपह्नूयते। उत प्रतीतिः। आद्ये इष्टापत्तिः। अन्त्येऽपि किमप्रतीतिस्वरूपं उत कारणम्। नाद्यः। अहमिदं ममेदमित्यादिस्वरूपस्य प्रत्यक्षसिद्धत्वात्। द्वितीयेऽपि किन्निमित्तकारणाभावः प्रसाध्यः उतोपादानकारणाभावः। नाद्यः। अनाद्यविद्यावशादात्मानात्मनोः विवेकाग्रहे सति पूर्वपूर्वभ्रमाहितसंस्कारवशात् इदानींतनाध्या-

**प्रसिद्धं अध्यासं द्वेधा विभजते**-लोकव्यवहार इति। **लोक्यत इति लोकोऽहङ्कारादिरर्थः तस्य व्यवहारो ज्ञानं, अथवा लोक्यत इत्यर्थाध्यासः लोकनमिति ज्ञानाध्यासश्च विवक्षितः। व्यवहार इति शब्दाभिलापक इति विरूपः। ननु ज्ञानस्य आत्मस्वरूपत्वात् कथमध्यस्तत्वमिति चेन्न। वृत्तिविशेषाभिव्यक्तज्ञानस्याध्यस्तत्वात्। तथाहि। अनाद्यध्यस्ताविद्यया आवृते प्रत्यगात्मनि विक्षेपशक्तिः तावदहङ्काराद्यनात्म । च विषयविषयिभावेन परिणमते। तथा चाध्यासद्वैविध्यम्। तदेतद्भिनीय दर्शयति**— अहमिदं ममेदमिति

---

ससिद्धेः बीजाङ्कुरवत् अनादित्वात् गुणावयवसामान्यलक्षणसादृश्याभावेऽपि केतकीसर्पगन्धयोरिव सादृश्यान्तरं वा पीतः शंख इत्यादाविव सादृश्यज्ञानं अहेतुरिति वा कल्पनीयम् । नान्त्यः मिथ्याभूतानाद्यज्ञानस्यैवोपादानत्वात् । न च तत्र मानाभावः । अहमज्ञः मां अन्यञ्च न जानामि । त्वदुक्तार्थं न जानामि सङ्ख्यां धर्मं वा न जानामि इति विषयविशिष्टाज्ञानस्याऽनुभवसिद्धत्वात् । न च ज्ञानाभावविषय एवायमनुभवः । धर्मिप्रतिपत्त्यप्रतिपत्त्योः ज्ञानाभावप्रतीत्ययोगात् । आद्ये प्रतियोगिसत्वात् । अन्त्ये धर्मिप्रतियोगिज्ञानरूपकारणाभावात् । **ननु** भावरूपाज्ञानस्यापि प्रतियोगिज्ञानाधीननिरूपणत्वेन तत्सत्वे अज्ञानविरोधः । तदसत्वे निर्विषयाज्ञानानुभवः स्यात् । न चैवं दृश्यते इति चेत् । **न** । यद्यन्तःकरणवृत्तिरूपं प्रतियोगिज्ञानं तदा विरोधः । साक्षिरूपं तु ज्ञानं अज्ञानं विषयीकुर्वत्तद्व्यावर्तकतया तद्विषयमपि विषयीकरोति। न च साक्षिणो न बहिस्स्वातन्त्र्यम् । यथा ज्ञाततान्द्वारेण तद्विषयं विषयीकरोति साक्षी एवमज्ञातताद्वारेण तद्विषयमपि विषयीकरोत्येव । तत्र ज्ञाततोत्पत्तौ प्रमाणव्यापारापेक्षा । अज्ञाततायास्त्वनादित्वेनानुत्पन्नत्वात् प्रमाणप्रवृत्तिं विनाऽपि तद्विषयस्य साक्षिभास्यत्वोपपत्तेः । साक्षिणश्चाज्ञानसाधकत्वेन तद्बाधकत्वायोगादिति । अनुमानमपि अज्ञाने प्रमाणम् । तथाहि । विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् पक्षधर्मताबलादनादिभावरूपमज्ञानं सिध्यति । **नन्वत्र** अनात्मज्ञानं पक्षः, उत आत्मज्ञानम् । नाद्यः । वक्ष्यमाणरीत्यानात्मावारकाज्ञानानङ्गीकारेण बाधात् । न द्वितीयः । अनात्मज्ञाने व्यभिचारात् । प्रमाणज्ञानमात्रस्य पक्षत्वे अनुमित्यादौ बाधः । न च विवादगोचरेत्यनेन तद्व्युदासः । प्रमाणज्ञानपदवैयर्थ्यापत्तेः । साध्ये च स्वप्रागभावेत्यादिविशेषणवैय्यर्थ्यम् । स्वमते प्रागभावाभावेन धारावाहिकज्ञानाभावेन च व्यावर्त्याभावात् । स्वनिवर्त्यपदं च नान्धकारव्यावृत्त्यर्थम् । तस्य स्वदेशगतत्वाभावेन तत एव तद्व्युदासात् विषयगताज्ञाततायाः ज्ञातत्वाभावरूपायाः व्यावृत्त्यर्थं तस्यावश्यकत्वात् । न च भावसाध्यस्यावरणस्याभावे असम्भवात् तत एव तद्व्युदासः ।

तत्राहमिति कार्याध्यासेष्वाद्योऽध्यासः...................... वत्। प्रथमोऽध्यास इति अहं मनुष्यः कर्ता भोक्ता ममैते पुत्रबान्धवा इति व्यवहार इत्यर्थः। ननु पूर्वप्रमत्य-भावात् संस्काराभावे तदध्यासस्यासंभव इत्याक्षेपस्य किमुत्तरमित्यत आह—नैसर्गिक इति इति। अध्यासे पूर्वानुभवजन्यसंस्कारमात्रमपेक्ष्यते लाघवात्। न पूर्वप्रमाजन्य-संस्कारः गौरवात्। तथा च पूर्वपूर्वबुद्ध्याद्यध्यासात् संस्काराध्यासः। ततः तदुत्तरो-त्तरबुद्ध्याद्यध्यास इत्यनादित्वादनवद्यः। अयं लोकव्यवहार इति प्रमाणोपन्यासः। अहं इदं ममेदमिति स्वरूपकथनम्। अध्यासस्य लक्षणमाह—अन्योन्यस्मिन्निति। अनेन ऐक्यता अध्यासस्य लक्षणमुक्तम्। अन्योन्यस्मिन्नन्योन्यात्मकतावभासोऽध्यास इत्यर्थः।

---

प्रागभावेऽपि तस्य तुल्यत्वेन तत एव तद्व्युदासात् स्वप्रागभावव्यतिरिक्तेत्यस्य वैय्यर्थ्यात्। यदि स्वविषये नास्ति न प्रकाशत इति व्यवहारहेतुत्वं आवरणं भावस्यापि सम्भवतीति मतम् तत्प्रकृतेऽपि तुल्यम्। तस्मात् अन्धकारस्य स्वदेशगतत्वाभावादेव वारणे स्वनिवर्त्यपदं व्यर्थमेव। न च नास्ति न प्रकाशत इति व्यवहारहेत्वदृष्टपूर्वकत्वेनाऽर्थान्तरव्यावृत्त्यर्थं तत्, तस्य प्रकाशत इत्यादि व्यवहारमात्रनिवर्त्यत्वेन स्वनिवर्त्यत्वाभावादिति वाच्यम्। तथाऽपि पूर्वदोषानतिवृत्तेः। वस्त्वन्तरपदं च सर्वसाधारण्यात् व्यर्थमिति। अत्रोच्यते। विवाद-गोचरेत्यनेनोक्तधर्मिविशेषस्पष्टीकरणार्थं प्रमाणज्ञानपदं प्रत्यक्षप्रमाणज्ञानपरम्। अनात्मज्ञानमपि आत्मपर्यन्तमेव। सर्वज्ञानानां तत्तदवच्छिन्नचैतन्याज्ञाननिवर्तकत्वेन प्रामाण्यात् नाऽनात्म-ज्ञानांशे बाधः। व्यभिचारो वा। न च व्यर्थविशेषणता। अस्मिन्मते अज्ञानस्य श्रुतिसाक्षिसिद्धत्वेन अनुमानानपेक्षणात्। विप्रतिपन्नं परं प्रत्येव तस्यार्थवत्वात्। तन्मते च व्यावर्त्यप्रसिद्धिरस्त्येव। एवं च प्रागभाव--धारावाहिकपूर्वज्ञान—नास्तिं न प्रकाशत इति व्यवहारहेत्वदृष्ट—विषयगतज्ञातत्वाभावपूर्वकत्वेनार्थान्तरव्यावृत्त्यर्थं क्रमेण विशेषणानि। न चैवमप्यज्ञानविषयत्वरूपाज्ञातत्वपूर्वकत्वेन अर्थान्तरशङ्का, विशेषणत्वेनाप्यज्ञानसिद्धेः अर्थान्तरत्वा-भावादिति। वस्त्वन्तरपदं यद्यपि साधारण्यादव्यावर्तकं तथाऽपि शब्दाधिक्यात् अर्थाधिक्यमिति भ्रान्तिज्ञानव्यतिरिक्तपरं तद्व्यावृत्त्यर्थम्। एवं च यथाश्रुतानुमानस्य सुस्थत्वे साध्यपृथक्करणादिक्लेशो न युक्त इति। ननु तथाऽपि स्वप्रागभावेति व्यर्थमेव, परमते स्वस्य स्वप्रागभावनिवृत्तिरूपत्वेन स्वजन्यनिवृत्तिप्रतियोगित्वरूपस्वनिवर्त्यत्वाभावादेव तद्व्युदास-संभवादिति चेत्। न। स्वस्येव स्वध्वंसस्याऽपि प्रागभावनिवृत्तित्वेन स्वजन्य-निवृत्तिप्रतियोगित्वरूपस्वनिवर्त्यत्वस्यापि सत्वात्। ननु तथापि हेतौ प्रकाशत्वं यदि प्रकाशकर्तृत्वं तदा असिद्धिः। साधनवैकल्यं च। नापि प्रकाशकरणत्वम्। प्रकाश-

धर्म्यध्यासे सति विनिमयेन धर्माध्यासस्यावर्जनीयतया सोऽपि सिध्यतीत्याह —अन्योन्यधर्मांश्चेति। धर्माध्यासस्य पृथक् ग्रहणन्तु धर्म्यध्यासास्पष्टत्वेऽपि अन्धो बधिर इति आन्ध्यबाधिर्यादिधर्माध्यासदर्शनादिति मन्तव्यम्। ऐक्याध्यासे कारणविशेष-माह–इतरेतराविवेकेनेति। अविवेको भेदाग्रहः। घटो द्रव्यमिति प्रमायामतिव्याप्तिवारणाय —विविक्तयोरिति। सोऽयं देवदत्त इति प्रत्यभिज्ञायामतिव्याप्तिवारणाय—अत्यन्तेति। तदेतद्देशकालविशिष्टत्वेन विविक्तत्वेऽपि स्वरूपतो विविक्तत्वाभावान्न तत्रातिव्याप्तिरिति

---

स्यात्मस्वरूपत्वेनासिद्धितादवस्थ्यात्। प्रदीपप्रभायाः प्रकाशस्वरूपत्वेन तत्करणत्वाभावेन साधनवैकल्याच्चेति चेत्। न! प्रकाशशब्देन द्वयमुच्यते। तमोनिवृत्तिलक्षणः, अज्ञाननिवृत्तिलक्षणः प्रकाशश्चेति तत्र करणत्वादित्यर्थः। तथा च नासिद्धि-वैकल्ये इति।

अर्थापत्तिरप्यज्ञाने प्रमाणं द्विविधो ह्यध्यासो मिथ्यार्थरूपः तज्ज्ञानरूपश्च। यद्यपि ज्ञानस्य न स्वरूपतो मिथ्यात्वम्। तथाऽपि मिथ्याविषयरूषितत्वेन मिथ्यात्वमस्त्येव। एवं च मिथ्यार्थतदवभासरूपाध्यासस्य मिथ्याभूतं उपादानं एष्टव्यम्। सत्योपादानत्वे सत्यत्वप्रसङ्गात् तस्यापि कार्यत्वे उपादानान्तरकल्पनाप्रसङ्गाल्लाघवादनादिभावरूपमज्ञानं सिद्ध्यति। न चालीकस्योपादानत्वम्। तस्य निःस्वरूपत्वेन कारणत्वस्यैवा-भावेनोपादानत्वाभावात् भावरूपं ज्ञाननिवर्त्यमज्ञानं सिद्ध्यति। 'अजामेकां' इत्यादिः आगमो भूयान्वर्तत इत्यलं अतिप्रसङ्गेन। ननु त्वदुक्तमर्थं न जानामीत्यज्ञाने प्रत्यक्षं प्रमाणं इति वदतामनात्मविषयमज्ञानमुक्तम्। तन्नोपपद्यते। अनात्मनोऽज्ञानविषयत्वानु-पपत्तेः। येन यत्रातिशय उत्पद्यते स तस्य विषयः। न चानात्मन्यज्ञानजनितावरण-लक्षणातिशयः संभवति। तत्र प्रमाणाभावात्। न तावत् प्रत्यक्षं प्रमाणं; अवगते नीलार्थे आवरणमेव नास्ति। कुतः तस्य प्रत्यक्षत्वम्। अनवगते नीलार्थे कस्यावरणं प्रत्यक्षेणावगम्यते। इदानीमवगतत्वात् पूर्वं अनवगतिः आवृतत्वमनुमीयत इति चेत्। किमिदानीमवगतत्वमात्रं हेतुः, उतेदानीमेवावगतत्वम्? नाद्यः। धारावाहिकस्थले पूर्वमवगतस्याऽपि इदानीमवगतत्वव्यभिचारः। न द्वितीयः। इदानीमेवावगतत्वं नाम पूर्वमनवगतत्वे सतीदानीमवगतत्वम्। न चैतत् साध्यसिद्धिं विना ग्रहीतुं शक्यते इत्य-सिद्धो हेतुः। न च कालद्वयावगाहिप्रत्यभिज्ञान्यथानुपपत्त्या मध्ये अनवगतिः अवगम्यते, मध्ये अवगतिसत्त्वे तत्कालावगाहिन्यपि प्रत्यभिज्ञानं स्यादिति युक्तम्। अवगतेऽपि प्रत्यभि-

मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदं' ममेदं' इति नैसर्गिकोऽयं लोकव्यवहारः ।

---

भावः। धर्मोऽहङ्कारादिः अधिष्ठानतन्त्रत्वात् धर्मी प्रत्यगात्मा स्वतस्सिद्धत्वात्। तयोः धर्मधर्मिणोः अहङ्कारात्मनोरित्यर्थः। अध्यासं प्रति साधारणकारणमाह-मिथ्येति। मिथ्या च तदज्ञानं च मिथ्याज्ञानम्। भावरूपमज्ञानं निमित्तं असाधारणकारणं यस्य यस्य सः तथा। नन्वहङ्कारात्मनोः उभयोः स्वतस्सिद्धत्वे अहङ्कारादेर्ज्ञाननिवर्त्यत्वा-संभवेन ज्ञानफलशास्त्रानर्थक्यं स्यात्। अध्यस्तत्वे पुनः तयोरितरेतरज्ञानबाध्यत्वेन शून्यवादप्रसङ्गः इत्यत आह—सत्यानृते इति। सत्यं अनिदं चैतन्यं कल्पितसर्वद्वैत-बाधेऽप्यबाधितस्वरूपत्वात् सर्वविकल्पाधिष्ठानत्वाच्च तस्य संसृष्टवेषेणाध्यस्तत्वे-ऽपि स्वरूपेणानध्यस्तत्वात्। अनृतं अहङ्कारादि स्वरूपेणाप्यध्यस्तत्वात्। तथा च कल्पिताहङ्कारादिबन्धस्य तदधिष्ठानब्रह्मात्मज्ञानबाधितत्वात्। अहङ्काराद्यधिष्ठानस्य तु ब्रह्मात्मनः ज्ञानान्मुक्तबन्धस्य सदैव सत्वान्न शून्यवादप्रसङ्ग इति भावः।

---

ज्ञानियमाभावात्। अत एव पूर्वकालविशिष्टस्मृत्यनुभावात् उत्तरकाले अनवगतिः कल्प्यते अन्यथा उत्तरकालविशिष्टावगाहिन्यपि स्मृतिः स्यादिति निरस्तम्। अनुभूते स्मृतिनियमा-भावादिति। अत्रोच्यते। आवरणानाधानेऽपि विक्षेपाधायकत्वेन तद्विषयत्वोपपत्तेः। विक्षेपस्य च भ्रान्तिसामान्यांशसङ्घटिततया भ्रान्तिज्ञानेनैव सिद्धत्वात् नावरणपक्षोक्तदोषप्रसङ्गः। ननु अनात्मावरणमन्तरेण तत्र विक्षेपोऽपि कथमिति चेत्। न। तदवच्छिन्नचैतन्या-वरणादेव तत्र विक्षेपोपपत्तेः प्रत्यगात्मनि तु चित्स्वभावत्वात् भानप्रसक्तावज्ञानप्रयुक्तावरणादेव आत्मतत्वानवभासः। नन्वात्मन्यावरणं दुर्निरूपम्। तद्धि स्वरूपप्रकाशलोपो वा। तस्य विषयावभासप्रतिबन्धो वा। विषयप्रकाशे सहकारिसापेक्षत्वं वा। नाद्यः। 'न हि द्रष्टुः दृष्टेर्विपरिलोपो विद्यत' इत्यादिश्रुत्या तस्य नित्यत्वावगमात्। नेतरौ, स्वरूपस्यैव विषयाव-भासत्वेन तत्र प्रतिबन्धस्य सहकारिप्रतिज्ञायाश्चासंभवादिति चेत्। न। आत्मन्यस्ति प्रकाशते इत्यादिव्यवहारस्य पुष्कलकारणे चिद्रूपत्वादौ सत्यपि नास्ति न प्रकाशत इति योऽयमात्मतत्वा-लम्बनो व्यवहारः स भावरूपेण केनचिदावरणमन्तरेण नोपपद्यत इति व्यवहारलक्षण-कार्यदर्शनाद्यन्नास्ति न प्रकाशत इति व्यवहारयोग्यत्वं तदेवावरणम्। तच्च युक्त्यसहकृतमप्यनुभव-सिद्धत्वान्निह्नोतुमशक्यम्। न चाग्रहणमेवावारकं विक्षेपकं वा किं न स्यादिति वाच्यम्।

वस्तुतस्तु अन्योन्यस्मिन्नन्योन्यात्मकतामध्यस्येत्यस्य व्याख्यानं सत्यानृते मिथुनीकृत्येति। यथाश्रुते अधिष्ठानांशो न सिद्ध्यति। तथाहि— अन्यश्चान्यश्चायोर्म्यौ तयोस्समाहारः अन्योन्यम्। तस्मिन्निति द्वे अधिष्ठाने प्रतीयेते युष्मदस्मदर्थौ। तत्रास्मदर्थे प्रत्यगात्मनि युष्मदर्थस्याहंकारादेः कालत्रयेऽप्यसत्वात् अन्योन्यस्मिन्नित्यनर्थकं स्यात्; ततो विशिनष्टि—सत्यानृते इति। परमार्थतोऽहङ्काराद्यभावेऽपि अनाद्यविद्याध्यासितस्य संभवादधिष्ठानद्वयसिद्धिः। मिथुनीकृत्य, युगलीकृत्य द्वे अधिष्ठाने सम्पाद्यान्योन्यात्मकतामध्यस्येत्यन्वयः। एवंविधाध्यासस्य अनादिपरंपराप्रापितं तत्कर्तुः अनादित्वं च सूचयति ल्यपेति न विरोधः। मिथुनीकृत्यध्यस्येतिलक्षणसिद्धिः। इतरेतराविवेकेनेत्याद्यवशिष्टं सम्भावनापरमित्यनवद्यम्। अथवा

---

विपरीतकार्योपादानत्वस्यानादिभावरूपाज्ञान एव संभवात्। तथाहि— सुषुप्त्यादिकाले ब्रह्मस्वरूपानवभासः किंप्रयुक्तः, भेदप्रयुक्तः अग्रहणप्रयुक्तो वा, मिथ्याज्ञानप्रयुक्तो वा। तत्संस्कारप्रयुक्तो वा, कर्मप्रयुक्तो वा, अखण्डतः प्रयुक्तो वा। नाद्यः। जीवब्रह्मणोः अभेदप्रतिपादकश्रुतिविरोधात्। न द्वितीयः। स्वरूपग्रहणस्य नित्यत्वेन तदभावानुपपत्तेः। कदाचिदाचिद्ग्रहणाभावस्य जीवस्य स्वरूपावभासाविरोधित्वात् ब्रह्मरूपावभासाविरोधित्वात्। नाऽपि मिथ्याज्ञानप्रयुक्तः। तस्य सुषुप्तावभावात्। नापि तत्संस्कारप्रयुक्तः भ्रान्तिसंस्कारस्य तत्वावभासाविरोधित्वात् रजतभ्रमसंस्कारे सत्यपि शुक्तिज्ञानोदयात्। कर्मणः स्वरूपावभासप्रतिबन्धकत्वे साक्षिस्वरूपस्याप्यनवभासप्रसङ्गात्। मन्मते त्वज्ञानस्य साक्षिभास्यत्वेन तदनावारकत्वं; कर्मणस्तु फलानुपपत्तिगम्यत्वेन साक्षिभास्यत्वाभावात्तदावारकत्वं स्यादेव। सति चावारकत्वे अहमिति प्रतिभानमेव न स्यात्। नाऽपि 'ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत' इति स्मरणात् अखण्डं द्रव्यान्तरमावारकं तस्य नित्यत्वे अनिर्मोक्षः। अनित्यत्वेऽपि कर्मनिवर्त्यत्वे प्रमाणाभावात्। ज्ञाननिवर्त्यत्वे चाज्ञानत्वादस्मदिष्टसिद्धिः। तस्मादज्ञानस्योपादानत्वादितरेतराविवेकेन मिथ्याभूतैकताप्त्या भ्रमाहितसंस्काररूपनिमित्तकारणसत्वादहं ममेदमित्याद्यध्यासविधिः।

भेदाभेदवादी तु अहं मानुष इत्यादि भ्रान्तिज्ञानादन्यदज्ञानं नास्तीत्याह। तन्न। तन्मते तस्य भ्रान्तित्वासिद्धेः अहं मनुष्य इति न भ्रमः भेदाभेदविषयत्वात् खण्डो गौरिति प्रत्ययवत्। नन्वयं भ्रमः नाहं मनुष्य इति निषिध्यमानविषयत्वात् नेदं रजतमिति निषिध्यमानविषयरजतज्ञानवदिति चेत्; तत्र वक्तव्यम्। किं निषिध्यमानविषयत्वमात्रं हेतुः। उत प्रतिपन्नोपाधौ निषिध्यमानविषयत्वम्। आद्ये तु नायं खण्डगौः किन्तु मुण्डो गौरिति निषिध्यमानविषये व्यभिचारात्। अस्तु तर्हि द्वितीयः कल्पः। यथा इदं प्रतिपन्नं रजतं तत्रैव निषिध्यते

लोको जीवः। "लोकस्तु भुवने जने" इति प्रयोगात्। तस्य व्यवहारः तत्कर्तृको व्यवहार इति यावत्। तत्र व्यवह्रियत इति व्यवहारोऽर्थः। व्यवहरणं व्यवहारः ज्ञानं शब्दाभिलापश्च। लोककर्तृको यो द्विविधो व्यवहारः सर्वलोकप्रत्यक्षः, स चोक्ताध्यासलक्षणः। तत्र व्यवहारः इति लक्ष्यनिर्देशः। अन्योन्यस्मिन्नित्यादि लक्षणनिर्देशः; तथा च लक्षणसंभावनासद्भावप्रमाणैः अध्यासे सिद्धे अधिकार्याद्यनुबन्धचतुष्टयसंभवादिदं शास्त्रमारब्धव्यमेवेति सिद्धान्ताभिप्रायः।

---

नेदं रजतमिति यथा आत्मनि प्रतिपन्नं मनुष्यत्वं तस्मिन्नेव निषिध्यत इति तस्य भ्रान्तित्वं, खण्डो गौरित्यस्य तु तद्वैपरीत्यात् न भ्रान्तित्वमिति चेन्न। अस्यापि हेतोः तत्र व्यभिचारात्। न च गोत्वोपाधौ प्रतिपन्नस्य खण्डस्य न तत्र निषेधः, किन्तु मुण्ड इति न व्यभिचार इति वाच्यम्। नायं खण्ड इति खण्डस्य किं केवलमुण्डे निषेधः उत गोत्वोपहिते। नाद्यः। अप्रसक्तेः। इह भूतले घटो नेत्यत्र अन्यत्र भूतलघटसंसृष्टतया प्रतिपन्नस्य स्मर्यमाणस्यान्यत्र निषेधो दृष्टः। न च खण्डः कदाचिन्मुण्डे प्रसक्तः कथं निषिध्येत। द्वितीये गोत्वोपहितमुण्डे खण्डस्य निषेधसमये विशेषणीभूतगोत्वे निषेधः समाश्रितः स्यात। यथा इदमि प्रतिपन्नं इदंत्वोपहितशुक्तिव्यक्तौ निषिध्यते तद्वत्। तस्मात् खण्डमुण्डाभ्यां गोत्वस्याभेदप्रत्ययवत् शरीरब्रह्मभ्यां जीवस्याभेदप्रत्ययस्यापि प्रामाण्यं स्यात्। न च स्थापनानुमाने अनुच्छिन्नव्यवहारत्वं उपाधिः। नायं खण्डो गौरिति निषेधे सत्यपि खण्डो गौरिति व्यवहारस्य व्यक्त्यन्तरे अनुच्छेदादिति वाच्यम्। तव मते मोक्षकालेऽपि सर्वस्य सत्वेनाऽनुच्छिन्नव्यवहारत्वेन साधनव्यापकत्वात साक्षात्कारानन्तरकालमपि प्रारब्धानुरोधेनाऽहं मनुष्य इति व्यवहारदृष्टेश्च।

किं च तव मते भ्रान्तिः किं अन्तःकरणपरिणामः उतात्मपरिणामः। नाद्यः। आत्मनो नित्यमुक्तत्वप्रसङ्गात्। नान्त्यः। आत्मनो निरवयवत्वेन परिणामायोग्यत्वात। अतोऽनादिभावरूपाज्ञानानङ्गीकारे तस्य भ्रान्त्यसिद्धिरित्यलमतिप्रसङ्गेन।

अहमिति तावत् प्रथमोऽध्यासः। नन्वहमिति कथमध्यासः द्व्याकारानवभासात्। रजतादिभ्रमे तथा दृष्टत्वादिति चेत्। न। दुःखित्वप्रेमास्पदत्वादिनेहापि द्व्याकारावभासस्याहंकारटीकायां वक्ष्यमाणत्वात। नन्वन्तःकरणादेः केवलसाक्षिभास्यत्वादत्रैव समवनीयन्त इति ज्ञानानिवर्त्यत्वावगमात आत्मनोऽन्यत्र पृथगुपलब्ध्यभावाच्च स्वरूपेण संसृष्टरूपेण च कल्पितत्वमस्तु। शरीरं पुनः इन्द्रियैः इदंबुद्धिगृहीतत्वात् उत्क्रान्तेऽप्यात्मनि पृथगुपलब्धेः ज्ञानानिवर्त्य-

आह कोऽयमध्यासो नामेति। उच्यते। स्मृतिरूपः परत्र पूर्वदृष्टावभासः। तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति।

---

एवं विषयप्रयोजनादिसिद्धिहेतुमध्यासं सङ्ग्रहेण प्रसाध्य तमेव विस्तरेण लक्षणादिभिः प्रपञ्चयितुमादौ लक्षणं पृच्छति—आहेति। तत्वनिर्णये वादकथायाः प्राधान्याच्छिष्यः पृच्छतीत्यर्थः। अथवा सत्यानृते मिथुनीकृत्येत्यत्राऽऽहङ्कारादेः अनृतत्वोक्त्या शुक्तिरजतादिवत्स्वरूपेणाध्यस्तत्वमुक्तम्। अतः तत्साधारणलक्षणं पृच्छति—आह कोऽयमिति। स्वरूपाध्यासे ज्ञाते ह्यन्योन्याध्यासो ज्ञातः स्यादिति। यद्वा अहङ्कारस्वरूपाध्यास एव न सिद्ध्यति, वादिविप्रतिपत्तेरित्याक्षिपति—आह कोऽयमिति।

---

त्वावगमात् कथं कल्पितमिति चेत् न। विमतं कल्पितम् कल्पितोपकरणत्वात् इन्द्रजाल-निर्मितस्य राज्ये राज्योपकरणवत् इत्यनुमानात्तत्सिद्धेः। केवलसाक्षिवेद्यत्वप्रयोजकं ज्ञाननिवर्त्य-त्वमेव। शरीरस्याप्युत्क्रान्तेऽप्यात्मनि परमात्मनः सर्वव्यापित्वात् नात्मनोऽन्यत्रोपलब्धिः। अतोऽविद्यात्मकत्वात् प्रपञ्चस्य ब्रह्मात्मत्वरूपविषयस्यानर्थनिवृत्तिलक्षणप्रयोजनस्य च सम्भवाच्छास्त्र-मारम्भणीयम्।

नन्वेतावतैव विचारशास्त्रारम्भसिद्धौ सूत्रार्थ एव वर्ण्यताम्। किमाह कोऽयमित्यादि-सर्वलोकप्रत्यक्ष इत्यन्तभाष्येण। अध्यासलक्षणसम्भावनाप्रमाणप्रतिपादनार्थमिति चेत्। तथापि प्रमाणनिरूपणेनैवाऽसाधारणधर्मविशिष्टस्य संभावितत्वस्य सिद्धेर्लक्षणसम्भावनाभाष्ये व्यर्थे इति चेत्; न, प्रमाणं ह्यन्यस्य अन्यात्मनावभासस्वरूपं विषयीकरोति। न तस्य मिथ्यात्वं अध्यासत्वं वा। तत्तु बाधानुपपत्तिगम्यम्। अत्र च प्रत्यक्षबाधाभावात् बाधितशुक्तिरजतादि-लक्षणानुगत्या तदनुमेयं, तदर्थं लक्षणकथनं; प्रमाणविषयस्यापि प्रासादनिगरणादेस्संभावनया-पवाददर्शनात् तन्निरासार्था संभावनापि पृथग्वर्णनीयेति सर्वमर्थवत्। तत्रापि स्वरूपपरत्वाल्लक्षणं प्रथममुच्यते। स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यासः।

परत्र स्वाधिकरणताऽयोग्येऽधिष्ठाने भास्यमानो यः परः। सोऽध्यासस्य स्वरूपलक्षणम्। साधनाद्यज्ञानाध्याससामान्यलक्षणं वा। स्मृतिरूपत्वं च ज्ञानार्थाध्याससाधारणलक्षणम्। स्मर्यत इति स्मृतिः। स्मृतेः रूपमिव रूपमस्य स्मर्यमाणसदृश इति यावत्। तत्सादृश्यं च संस्कारजन्य-

न कोऽप्यध्यासस्सिध्यतीत्यर्थः। विप्रतिपत्तिं परिहरिष्यन्नुत्तरं वक्तुं प्रतिजानीते— उच्यत इति। आहेत्यारभ्य कथं पुनः प्रत्यगात्मनीत्यतः प्राक् अध्यासलक्षणपरं भाष्यम्। तदारभ्य संभवनासद्भावपरम्। तमेतमविद्याख्यमित्यारभ्य सर्वलोकप्रत्यक्ष इत्यन्तं प्रमाणपरमिति विभागः। लक्षणमाह—स्मृतिरूप इति। अत्र प्रक्रान्तमध्यासपदवाच्यं लक्ष्यम्। परत्र परावभासत्वं लक्षणम्। परत्रेत्युक्त्या परस्येति लभ्यते। अत्र परत्रेत्यारोप्यात्यन्ताभावाधिकरणं विवक्षितम्। गन्धप्रागभाववति भूतले गन्धस्याव-भासमानत्वेन तस्याप्यध्यस्तत्वं स्यात्। अत उक्तं अत्यन्ताभावेति। अन्यथा भूतले घट इति प्रमायामतिव्याप्तिस्स्यात्। इत्थं च एकदेशकालावच्छेदेन स्वात्यन्ताभावाधिकरणे भासमानत्वम्। संयोगेऽतिव्याप्तिवारणाय—एकदेशेति। कालान्तरेऽवभासमान-घटादावतिव्याप्तिवारणाय एककालेति।

नन्वेकस्मिन्देशे काले च यदि वस्तुनो भानं तदा तत्र तदत्यन्ताभावानुपपत्तिः तदत्यन्तभावसत्वे तस्य भानानुपपत्तिः। एकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववत्यव-भासमानत्वमध्यासत्वमिति केचिदाहुः तत्राऽपि संसर्गसत्वे स्वात्यन्ताभावानुपपत्तिः। स्वात्यन्ताभावसत्वे स्वसंसर्गानुपपत्तिः इत्ययमेव दोषः। तस्मात्परत्र परावभासः इत्यस्य नैवं व्याख्यानं समञ्जसम्। वस्तुतस्तु परत्रपदेनाज्ञातविशेषमधिष्ठानं गृह्यते। तत्रावभासमानत्वमध्यस्तत्वम्। प्रमायामतिव्याप्तिवारणायाज्ञातेति। असम्भववारणाय विशेषपदम्। अर्थाध्यासपक्षेऽवभास्यत्वं। ज्ञानाध्यासपक्षेऽवभासत्वमिति विवेकः। शुक्ताविदं रजतं इत्यत्र हि इदमिति सामान्यतो ज्ञाते शुक्तित्वेन विशेषेणाज्ञाते रजतमव-भासते। तत्र हि शुक्तिविशेषाज्ञानं दोषः। अधिष्ठानेन्द्रियसन्निकर्षः संप्रयोगः। चाकचक्यादिकं सादृश्यम्। चाकचक्यावच्छेदेन पूर्वरजतानुभवजन्यसंस्कारश्च कारणं प्रसिद्धम्। तत्र संस्कारद्वारा पूर्वदर्शनमध्यासे कारणमिति दर्शयति--पूर्वदृष्टेति। शाब्दानु-भवजन्यस्मृतौ अतिव्याप्तिं वारयति—स्मृतिरूप इति। अर्थाध्यासपक्षे स्मर्यमाणस्य रूप-मिव रूपं यस्य स स्मृतिरूपः। ज्ञानाध्यासपक्षे स्मृतेरूपमिव रूपं यस्य स तथा। एवं अहङ्काराद्यध्यासेऽपि सत्यज्ञानानन्दादिविशेषेणाज्ञानं दोषः। अहमिति प्रत्यगात्मप्रसिद्धिः

---

ज्ञानविषयत्वम्। सादृश्योक्त्या वैसादृश्यमपि प्रतीयते। अन्यथा अभेदप्रसङ्गात्। तच्च संप्रयोगजन्यज्ञानविषयत्वं, तस्याऽध्यासत्वार्थं दोषजन्यत्वमपि प्रवेश्यम्। तथा च दोष—संस्कारसंप्रयोगजन्यज्ञानविषयत्वमर्थाध्यासस्य तटस्थलक्षणं साद्यध्यासलक्षणं वा; तादृशज्ञानत्वं ज्ञानाध्यासस्य तटस्थलक्षणं वा विशेषलक्षणं वा। ननु भावे अकर्तरि च कारके संज्ञाया—मिति सूत्राद्भावे कर्तृव्यतिरिक्तकारके च संज्ञायामेव घञादिविधानात् कथमसंज्ञायां कर्मणि

केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति। अन्ये तु

---

संप्रयोगः। पूर्वपूर्वाध्यस्ताहङ्काराद्यभिव्यक्तचिद्भास्यत्वरूपसादृश्यमुत्तरोत्तरमध्यस्यमानाहङ्कारादावस्ति, पूर्वपूर्वाध्यस्ताहङ्काराहितसंस्कारश्च उत्तरोत्तराहङ्काराध्यासे कारणमस्तीति स्मृतिरूपः परत्र पूर्वदृष्टावभासः इति भगवद्भाष्योक्तलक्षणमनवद्यम्। वादिविप्रतिपत्तिं परिहर्तुमादौ तावदन्यथाख्यातिवादिनां आत्मख्यातिवादिनां च मतमनुवदति—तं केचिदिति। अन्यत्र शुक्त्यादौ। अन्यश्चासौ धर्मश्चेति विग्रहः। तस्य रजतरूपस्याधिष्ठानतन्त्रत्वाद्धर्मस्यात्रभासः इत्यन्यथाख्यातिवादिनो वदन्तीति योजना। तत्र नवीनास्तु अन्यत्र शुक्तिरूपाधिष्ठाने रजत्वात्यन्ताभाववति रजतत्वमेवाध्यस्यत इति इदंविशेष्यकरजतत्वप्रकारकप्रतीतिबलादाहुः। तस्मिन्पक्षे धर्मिणमतिक्रम्य धर्मस्यान्यत्र भानानुपपत्तेः इदमभिन्नतया रजतरूपधर्म्यंशेऽपि तत्र भासत इति तु तत्प्राचीनाः। आस्तां तावत्तदुभयेषां विवादः। अन्यथाख्यातौ तु न सन्देहः। आत्मख्यातिवादिनस्तु बौद्धैकदेशिबाह्यास्तित्ववादिनः। अन्यत्र बाह्ये शुक्त्यादौ अन्यधर्मस्यात्मधर्मस्य रजतस्यावभासः इति वदन्तीत्यन्वयः। अख्यातिमतमनुवदति—केचित्त्विति। अयमर्थः। शुक्तिकायां इदं रजतमित्यत्र हीदमंशे सन्निकर्षजन्यत्वात्प्रत्यक्षं, रजतांशे स्मरणं संस्कारजन्यत्वात्। एवं च गृह्यमाणस्मर्यमाणयोश्शुक्तिरजतयोः तद्विषयकयोः ग्रहणस्मरणयोश्च योऽयं भेदः प्रसिद्धः तदग्रहणनिमित्तको विशिष्टव्यवहार इति। तेषामपि मते

---

घञ्प्रत्ययो व्युत्पाद्यत इति चेत्; न, को भवता दायो दत्तः को भवता लाभो लब्धः, पाकस्त्यागो भाग इत्यसंज्ञायामपि प्रयोगदर्शनात् प्रयोगमूलत्वाद्व्याकरणस्य। कर्तरि चेति चकारेणाऽनुक्तसमुच्चयार्थेन तत्सूचनसम्भवात्। स्वरूपलक्षणे स्वाधिकरणताऽयोग्येऽवभास इत्युक्ते रजताधिकरणताऽयोग्ये पुरोवर्तिनि शुक्तिप्रतिभासस्यापि तथात्वं स्यात्; तत उभयमुपात्तम्। तटस्थलक्षणे दोषजन्यत्वमित्युक्ते तद्ध्वंसेऽतिप्रसङ्गः। तदर्थं संस्कारजन्यत्वं; तावत्युक्ते स्मृतावतिप्रसङ्गः तदर्थं दोषजन्यत्वं; संस्कारस्थाने संप्रयोगजन्यत्वं प्रवेश्य लक्षणान्तरमिति द्रष्टव्यम्। पूर्वदृष्टावभास इति स्मृतिरूपत्वोपादानार्थम्।

ननु संस्कारजन्यत्वमभ्युपगतं चेद्रूपशब्दः उपमासमासश्च व्यर्थः, स्मृतिरेव किं न स्यात्। इदमित्येकं ग्रहणं, रजतमिति स्मरणम्। उभयोश्च विवेकाग्रहादिदं रजततया

पुरोवर्तिनि रजतार्थिप्रवृत्त्यन्यथानुपपत्त्या पुरोवर्तिरजतविशेष्यकरजतत्वप्रकारकविशिष्ट-ज्ञानमवश्यं वक्तव्यम्। असत्ख्यातिमतमनुवदति— अन्येत्विति। यत्र शुक्त्यादौ यस्य रजतादेः अध्यासः प्रसिद्धः। तस्यैवाधिष्ठानस्य विपरीतधर्मत्वं रजतात्मकत्व-कल्पनामाचक्षते। शुक्तिसत्तातिरिक्तसत्ताशून्यं शून्यस्थरजतं भासत इति वदन्तीत्यर्थः। सर्वत्र पक्षे अधिष्ठानविशेषे ज्ञाते सत्यन्यस्य तत्र भानानुपपत्तेः उक्ताज्ञाने सत्येव भान-दर्शनादज्ञानमेव महादोषः। तथा च तस्मिन्सति तत्र भासमानं रजतं किं तदज्ञानो-

---

जानामीति व्यवहारः। गृह्यमाणस्मर्यमाणयोः दोषवशात् स्मरणाभिमानप्रमोषाच्च विविच्यग्रहणम्। यद्यपि ज्ञानयोर्युगपदुत्पत्त्यसंभवात् इदंज्ञानस्य रजतज्ञानस्य वा केवलस्याऽप्रवर्तकत्वा-द्रजतज्ञानव्यवहितस्येदंज्ञानस्य प्रवर्तकत्वं न संभवति। तथापीदंज्ञानाव्यवहितोत्तरोत्पत्तिकस्य प्रवर्तकत्वम्। बालस्य तिक्तो गुडः इति ज्ञानं जन्मान्तरानुभूततिक्ततासंस्कारजन्या स्मृतिः। न च जन्मान्तरानुभूतस्मरणेऽतिप्रसङ्गः। फलबलेन कस्यचिदेव संस्कारस्योद्बोध-कल्पनात्। अन्यथा तवाऽपि स्तन्यपानादिप्रवृत्त्यनुपपत्तेरिति। अत्रोच्यते। किं सत्यविशिष्टज्ञानात्स्वरूपतो वैषम्यानुभवादेवं कल्प्यते, उत नेदं रजतं इत्यर्थाभावनिश्चयात्। नाद्यः सत्यस्थले यथा सामान्यविशेषौ सम्बद्धाववभासेते तथैव इहावभासनात्। तन्न विशिष्टज्ञानाभावः शक्यः कल्पयितुम्। न द्वितीयः, प्राथमिकनिरपेक्षरजतज्ञानबलेन नेदं रजतमित्यस्यैव विशिष्टज्ञानत्वासिद्धिप्रसङ्गात्। तस्मादिदं रजतमिति प्रत्ययानुरोधात् बाधकज्ञाननिरसनयोग्यं प्रतिभाससमानकालीनं मिथ्यारजतमङ्गीकर्तव्यम्। बाधकप्रत्ययानुरोधाच्च त्रैकालिकरजताभावः। तथा चानुभवः—नास्त्यत्र रजतं मिथ्यैव रजतमभादिति।

न प्रतिभासिकरजताङ्गीकारे कथं त्रैकालिकरजताभावः। तस्मिन्सति वा कथं प्रति-भासिकरजतं, प्रतियोगिसत्वस्याभावविरोधित्वादिति चेत्, न। लौकिकपरमार्थरजतस्यैव प्रति-योगित्वात्। तर्हि नेदं रजतमित्यस्य प्रातिभासिकरजतविरोध्यनवगाहित्वेन बाधकत्वं न स्यात् इति चेत्। इष्टापत्तेः, भिन्नविषयत्वात्। नेदं रजतं वस्तु सदिति पारमार्थिकत्वेनैव रजत-भ्रमेण प्रसक्तस्य प्रतियोगितावच्छेदकांशे विरोध्यवगाहित्वेन बाधकत्वोपपत्तेः। अथवा शुक्तितत्वज्ञानमेव रजतविरोधि विशेषान्तरावगाहित्वात् बाधकं; विरोधित्वं च तस्य प्रतिभासतो न स्वरूपतः यतः पुरोवर्तिनि विशेषद्वयस्याप्यङ्गीकारात् प्रतिभासश्चैकस्मिन्काले शुक्तिरजतयोः न सम्भवति। तथा अननुभवात्। किञ्च त्वन्मते सर्वज्ञानानां यथार्थत्वाद्भ्रान्तिप्रसिध्यनु-

पादानकम्। किं वा तदन्योपादानकमिति विशये अन्यस्य तदुपादानस्य मनसाप्या- लोचयितुमशक्यत्वात् तदज्ञानमेव तदुपादानं सर्वैरकामेनाप्यङ्गीकर्तव्यम्। किञ्च नेदं रजतं किन्तु शुक्तिः, नायं सर्पः किन्तु रज्जुः इत्यधिष्ठानविशेषज्ञानबाध्यत्वं आरोपितस्य सर्वैरप्यनुभूयते। तथा चाज्ञाने सत्यनुभूयमानं बाधिते तस्मिन्बाध्यमानं च रजतादिकं प्रतिभाति। तदिदं प्रतीतिसमयसत्ताकं अपूर्वमनिर्वचनीयाज्ञानविजृम्भितत्वात् अनि-

---

पपत्तिः। अख्यातिरेव भ्रान्तिरिति चेत केवलमख्यातिः ख्यात्यभावो वा, ख्यात्यन्यो वा, ख्यातिवि- रुद्धो वा, नाद्यः। यत्किञ्चित्ख्यात्यभावस्य सकलख्यात्यभावस्य वा सुषुप्त्यादावतिप्रसङ्गात्। ख्यात्यन्यपक्षेऽप्यन्यार्थिनोऽन्यत्र प्रवृत्तिहेतुत्वज्ञानं वा, अविविक्तानेकाकारावगाहिज्ञानं वा। नाद्यः, यत्र विरक्तस्य न प्रवृत्तिः झटिति बाधश्च तत्र तदभावात्। न द्वितीयः, अपुनरुक्त- शब्दद्वयस्मृतिहेतुत्वेन भेदावभासस्यावश्यकत्वादविविक्तत्वासिद्धेः। ख्यातिविरुद्ध इति पक्षे उत्तरज्ञानस्य पूर्वज्ञानविरोधित्वात् भ्रान्तित्वप्रसङ्गः।

यदुक्तं स्मरणाभिमानप्रमोषात्स्मरणस्य न गृह्यमाणात्स्वार्थविवेचकत्वमिति, तत्र वदामः किं स्मार्यगतो धर्मःस्मरणाभिमानः, तद्देशतत्कालपूर्वानुभवसंभिन्नत्वं वा, उत स्मरणगतः कश्चिद्धर्मः स्मरामीत्यनुव्यवसायो वा। नाद्यः। प्रत्यभिज्ञाभ्रमस्थले तद्देशतत्कालादिसंभेदा- वभासेऽपि गृह्यमाणात स्वार्थविवेचकत्वादर्शनात्। किञ्चानुभवसंभिन्नत्वस्य पूर्वानुभवाविषयत्वे स्मृतिविषयत्वानुपपत्तिः, पूर्वानुभवविषयत्वे स्वस्यैव स्वविषयत्वापत्तौ कर्तृकर्मविरोधापत्तेः। तस्मान्न स्मृतेः स्वजनकानुभवसंभिन्नविषयत्वसम्भवः। अतो न स्मार्यगतो धर्मः स्मरणाभिमानः। नापि त्रिकोणादिवत् स्वगतो धर्मः कश्चित्स्मरणाभिमानोऽभूयते ज्ञानस्य नित्यानुमेयतद्विशेषस्य अनुभवायोगात्। न च धूमविशेषाद्वह्निविशेषानुमानवल्लिङ्गविशेषात् ज्ञानविशेषानुभवसम्भवः। स्मृत्यनुभवयोः ग्राह्यरूपलिङ्गस्यैकत्वेन विशेषाभावात्। न च फलरूपलिङ्गविशेषात्तद्विशेषानुमानं; स्मृत्यनुभवयोः ग्राह्यभेदाभावेन फलभेदाभावात्। अत एव अनाकारामेव बुद्धिं अनुमिमीमह इति शबरस्वामिनोक्तम्। नाऽपि स्मरामीत्यनुभवः स्मरणाभिमानः तस्य कादाचित्कत्वेन सर्वस्मरणसाधारण्याभावात्। अनुभवानु[में]विलनुभाव्यव्यावृत्तस्मृतिस्मर्तृस्मार्यवाच्यवाचकशब्दा- नुविद्धतया तादृशशब्दस्मरणहेतुत्वेन प्रागेव भेदावगमस्य विवेचकत्वाभावाच्च। तस्मात् स्वरूपतो विषयतश्च स्मृत्यनुभवयोः विशेषाभावात् संस्कारमात्रजन्यत्वतदभावाभ्यामेव भेदः

यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति। सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते एकश्चन्द्रः सद्वितीयवदिति।

---

वैचनीयं सम्यग्विचारकुशलैः आलोच्यादरणीयम्। देशान्तरीयरजतस्य तत्र भाने सामग्र्यभावात् अन्यथाख्यात्यनुपपत्तेः। अत एवाऽऽत्मख्यात्यनुपपत्तेः। विवेकाग्रहस्य च विवेकग्रहाभावरूपत्वे ततः पुरोवर्तिप्रवृत्त्यनुपपत्तेः। तथात्वेऽतिप्रसङ्गात् भेदग्रहभिन्नत्वेन 'नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः' इतिन्यायात् अभेदग्रहस्यैव तदर्थत्वादख्यातेरसंभवात्। असतो भानायोगेनासत्ख्यातेरप्यसंभवात् अन्ततो गत्वा सर्वेषामनिर्वचनीयख्यातिरेव शरणमित्यभिप्रेत्य स्वसिद्धान्तमाह—सर्वथापित्विति।

---

वक्तव्यः। न च प्रकृते तत्संभवति। दोषादेः कारणान्तरस्य भावात्। अतो नाख्यातिः संभवति।

अस्तु तर्ह्यन्यथाख्यातिः। तथाहि—इन्द्रियसन्निकृष्टं सितभास्वरद्रव्यं दोषात् शुक्तत्वेनागृहीतं सादृश्यसमुद्बुद्धसंस्कारोपस्थितदेशान्तरीयरजतात्मना गृह्यत इति। तत्र वक्तव्यम्। किं अन्याकारं ज्ञानं अन्यालम्बनमिति ज्ञानान्यथात्वमुच्यते, उत वस्तुनो वस्त्वन्तरात्मनाऽवभास इति स्फुरणान्यथात्वं, किं वाऽन्यथापरिणते वस्तुनि ज्ञानमिति वस्त्वन्यथात्वम्। नाद्यः। संविद्विरोधात्। यदाकारं यज्ज्ञानं तत् तदालम्बनमित्यन्यत्र दृष्टत्वेन रजतज्ञानस्य शुक्त्यालम्बनत्वविरोधात्। न च तज्जन्यप्रवृत्तिविषयत्वात् तदालम्बनत्वं, सर्पादिज्ञानात् दण्डादिष्वादीयमानेषु तदालम्बनत्वप्रसङ्गात्। नापि तज्जनितातिशयाधारत्वं, प्रध्वस्तादेः अनालम्बनत्वप्रसङ्गात्। न द्वितीयः, वस्तुनः वस्त्वन्तरात्मतायाः असत्वेन अपरोक्षप्रथानुपपत्तेः भेदाभेदाङ्गीकारे सर्वत्र सामान्यविशेषयोः तादात्म्यमस्तीति चेत्, तर्हि भ्रान्तिबाधव्यवस्थानुपपत्तेः। न तृतीयः, यदि दोषवशात् शुक्तिरेव रजताकारेण परिणता तर्हि भ्रान्तिबाधयोः अनुपपत्तिः। न हि क्षीरे दध्याकारेण परिणते नेदं दधीति बाधः। नापीदं दधीति। परिणामे वा रजतमेव यावदायुरवतिष्ठेत न शुक्तिः।

ननु ज्ञानस्यैव रजताकारो बहिरवभासते संप्रयोगजज्ञानाविषयत्वे सत्यपरोक्षत्वात् संविद्वत्। स चाकारः स्वसन्तानपतितरजतज्ञानान्तररूपसंस्कारात्। स च विसदृशानेकज्ञान-

चतुर्ष्वेकैकं पक्षमवलम्ब्य सम्यग्विचारकुशलैः प्रबलतरयुक्तिभिः वार्यमाणेऽपि इत्यपिशब्दार्थः ।

---

व्यवहितोऽपि कारणं शालिबीजमिव पितृकाण्डादिव्यवहितं बीजान्तरस्य । तस्य च विज्ञानाकारस्य बहिष्ट्वमात्रं रजतमिदं नेति बाध्यत इति तदंशे भ्रम इति ।

तत्रेदं वक्तव्यम् । विज्ञानाकारी रजतं किं जायते, न वेति । न चेत् जायमानज्ञानाकारो न स्यात् विरोधात् । जायते चेन्नार्थात् ज्ञानव्यतिरिक्तार्थाभावात् । ज्ञानाच्चेत् यस्माज्ज्ञानादुत्पद्यते तस्य विषयः, उतान्यस्य ? तस्य चेत् पूर्वापरकालत्वेन अपरोक्षतया विषयभावानुपपत्तेः । अन्यस्येत्यत्रापि किं दुष्टकारणजन्यस्य विषयः, उत अदुष्टकारणजन्यस्य । नान्त्यः, भ्रान्तित्वाभावप्रसङ्गात् । आद्येऽपि स्वविषयज्ञानं प्रति जनकत्वे अर्थक्रियाकारित्वात सत्वप्रसङ्गात । अजनकत्वे प्रत्यक्षविषयभावानुपपत्तेः । तस्मात् शुक्तौ रजतमिति ज्ञानं नान्यथाख्यातिः । नाप्यात्मख्यातिः ।

कथं तर्ह्यन्यसंप्रयुक्तेऽन्यविषयं ज्ञानमिति । किमत्र कारणं पृच्छयते ? उत ज्ञानस्वरूपं उत विषयस्वरूपम् । आद्ये दोषसंस्कारसंप्रयोगात्मिकासामग्रीत्युत्तरम् । न च दोषस्य प्रकृतकार्यप्रतिबन्धकत्वमेव न विपरीतकार्यजनकत्वम् । अन्यथा दुष्टात कुटजबीजात् वटाङ्कुरोत्पत्तिप्रसङ्ग इति वाच्यम् । भस्मकदोषदूषितस्य जाठराग्नेः बह्वन्नदग्घृत्वदर्शनात । ननु इन्द्रियसंस्कारयोः विजातीयकार्यकारिणोः कथं एककार्यकरत्वम् । कथं वाऽन्यत्र निरपेक्षकारिणोः अत्र संभूय जनकत्वमिति चेत् प्रत्यभिज्ञायामिवोपपत्तेः। नन्विन्द्रियस्येदमा संप्रयोगादिदमाकारा काचिदन्तः करणवृत्तिरुदेति । सा च रजतं तत्संसर्गं वा नावगाहते सादृश्यज्ञानसमुद्बुद्धसंस्कारसचिवेदमवच्छिन्नचैतन्यस्था अविद्या रजतज्ञानाभासाकारेण परिणमते । स च परिणमोऽविद्यावृत्तिरित्युच्यते । तथा चान्तः करणवृत्त्यविद्यावृत्तिभेदेन ज्ञानभेदाङ्गीकारात् कथमेकं ज्ञानमित्युक्तमिति चेत् । न । विषयावच्छिन्नं हि फलमनुभूयते घटस्स्फुरति पटस्स्फुरति इति । विषयश्च प्रकृते सत्यमिथ्यावस्तुसंभेदावभासादेकतामापन्नः । एकविषयावच्छिन्नत्वात् फलमप्येकमित्येकफलजनकत्वात् ज्ञानयोरेकत्वोपचार इति न विरोधः । किञ्चाःपरोक्षतया प्रतिपन्नस्य परोक्षत्वाङ्गीकारात स्मरणाभिमानप्रमोषादिकल्पनागौरवादख्यातेरयुक्तत्वात् । अत्र प्रतिपन्नस्य अत्रासत्वस्य देशान्तरसत्वस्याऽङ्गीकारात् दोषस्याऽसन्निकृष्टज्ञानजननसामर्थ्यादिकल्पनागौरवादन्यथाख्यातेरयुक्तत्वात ।

पुरोदेशे प्रतिपन्नस्यात्मरूपत्वाङ्गीकारात् बहुज्ञानव्यवहितज्ञानजनकत्वादिकल्पनागौरवाच्चाऽऽत्मख्यातेरयुक्तत्वात् । अस्मन्मते च 'नास्त्यत्र रजतम् मिथ्यैव रजतमभात' इति यथानुभवं विषयसत्वाङ्गीकारात् । अविद्यायाः प्रमाणैः साधितत्वात् दोषादिसामग्रीकल्पनायाश्च प्रामाणिकत्वान्मायामयमेव रजतमिति युक्तम् ।

ननु तवाप्यस्तीति प्रतिपन्नस्य तत्रासत्त्वेऽनुभवविरोधः; न, इदन्तासंसर्गवच्चिति सत्तासंसर्गोऽवभासते अस्तीति , न तु रजतस्य सत्वम् । अथ वा त्रिविधं सत्वं पारमार्थिकसत्वं ब्रह्मणः कालत्रयाबाध्यत्वम् । व्यावहारिकं सत्वं वियदादिप्रपञ्चस्य ब्रह्मज्ञानेतराबाध्यत्वम् । प्रातिभासिकं सत्वं रजतादेः प्रातिभासकाले अबाध्यत्वम् । पारमार्थिकापेक्षया मिथ्येति व्यवहार इति नानुभवविरोधः । नन्वविद्यामयं इति वक्तव्यं, न मायामयमिति , मायाविद्ययोः भेदादिति चेत् । कुतो भेदः ? किं लक्षणतः, उत प्रसिद्धितः ? । नाऽऽद्यः । अनिर्वचनीयत्वरूपस्वरूपलक्षणस्य तत्वावभासप्रतिबन्धकत्वलक्षणस्य वाऽविशेषात् । ननु स्वाश्रयाव्यामोहकत्वतद्व्यामोहकत्वे मायाविद्ययोः लक्षणे, ते च भिन्ने इति चेत् ; न हि मायाश्रयत्वमव्यामोहे प्रयोजकम् । मायां विनाऽपि दाशरथेः व्यामोहश्रवणात । किन्तु तत्प्रतीकारः । अप्रतीकारे स्वाश्रयव्यामोहकत्वमिति स्यादेवेति नेदं मायालक्षणम् । अथ कर्तुः इच्छानुविधायित्वं मायालक्षणमिति; तदपि न, किं मणिमन्त्रादिनिमित्तकारणं तव मायात्वेनाभिप्रेतम् ; उत हस्त्यश्वरथादिप्रकृतिः अनिर्वचनीया काचिन्मायेति । नाद्यः । द्विचन्द्रादिभ्रमनिमित्ताङ्गुल्यवष्टम्भादावप्येतल्लक्षणसत्वेनातिव्याप्तेः । नापि द्वितीयः । मन्त्रादिनिमित्तकारणप्रयोगे कार्यावश्यंभावेनोक्तलक्षणस्यातिव्याप्तेः । नाऽपि प्रसिद्धितः, भूयश्चान्ते विश्वमायानिवृत्तिरिति ज्ञाननिवर्त्यतयाऽविद्यायां मायाशब्दप्रयोगात । तरत्यविद्यामिति स्मृतौ मायाविद्याशब्दयोः पर्यायत्वात् । सूत्रभाष्यकारादिभिः तत्र तत्र सामानाधिकरण्यव्यपदेशात् मायामयत्वोक्त्याऽविद्यामयत्वमुक्तमिति न विरोधः । आवरणविक्षेपशक्तिप्रधान्याभ्यां एकस्यामपि मायाविद्याशब्दप्रयोगोपपत्तेः ।

ननु अनुभवानुरोधाच्चेन्मिथ्यारजताङ्गीकारः तर्हि सद्रजनमिति प्रतिभासात्, सत्तात्रैविध्यकल्पनागौरवाच्च पुरोवर्तिनि परमार्थसदेव रजतमिति दिगम्बरमतमेव सम्यगिति चेत् । न । तथात्वे सर्वग्रहणप्रसङ्गः । न च दोषोपहतमिन्द्रियं तद्ग्राहकम्; तथात्वे दोषाभावे किमपि रजतं न गृह्येत । नहि परमार्थत्वाविशेषे किञ्चिद्दोषमपेक्षते किञ्चिन्नापेक्षत इति युक्तम् । अतो ज्ञानस्य दोषजन्यत्वात् मिथ्याज्ञानत्वप्रसिद्धेश्च मिथ्यरजतमेवावलम्बनमिति युक्तम् । नेदं रजतमिति बाधकज्ञानं प्रतिपन्नोपाधावभावप्रतियोगित्वरूपमिथ्यात्वं रजतस्य विषयीकरोति । ननु कोऽसौ बाधः ? येन तत्करणादिदं बाधकज्ञानं; किं प्रवृत्तिनिरोधः, प्रवृत्तियोग्यता-

निरोधो वा, अन्यात्मना प्रतिपन्नस्येतरेतराभावप्रतिपत्तिर्वा ?। नाद्यः। यत्र प्रवृत्तिरेव न जाता तत्र बाधाभावप्रसङ्गात्। न द्वितीयः, कालान्तरे तत्रैव प्रवृत्तिदर्शनेन योग्यताया अविनाशात्। न तृतीयः। शुक्लः पट इति प्रतिपद्य पटस्य शौक्ल्यमिति ज्ञानस्याऽपि बाधत्वापातादिति चेत्। न। उपादानाज्ञानेन सहाध्यासस्य निवृत्तिरेव बाधः। तज्जनकज्ञाने बाधकत्वप्रसिद्धेः।

ननु स्वरूपलक्षणस्य स्वप्नभ्रमे अव्याप्तिः। परत्रेत्यधिष्ठानांशस्याभावात्। किमात्माधिष्ठानं उतानात्मा। नाद्यः। 'इदं' इति विच्छिन्नदेशावभासनात्। न द्वितीयः, अनात्मनः आरोप्यकोटिनिक्षिप्तत्वेनाधिष्ठानत्वानुपपत्तेः। अधिष्ठानाभावेन तत्संप्रयोगजन्यत्वं तटस्थलक्षणमपि नास्ति। प्रमातृदोषस्य रागादेः अभावात् बाह्यकरणानामुपरतत्वेन तद्दोषस्याभावात्। नापि विषयदोषः। तस्याज्ञातस्य जनकत्वे सर्वदा भ्रमप्रसङ्गः। ज्ञातस्य हेतुत्वे तज्ज्ञानं किं बाह्येन्द्रियेण, उतान्तः करणेन ? नाद्यः, तेषां उपरतत्वात्। न द्वितीयः, तस्य बहिरस्वातन्त्र्यात्। अत एव कारणानिरूपणात् स्मरणात्मकं स्वप्नज्ञानमिति चेत; न तावत्स्वरूपलक्षणाभावः। सर्वतो विप्रसृतचैतन्यस्य निद्रादिदोषोपस्पृष्टान्तःकरणावच्छिन्नस्य स्वाविद्यया गजाद्याकारेण विवर्तमानस्याधिष्ठानत्वान्न परत्र परावभास इत्यस्यापवादः। तादृशदोषोपप्लुतमन्तःकरणमदृष्टादिसमुद्बोधितसंस्कारविशेषसहकार्यनुरोधाद्रथादिविषयक ज्ञानाभासाकारेण परिणमते। अत एव दुष्टकरणसंप्रयोगजन्यत्वं दोषजन्यत्वं च रजताध्यासवदस्तीति न तटस्थलक्षणाव्याप्तिः।

ननु चैतन्यस्याधिष्ठानत्वेऽन्तरेव स्वप्नार्थप्रतिभासस्स्यादिति चेत्। किं चैतन्ये प्रतिभासस्स्यादित्युच्यते, उताहं गज इत्यन्तः करणावच्छिन्ने ? नाद्यः। घटःसन्निति जागरणे चैतन्यसामानाधिकरण्यप्रतीतिवत्स्वप्नेऽपि प्रतीतेः। न द्वितीयः। अन्तः करणावच्छिन्नस्याधिष्ठानत्वाभावेनापादकाभावात्। नन्वनवच्छिन्नचैतन्यस्याधिष्ठानत्वे स्वप्नप्रपञ्चस्य जाग्रत्प्रपञ्चवत्सर्वसाधारण्यं व्यावहारिकत्वं च स्यादिति चेत्; न, आगन्तुकदोषजन्यत्वेन प्रातिभासिकत्वात अनन्यसाधारणत्वोपपत्तेः। नन्वेवमपि स्वप्ने देहेन्द्रियादि किञ्चिदहमिति प्रतीयते, रथगजादि तु इदन्तया प्रतीयत इति इति वैषम्यं कुत इति चेत। तदाकारानुभवाहित–संस्कारवशात् तथा तथा प्रतिभासोपपत्तेः। ननु नामादिषु ब्रह्मदृष्टावन्यस्यान्यात्मतावभासलक्षणस्यातिव्याप्तिः। न च तस्य लक्ष्यत्वमेवेति वाच्यम्। तथा सति कारणत्रितयजन्यत्वरूपतटस्थलक्षणस्यापि तत्र सत्वप्रसङ्गात्, तदभावेनालक्ष्यत्वादिति चेत्। न। अन्यस्या-

न्यात्मना ज्ञानमध्यासः। नामादिषु ब्रह्मदृष्टेश्च विधिजन्यपुरुषेच्छाधीनत्वेन मानसक्रियात्वेन ज्ञानत्वाभावात् न ज्ञानत्वगर्भलक्षणातिव्याप्तिः। नन्विच्छाधीनत्वेऽपि ज्ञानत्वं किन्न स्यात्। इष्टविषयस्मृतिधारावदिति चेत्, तत्रापीच्छायास्स्मृतिजनकव्यापारहेतुत्वं चक्षुष इव निमीलनादिव्यापारे। अन्यथा अनिच्छतोऽपि पथि गच्छतः दुर्गन्धज्ञानानुदयप्रसङ्गात्।

अत्र शून्यवादी सर्वज्ञानानां भ्रमत्वात् सत्यं अधिष्ठानं नास्तीति तद्वाचि परत्रपदमविवक्षितमित्याह। स वक्तव्यः। किं अधिष्ठानमात्रं निह्नूयते। उत सत्यम्। नाद्यः। आरोप्यव्यतिरिक्ताधिष्ठानांशस्य सर्वभ्रमेष्वनुभवसिद्धत्वात्। न द्वितीयः। रजतसंविदोः परस्पराधिष्ठानत्वे परस्पराश्रयप्रसङ्गः। ननु बीजाङ्कुरवत् पूर्वपूर्वसंविदि रजतं पूर्वपूर्वरजते संविदिति चेत्; न, परस्पराधिष्ठानत्वस्य कुत्राप्यक्लृप्तेन अन्धपरंपराप्रसङ्गात्। बीजाङ्कुरादौ कारणत्वस्य दृष्टत्वेन दृष्टिपरंपरात्वात्। बाधकज्ञानमप्यधिष्ठाने विशेषाभावं विषयीकुर्वत् अधिष्ठानस्य सत्यत्वं गमयति। ननु तर्हि बाधकज्ञानवशात् आरोप्यमसत् किं न स्यादिति चेत्; न, अपरोक्षप्रतिभासानुरोधेन प्रतिभासकाले असद्विलक्षणत्वस्याङ्गीकारात् बाधकज्ञानोत्तरमसत्वस्येष्टत्वात्। ननु रजतं इदं नेति बाधकज्ञानं रजतान्योन्याभावं विषयीकुर्वद्रजतस्य देशान्तरसत्वमेव गमयतीति चेत्; न तावत् देशान्तरसत्वं विषयीकरोति, रजताभावमात्रविषयत्वात्। इह बाधितत्वं देशान्तरसत्वं विनाऽनुपपन्नं तद्गमयतीति चेत्; न, व्याप्त्यसिद्धेः। इह नष्टघटस्य देशान्तरसत्वादर्शनात्। न्यायमते पुरोवर्तिरजतसंसर्गस्य तत्र बाधितस्य अन्यत्र सत्वाभावात्। आत्मख्यातौ बाधितस्य बहिष्ट्वस्यान्यत्रासत्वात्। अख्यातावप्युद्गात्रपच्छेदनिमित्तादक्षिणयागकर्तव्यताबाधितस्य प्रतिहर्तृपदच्छेदनिमित्तसर्वस्वदक्षिणयागकर्तव्यत्वस्यान्यत्र सत्वाप्रतीतेः। अतः अधिष्ठानं परमार्थं अध्यस्तमनिर्वचनीयम्।

तथा चानुभवः—**शुक्तिका हि रजतवदवभासते। एकश्चन्द्रः सद्वितीयवदिति।** आद्येन निरुपाधिकाध्यासस्य लक्ष्यलक्षणनिर्देशः। तत्र शुक्तिका रजतमित्यनेन परत्रावभास इति लक्षणं वत्करणेन मिथ्यारजतसंभेदात्मकं लक्ष्यम्। द्वितीयेन सोपाधिकभेदाध्यासस्य निर्देशः। तद्वदेवात्मनि निरुपाधिकाहङ्काराध्यासस्य सोपाधिकजीवब्रह्मभेदाध्यासस्य च सिद्धिः। ननु आत्मन्यहङ्काराध्यासे अधिष्ठानं अधिष्ठानयथात्म्यप्रमाणं प्रमाता चेति त्रितयमात्मैव। तत्र च कारणत्रयमध्यप्रविष्टरागादिदोषाभावेन तटस्थलक्षणाव्याप्तिः। आत्मनः निरंशत्वेन दोषप्रयुक्तागृहीतविशेषांशाभावादधिष्ठानत्वाभावेन परत्राधिष्ठाने परावभास इति स्वरूपलक्षणाव्याप्तिश्च। न च निरंशत्वेऽपि (न) भेदागृहीतविशेषांशसम्भवः। आत्मनः स्वय-

ज्योतिष्ट्वेनागृहीतविशेषांशाभावात्। न च तत्र प्रमाणाभावः; "अत्रायं पुरुषः स्वयंज्योतिः" इति श्रुतेः सत्वात्।

नन्वत्र ज्योतिश्शब्देन प्रकाशगुणाभिधाने पुरुषपदसामानाधिकरण्यानुपपत्तिः। पुरुषपदवाच्यात्मनः द्रव्यत्वेनार्थभेदात। शुक्लः पट इतिवत ज्योतिः पदस्य गुणिपरत्वे पुरुषः स्वयमेव कारकान्तरमनपेक्ष्य ज्योतिष्मानित्यर्थस्स्यात। तथा च न पुरुषस्य ज्योतिष्ट्वसिद्धिः। तथा चागृह्यमाणविशेषत्वमुपपद्यत इति चेत्, न ज्योतिषो गुणत्वासिद्धेः। ननु घटतज्ज्ञानयोः सम्बन्धो गुणनिष्ठः द्रव्यनिष्ठत्वात सत्तावदिति ज्ञानात्मकज्योतिषो गुणत्वसिद्धिरिति चेत्। न। रूपतज्ज्ञानयोः सम्बन्धो द्रव्यनिष्ठः गुणनिष्ठत्वादितिवदप्रयोजकत्वात्। तथा च घटादीनामन्याधीनप्रकाशवत् आत्मन्यपि प्रसक्तौ स्वयमिति विशेषणात् आत्मैव ज्योतिरिति सिद्धयति। अत एव ज्योतिषो विशेष्यत्वम्। किञ्च जानस्य जन्मसत्त्वे कारकान्तरनिवृत्तिपरःस्वयंशब्दः स्यात्। न च तदस्ति। तथा हि-ज्ञानं स्वाश्रये सति न जायते। प्रकाशगुणत्वात्। दीपनिष्ठप्रकाशगुणवत्। न च दृष्टान्तासिद्धिः, प्रदीपादिप्रकाशगुणस्य स्वाश्रयेण सहैव जायमानत्वेन स्वाश्रये सत्यजायमानत्वरूपसाध्यसत्त्वात। न च दर्पणादौ निघर्षणजप्रकाशगुणे व्यभिचारः। विद्यमानस्यैव प्रकाशगुणस्य प्रतिबन्धः निघर्षणेन निरस्यते, न तु प्रकाशगुण उत्पद्यते। वस्तुतस्तु प्रकाशस्वरूप एवात्मा न प्रकाशगुणवान्। गौरवात, प्रज्ञानघन इत्यादिशब्दाच्च। 'विज्ञानमानन्दं ब्रह्म" इति ज्ञानस्वरूपब्रह्माभिन्नत्वादपि चित्स्वरूप एवात्मा।

ननु विज्ञानमिति ज्ञानभेद उच्यते। करणाधिकरणयोश्चेत्यधिकरणे ल्युटो विधानात्। भावार्थे तद्विधानेऽपि न तस्येह ग्रहणम्, भावार्थस्य क्रियात्वात्। तदभिन्नत्वे ब्रह्मणोऽपि क्रियात्वापत्तेरिति चेत्; न, प्रथमोपस्थितभावार्थत्वे सम्भवति तदधीनोपस्थितिकाधिकरणार्थत्वस्यायुक्तत्वात। अद्वितीयश्रुतिविरोधाच्च। न च धात्वर्थरूपभावार्थस्य क्रियात्वात् तदभेदे ब्रह्मणः क्रियात्वप्रसङ्गः। अक्रियात्मकस्याऽपि धात्वर्थस्य 'गडि वदनैकदेशे' इत्यादौ प्रसिद्धत्वात्। अतः स्वयंज्योतिषि प्रत्यगात्मनि विशेषाग्रहणाभावात नाहङ्काराध्यासः। ननु ब्रह्मस्वरूपानवभासात तद्वैत्वज्ञानसद्भावात कथं नाध्यासः; न, तथा सति ब्रह्मण्येवाहङ्काराध्यासः स्यात्। न प्रत्यगात्मनि। तस्य ततो भिन्नत्वात। न हि शुक्त्यनवभासात् घटेऽध्यासः। अभिन्नत्वे वा आश्रयविषयभेदाभावात्। ब्रह्मणः विद्यात्मकत्वाच्च सुतरां विद्यायाः तत्रानुपपत्तिः। अत्रोच्यते। अद्वितीयचैतन्यस्याधिष्ठानयाथात्म्यप्रमाणत्वात्तन्निष्ठा-

विद्यादोषवशात् लक्षणद्वयस्याप्युपपत्तिः । न च तत्र प्रमाणाभावः । 'अनृतेन हि प्रत्यूढा' 'अनीशया शोचति मुह्यमानः' । 'न तं विदाथ य इमा जजान अन्यद्युष्माकमन्तरं बभूव' इत्यादि श्रुतेः प्रमाणत्वात् । अनर्थनिवृत्तिलक्षणपुरुषार्थत्वेन दर्शनविधानानुपपत्तिरपि बन्धस्याऽविद्यात्मकत्वमापादयन्त्यविद्यायां प्रमाणम् । अथवा ज्ञानाय श्रवणविध्यनुपपत्त्या पूर्वं अज्ञानविषयत्वं कल्प्यते ।

ननु जीवब्रह्मणोः ऐक्यस्य प्रामाणिकत्वात् तत्राज्ञानं नोपपद्यत इति चेत् ; तत्र वक्तव्यम् । किमज्ञानस्याश्रयविषयभेदसापेक्षत्वात् अभेदे तदनुपपत्तिः, उत प्रकाशात्मकस्य ब्रह्मणः तमोरूपाज्ञानाश्रयत्वविरोधः । ब्रह्मणः सर्वज्ञत्वादिहानिर्वा । नाद्यः । विमतं नाश्रयविषयभेदसापेक्षं, आवारकत्वात् तमोवत् । तमो ह्यपवरकमाश्रित्य तमेवाच्छादयति । कस्य कुत्राज्ञानमित्याश्रयविषयभेदोऽनुभूयत इति चेत् । अज्ञानप्रतियोगिज्ञाननिष्ठस्य आश्रयविषयभेदस्य तस्मिन्नुपचारात् । यथा गमानाभावे गमननिष्ठाश्रयविषयभेदः कस्य किंविषयमगमनमिति । नन्वात्मा न तमस आश्रयः प्रकाशत्वात् सवितृप्रकाशवदिति द्वितीयपक्ष इति चेन्न; तद्विरोधित्वस्योपाधित्वात् । न च साधनव्यापकता । चैतन्यस्याज्ञानावभासकत्वेनातद्विरोधित्वात् । न तृतीयः । चिन्मात्राश्रयत्वेऽपि अज्ञानस्योपाधेः प्रतिम्बिपक्षपातित्वात् जीव एव स्वकार्याज्ञत्वभ्रान्तिकिञ्चिज्ज्ञत्वादिकारित्वोपपत्तेः । यथा मुखमात्राश्रयस्यापि दर्पणस्य प्रतिबिम्बे श्यामत्वादिकारित्वं, तद्वत् । प्रत्युत जीवब्रह्मणोः अभेदो भावरूपाज्ञानस्य साधक एव । भेदे पुरुषान्तरसंवेदनवदग्रहणमेव स्यात् । तथा चानृतनीहारादिशब्दाः श्रूयमाणाः बाध्येरन् । नन्वैक्ये जीवब्रह्मभागः किन्निबन्धनः ? यतः सर्वज्ञत्वकिञ्चिद्ज्ञत्वादिव्यवस्था । अनाद्यविद्यानिबन्धन इति ब्रूमः । तथाहि । जीवब्रह्मविभागस्यानादित्वात् , अद्वितीयश्रुतिविरोधेन विभ्रममात्रत्वात् , कर्तृत्वादिप्रपञ्चस्य बीजाङ्कुरवदनादित्वेन तदुपादानस्यानादित्वादनाद्यविद्यैव जीवब्रह्मविभागहेतुः ।

नन्वन्तःकरणं विभाजकमस्त्विति चेत् । किं तत्पारमार्थिकविभागस्य हेतुः ? उत काल्पनिकस्य? नाद्यः , अद्वैतश्रुतिविरोधेन वास्तवभेदाभावात् । न द्वितीयः , अविद्याया एव कल्पितभेदहेतुत्वात् । किञ्चान्तःकरणमपि किं तात्विकम् ? उतातात्विकम् ? नाद्यः , 'भिद्यते हृदयग्रन्थिः' इत्यादिश्रुतेः ज्ञाननिवर्त्यत्वावगमात् । न द्वितीयः । तदुपादानत्वेनाप्यज्ञानस्यावश्यकत्वात् जीवब्रह्मविभागोपपत्तेः । किञ्च किमन्तःकरणं सषुप्त्यादावस्ति ? उत न ? आद्ये जाग्रदवस्थातो न विशेषः । न द्वितीयः । सुषुप्तमात्रस्य मुक्त्यापत्तेः । नु । तदाऽति-

सूक्ष्ममन्तः करणमस्तीति चेत् । केयं सूक्ष्मता । अवयवविनाशो वा ? अवयवापचयो वा ? नाद्यः । अवयविनोऽपि नाशप्रसङ्गात् । न द्वितीयः । स्थितावयविनो नित्यत्वप्रसङ्गात् नन्वतिरेको नाम कश्चिद्भेदाभेदसंपादनपटीयान, स एव विभाजक इति चेत् ; न, रजतादि-भ्रमहेतुत्वेन क्लृप्ताविद्यात एव विभागसिद्धौ तादृशातिरेके प्रमाणाभावात् । वास्तवांशांशि-भावो भेदक इत्यपि न, 'निष्कलं निष्क्रियं' इत्यादि श्रुतिविरोधात् ।

नन्वविद्या किमसंबन्धिनी भागहेतुः उत संबन्धिनी । नाद्यः । अपसिद्धान्तात्, अतिप्रसङ्गाच्च । न द्वितीयः, किं जीवसंबन्धिनी । उत ब्रह्मसम्बन्धिनी । उभयथापि न; जीवब्रह्मविभागस्याविद्याप्रयुक्तत्वेन अविद्यायाः तत्रानुपपत्तेरिति । अत्रोच्यते । चिन्मात्रा-श्रया चिन्मात्रविषयेति ब्रूमः । यथा मुखमात्राश्रयः दर्पणादिः बिम्बप्रतिबिम्बविभागहेतुः प्रतिबिम्बश्यामत्वादिहेतुश्च । एवं चिन्मात्राश्रयं अज्ञानं जीवब्रह्मविभागहेतुः । जीवस्य अस्वतन्त्रत्वभ्रान्त्यादिहेतुश्च । उपाधेः प्रतिबिम्बपक्षपातित्वान्नोक्तदोषः । नन्वहमज्ञ इत्यन्तः करण-विशिष्टाश्रयत्वानुभवात् कथं चिन्मात्राश्रयत्वमुच्यते । नैष दोषः । अन्तःकरणाज्ञानयोः एकात्मसंबन्धात् विशिष्टाश्रयत्वप्रतीत्युपपत्तेः । यथा दग्धृत्वायसोः एकाग्निसम्बन्धात् अयो दहतीत्ययसि दग्धृत्वव्यपदेशः, तद्वत् । नन्वयसः केवलस्य दग्धृत्वादर्शनात् वह्नेरेव तद्दर्शना-दस्तु सामानाधिकरण्यविषयः प्रत्ययः, न त्वत्र, विशिष्टाश्रयत्वे बाधकाभावादिति चेत्; न, विशिष्टं किं विशेषणविशेष्याभ्यां अतिरिक्तम्, अनतिरिक्तं वा ? जडत्वेनाज्ञानाश्रयत्वानुपपत्तेः । अज्ञत्वभ्रान्त्यादेः तत्रैव सम्भवे आत्मनो नित्यमुक्तत्वप्रसङ्गाच्च । न द्वितीयः । विशेष्य-स्वरूपमात्राश्रयत्वे संभवति विशेषणेऽपि तत्कल्पने गौरवात् । मुक्तिकालावस्थायिनोऽज्ञत्वं बन्धश्च वक्तव्यः । न चान्तःकरणस्य तत् सम्भवति । तस्मात्सुष्ठूक्तं चिन्मात्राश्रयमज्ञानमिति ।

ननु तथाऽपि स्वयंज्योतिषोऽज्ञानविषयत्वं नोपपद्यते । तथाहि—आत्मा नाज्ञानविषयः, भासमानत्वात्, भासमानघटवत । ननु घटमहं न जानामीति भासमानस्यैव घटस्याज्ञानविषयत्व-मनुभूयत इति दृष्टान्तासिद्धिः । न च तद्विशेषस्यैव तत्राज्ञानविषयत्वम् । तथा अप्रतीतेः इति चेत्; आत्मा नाज्ञानविषयः निरंशत्वे सति स्वयंज्योतिष्ट्वात् । व्यतिरेकेण घटादि-वत् इत्यनुमानोपपत्तेः । न । भोक्तुः स्वयंज्योतिषो देहादिव्यतिरेकः स्वरूपत्वात् तत्तन्त्रत्वाद्वा संविदभिन्नतया अपरोक्षतया भासमानोऽप्यज्ञानविषयो दृश्यते; तत्र व्यभिचारः । ननु तस्याज्ञानविषयत्वमसिद्धम् । भेदस्याधिकरणस्वरूपत्वेन तस्मिन्प्रकाशमाने तत्राज्ञाना-योगादिति चेत् । तत्र वक्तव्यम् । अहं मनुष्य इति ज्ञानमध्यासरूपं, उत गौणमिति ।

नाद्यः। अध्यासस्य विशेषाज्ञानव्याप्तत्वदर्शनबलात् व्यतिरेकस्याज्ञातत्वसिद्धेः। न द्वितीयः। गृहीतभेदयोः एकत्वाभिमानो गौणः। न चात्र भेदग्रहोऽस्ति। धर्मिप्रतियोगिज्ञानसाध्यत्वात् भेदग्रहस्य।

ननु न पदार्थमात्रज्ञानमेव भेदज्ञानम्। किन्तु धर्मिप्रतियोगिज्ञानापेक्षं तृतीयं ज्ञानं, तथ चाहं मनुष्य इति गृहीतभेदयोः एकत्वविषयं ज्ञानं गौणमेव। यद्यहं मनुष्य इति ज्ञानं देह-व्यतिरिक्तात्मविषयं न स्यात् व्यतिरिक्तात्मसिद्धिरेव न स्यात्, प्रमाणाभावात्। न च देहः स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात् घटवदित्यनुमानं, "अशब्दमस्पर्शमरूपमव्ययं" इत्याद्यागमश्च प्रमाणमिति वाच्यम्। ज्येष्ठप्रत्यक्षविरोधे तयोराभासत्वात्। न च प्रत्यक्षस्य द्विचन्द्रादिप्रत्यक्षवन्मिथ्यात्वात्तयोः प्रवृत्तिरिति वाच्यम्। मिथ्यात्वासिद्धेः। ताभ्यामेव तत्सिद्धौ परस्पराश्रयात्। आगमानुमानयोः प्रवृत्तौ मिथ्यात्वसिद्धिः। मिथ्यात्वसिद्धौ प्रत्यक्ष-विरोधाभावे तयोः प्रवृत्तिः इति। द्विचन्द्रादिप्रत्यक्षस्य तु सकललोकव्यापिपूर्वकालीन-स्वप्रत्यक्षादेव झटिति मिथ्यात्वसिद्धिः। तथाच देहव्यतिरेकस्य अज्ञातत्वाभावात् न पूर्वानु-माने व्यभिचारः इति।

**अत्रोच्यते**। किं वस्तुतो देहादिव्यतिरिक्तो य आत्मा तद्विषयत्वादहं प्रत्ययस्य गौणत्वम्, उत व्यतिरिक्तत्वेन तद्विषयत्वात्। नाद्यः। गृहीतभेदयोरेकत्वाभिमानस्य गौण-त्वात्। न द्वितीयः। किं सर्वदा व्यतिरिक्तात्मविषयत्वं अहं प्रत्ययस्य। उत जिज्ञासानन्तरम्। नाद्यः। कस्यापि विवादाभावेन जिज्ञासानुपपत्तेः। न द्वितीयः। किं जिज्ञासाजन्यज्ञानं व्यतिरिक्तात्मविषयमित्युच्यते। उत तत्सहकारिवशात् अहं प्रत्यय एव व्यतिरिक्तात्मविषय इत्युच्यते। नाद्यः। तर्करूपजिज्ञासाजन्यज्ञानस्य स्वतः प्रमाणत्वा-भावात्। ननु यौक्तिकज्ञानसहकारिवशात् अहंप्रत्यय एव व्यतिरिक्तात्मविषयः। यथा धूममात्रज्ञानस्य वह्निमात्रज्ञापकत्वेऽपि सौरभ्यदर्शनसहकारियुक्तस्य चन्दनप्रभववह्न्यनुमापकत्वं तद्वदिति चेत्; युक्तमनुमाने सहकारिवशादधिकविषयत्वम्। न प्रत्यक्षे। तथाऽदर्शनात्। अतो व्यतिरेकग्राहिप्रमाणस्याध्यासविरोधिनोऽभावात् अहं मनुष्य इति प्रत्ययोऽध्यासो न गौण इतीष्यते। तथा च भोक्तुः स्वयं ज्योतिषो देहादिव्यतिरेकस्य भासमानस्याऽपि अज्ञातत्वदर्शनात् त्वदुक्तानुमाने तत्र व्यभिचार इति भासमानस्याऽपि ब्रह्मणोऽज्ञानविषत्व-मुपपद्यते। अतोऽगृहीतविशेषांशसद्भावादहङ्काराध्यासे परत्र परावभास इति लक्षणं, चैतन्यस्य स्वरूपेणाऽजन्यत्वेऽपि विशिष्टरूपेणाऽविद्यालक्षणदोषपूर्वभ्रमाहितसंस्काराधिष्ठानप्रमाणचैतन्य-रूपकारणत्रितयजन्यत्वरूपतटस्थलक्षणं च संभाव्यते।

कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति युष्मत्प्रत्ययापेतस्य च

---

तेषां युक्तिदौर्बल्यमेवेत्यपिशब्दार्थः। तु शब्देन स्वसिद्धान्त एव युक्तिप्राबल्यं सूच्यते। अन्यत्राज्ञातविशेषाधिकरणे अन्यधर्मस्याऽऽरोप्यधर्मस्यावभासः। तस्य भावः तत्ता। तां इति ज्ञानाध्यासपक्षे। अर्थाध्यासपक्षे तु अवभास्यत इत्यवभासः। आरोप्यधर्मश्चासौ अवभासश्च सः। तथा तस्य भावः तत्ता। तामित्यर्थः। तत्राध्यासत्वं लक्ष्यतावच्छेदकं, अन्यत्राऽन्यधर्मावभासत्वं लक्षणं लक्ष्यतावच्छेदकेन समव्याप्तं सत् न व्यभिचरतीत्यर्थः। अधिष्ठानारोप्यस्वरूपविवादेऽपि लक्षणांशेऽस्ति संवादः इति भाष्यतात्पर्यमाहुः। वस्तुतस्तु दूष्यपक्षैः सह निर्दुष्टपक्षस्य संवादोऽप्यनुचित एव। तस्मादनिर्वचनीयपक्ष एव विद्वद्भिरादरणीय इति भाष्याशयो वर्णनीयः।

उक्तलक्षणमध्यासमनुभवारूढं करोति—तथा च लोके शुक्तिका हीति। अविद्यावृतशुक्त्यवच्छिन्नचैतन्य एव हि विक्षेपशक्त्या संस्कारादिसहकृतया व्यावहारिकरजतसदृशं अपूर्वं रजतमवभासत इत्यर्थः। यथाश्रुते हि रजततुल्यशुक्तिः अवभासत इत्युक्तं स्यात्। तथा चोक्तलक्षणानुभवसिद्धिः। एवमविद्यावृते सत्यज्ञानानन्दस्वरूपे ब्रह्मणि विक्षेपशक्त्याऽध्यस्ताहङ्काराद्यनुभवोऽपि लोकप्रसिद्धो वेदितव्यः। एतच्च परीक्षकवचनम्। भ्रान्तस्य तदानीं अधिष्ठानारोप्यविवेकज्ञानाभावात्। निरुपाधिकभ्रमे दृष्टान्तमुक्त्वा सोपाधिकभेदभ्रमे दृष्टान्तमाह—एक इति। द्वितीयचन्द्ररहित इत्यर्थः। तस्मिन्द्वितीयचन्द्रसाहित्यमुपाधिवशादनुभूयत इत्यर्थः। वत्करणं द्वितीयचन्द्राभावस्यावद्योतकम्। इतिशब्दः लक्षणप्रकरणपरिसमाप्त्यर्थः।

शुक्त्यादिषु सामग्रीबलात् रजताद्यध्याससिद्धावपि प्रत्यगात्मनि अहङ्काराद्यध्यासो न सिध्यति, सामग्र्यभावादित्याक्षिपति—कथं पुनरिति। पुनश्शब्दः सामग्र्यभावद्योतकः। आरोप्येण सहैकप्रमाणफलविषयत्वं अधिष्ठानस्य दृष्टम्। तथा च प्रमाणफलाविषये प्रत्यगात्मनि। विषयाश्च ते धर्माश्च विषयधर्माः। अधिष्ठानतन्त्रत्वादहङ्कारादयः। तेषामध्यासो नैव संभवति अगृहीताधिष्ठानकविभ्रान्तेः काप्यदर्शनादिति भावः। तत्र लौकिकदृष्टान्तमाह—सर्वो हीति। इदमिति सामान्यतो गृहीताधिष्ठाने हि रजतमारोपितं गृह्यते सर्वैः इत्यर्थः। अहङ्काराद्यारोपसिद्ध्यर्थं प्रतीचोऽपि मानफलविषयत्व-

---

नन्वहंप्रत्ययस्य देहव्यतिरिक्तात्मग्राहित्वाभावे केनापि प्रमाणेन तत्सिद्धिः न स्यादिति चेत्। न। अनुवृत्ताहंप्रत्ययस्य व्यावृत्तबालादिशरीरालम्बनत्वानुपपत्त्या तस्य मिथ्यात्वे सिद्धे अनुमानागमाभ्यामेव देहव्यतिरिक्तात्मसिद्धेरिति दिक्।

ब्रह्मणोऽविषयत्वं ब्रवीषि । उच्यते । न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात् , अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः । न चायमस्ति

---

मङ्गीकर्तव्यमित्यत आह–युष्मत्प्रत्ययेति । विषयविषयिणोः इति वदन् सिद्धान्ती युष्मदर्थादहङ्कारादेर्विषयान्निष्कृष्टस्य प्रत्यगात्मनः अविषयत्वं ब्रवीषि । तस्मादविषये विषयधर्माणामहङ्कारादीनामध्यासो न संभवति इत्याक्षेपे कृते समाधानं कर्तुं प्रतिजानीते-उच्यत इति । यद्यपि परमार्थतः प्रत्यगात्मा साक्षी केवलः कस्यापि प्रमाणफलस्य गोचरो न भवति, "न चक्षुषा गृह्यते नापि वाचा", "यतो वाचो निवर्तन्ते", "न दृष्टेः द्रष्टारं पश्येः"। "अदृष्टो द्रष्टा" इत्यादिश्रुतिशतेभ्यः । तथाप्यनाद्यनिर्वचनीयाविद्याविक्षेपशक्तिप्रत्युपस्थापिताहङ्कारादिरनुभूयते हि अहं कर्ताऽहं भोक्तेति। विषयतयाऽनुभूयमानाहङ्कारस्यारोपितत्वं सिद्धम् । तथाहि । अहङ्कारोऽध्यस्तः दृश्यत्वात् , अज्ञातविशेषाधिकरणेऽवभासमानत्वाद्वा, रजतादिवत् । तथा चाध्यस्यमानाहङ्कारः सच्चिदाभास एवाऽध्यस्यते । यथा दर्पणे चक्षुषा गृह्यमाणे तत्संसृष्टतया चक्षुरपि गृह्यते । तत्र चक्षुषस्स्वतोऽचाक्षुषत्वेऽपि दर्पणोपाधिसम्बन्धात् चाक्षुषत्वम् । एवं अहङ्कारसाक्षिणस्स्वतस्साक्षित्वात् भास्यत्वाभावेऽपि अहङ्काराभिव्यक्तस्वरूपेण तद्भास्यत्वं संभाव्याऽधिष्ठानसंप्रयोगसंभवात् आरोपस्संभवतीत्यभिप्रेत्याह--न तावदित्यादिना । अस्मत्प्रत्ययविषयत्वादिति। अहंवृत्तिव्यक्तत्वेन गोचरत्वादित्यर्थः । नन्वहङ्कारे

---

नन्वेवमप्यविषये प्रत्यगात्मनि कथमनात्माध्यासः ? शुक्तिरूप्यादावध्यासव्यापकत्वेनावगतस्याधिष्ठानाध्यस्यमानयोः एकज्ञानविषयत्वस्याभावात् । न चाध्यासवशाद्विषयत्वमपि कल्प्यम् । तस्य त्वयाऽनभ्युपगमात् । विषयत्वे च युष्मत्प्रत्ययविषयस्स्यात् । तदभावान्नाध्याससंभवः इति चेत; न तावदयमेकान्तेनाविषयः सर्वतो विप्रसृतस्याऽपि चैतन्यस्य स्वाध्यस्ते तैजसेऽहङ्काराख्ये अस्मत्प्रत्यये विशेषाभिव्यक्त्या विषयत्वोपपत्तेः । सवितृप्रकाशस्येव सर्वगतस्य सूर्यकान्तादौ । न चान्योन्याश्रयः । पूर्वपूर्वाध्याससिद्धविषयभावे उत्तरोत्तराध्यासोपपत्तेः बीजाङ्कुरवदनादित्वात् । नन्वहङ्कारस्यात्मन्यध्यस्तत्वे अहमित्यत्र द्विरूपावभासो वक्तव्यः इदम्भोः रजतमितिवत् । तदभावात् नाध्यास इति चेत्; न, रूपतो भेदावभासाभावेऽपि असाधारणधर्मोपात्तत्वेन द्वैरूप्यावगमात् । यथा अयो दहतीत्यत्रायसः चतुष्कोणत्वादिकं अग्नेश्च दग्धृत्वं परस्परविरुद्धत्वात् धर्मिभेदं गमयति । एवं अहं उपलभ इति प्रकाशस्वभावोपलब्ध्याश्रयत्वं तैजसस्य अन्तःकरणस्यानुपपन्नमात्मनः धर्मः । तस्यैवाद्वितीयस्य

नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति । अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति । एवमविरुद्धः

---

सिद्धे तदभिव्यक्तात्मरूपाधिष्ठानसंप्रयोगः अधिष्ठानसंप्रयोगे सत्यहङ्कारारोप इत्यन्योन्याश्रय इति चेन्न। अनादित्वात्। पूर्वपूर्वाध्यस्ताहङ्काराभिव्यक्तात्मन उत्तरोत्तराहङ्काराधिष्ठानत्वेन ग्रहणसम्भवान्नोक्तदोषः। ननु फलविषयत्वेनारोप्यस्याधिष्ठानं फलविषय एव दृष्टम्। लोके आत्मनः फलाविषयत्वात्कथमध्यासः सिध्यतीत्यत आह—अपरोक्षत्वाच्चेति। च शब्दः शङ्कानिरासार्थः। अपरोक्षत्वं वा कथमित्यत आह—प्रत्यगिति। "यत्साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तर" इति श्रुतेः। आबालगोपालं अहं अहं इति प्रत्यगात्मप्रसिद्धेश्च। आरोपे अधिष्ठानसिद्धिरेव कारणमपेक्ष्यते। न त्वेककरणफलविषयत्वं गौरवादिति भावः। नन्विदं रजतमित्यादौ अधिष्ठानारोपयोः एककरणफलविषयत्वं दृष्टम्। तद्वत् इहापि भवितव्यमित्यत आह-न चायमिति। तथा नियमाभावे दृष्टान्तमाह-अप्रत्यक्ष इति। तलं नभः मलिनं नभ इत्यचाक्षुषेऽपि नभसि बालानां तलमलिनरोहितादीनामध्यासदर्शनात् नोक्तनियमो दृष्टः। न च नभसि सादृश्यसन्निकर्षयोरभावात् तलमलिनताद्यध्यास एव न संभवतीति वाच्यम्; प्रत्यक्षसिद्धाध्यासस्यापलपितुमशक्यत्वादिति भावः। दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके निगमयति -एवमिति। यथा सन्निकर्षसादृश्याभावेऽपि साक्षिमात्रप्रसिद्धे नभसि तलमलिनताध्यासो न विरुध्यते। एवमिहापि प्रत्यगात्मन्यहङ्काराध्यासो न विरुध्यते। तथा चाहङ्कारादीनामध्यस्तत्वे लक्षणतस्सिद्धे शास्त्रजन्यविद्यया तस्य निवृत्तिः प्रयोजनं सिध्यतीति भावः।

---

धर्मधर्मिभावोपपादकपरिणामाश्रयत्वमात्मन्यनुपपन्नं अन्तःकरणस्य। तथा परमप्रेमास्पदत्वेन सुखरूपस्यात्मनो दुःखत्वमनुपपद्यमानं धर्म्यन्तरं कल्पयति। प्रमातृप्रमाणविषयफलेष्वनुस्यूतचिद्रूपमहमिति व्यावृत्तरूपञ्च। तथा कामादिरूपेण परिणामिरूपम्। तदागमापायदृष्टरूपञ्च। एवं सर्वानुभवसिद्धे द्विरूपावभासे तदभावाभिधानं साहसमात्रम्।

नन्वयसोऽन्यत्र वह्नेर्दग्धृत्वदर्शनात् केवलस्यायसः तददर्शनात् तत्र तथाऽस्तु। अत्र तु अहंव्यतिरेकेणाऽऽत्मनः केवलस्योपलब्धृत्वादर्शनात अहम एवोपलब्धृत्वं आत्मत्वं च, संविदाश्रयस्यात्मत्वप्रसिद्धेः। तस्य चानिदंरूपत्वमेव, स्वप्रकाशसंविदाश्रयत्वेन अपरोक्षतया

प्रत्यगात्मन्यप्यनात्माध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते। तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः। तत्रैवं सति यत्र

---

ननु अहङ्कारस्याध्यस्तत्वं पामरप्रसिध्या विद्वत्प्रसिध्या वा?। नाद्यः। पामराणामहङ्कारादेः अध्यस्तत्वाप्रसिद्धेः विद्यया तन्निवृत्तिः प्रयोजनं न सिध्यति। न द्वितीयः, विदुषामहङ्कारादेः कालत्रयासत्वेनाध्यस्तत्वासिद्धेः विद्यया तन्निवृत्तिः प्रयोजनं सुतरां न सिध्यतीत्याशङ्क्य पामरविद्वत्प्रसिद्धिभ्यां तदसिद्धावपि परीक्षकप्रसिध्या तदुभयं सिध्यतीत्याशयेनाह-तमेतमिति। तमाक्षिप्तमेतं समाहितमेवंलक्षणमुक्तलक्षणलक्षितं द्विविधमध्यासं पण्डिताः परीक्षकाः सम्यग्विचारकुशला इति यावत्। अविद्याकार्यत्वादविद्येति मन्यन्ते विविच्य जानन्तीत्यर्थः। तन्निवर्तकत्वेन विद्यास्वरूपमाह—तद्विवेकेनेति। ततः अध्यस्ताहङ्कारादिभ्यो विवेकः भेदज्ञानं, तेन वस्तुस्वरूपावधारणं प्रत्यस्तमिताज्ञानतत्कार्यब्रह्मस्वरूपावधारणं विद्यां शास्त्रजन्यफलमाहुः वदन्तीत्यर्थः। विद्याफलमाह-तत्रेति। तत्र प्रत्यगात्मनि। एवं सति आरोपिताहङ्कारादिप्रविलापनपूर्वकं ज्ञाते सतीत्यर्थः। इत्येकः पक्षः। अध्यासस्यापि प्रकृतत्वात्, तत्र अध्यासे। एवं सति अधिष्ठानयाथात्म्यज्ञानेन बाधिते इत्यर्थः इत्यपरः पक्षः। पूर्वस्मिन्पक्षे यत्र प्रत्यगात्मनि यस्याहङ्कारादेरध्यासः तत्कृतेनाध्यस्ताहङ्कारादिकृतेन दोषेण सुखित्वादिना अणुमात्रेणापि सः प्रत्यगात्मा न संबध्यते। न लिप्यते इत्यर्थः। द्वितीयपक्षे यत्राध्यासे अहङ्कारादौ। यस्य प्रत्यगात्मनः संसृष्टवेषेणाध्यासः तत्कृतेन प्रत्यगात्मकृतेन। गुणेन सत्यज्ञानानन्दादिगुणेनाणुमात्रेणाऽपि सः अहङ्कारादिः न संबध्यते। कालत्रयेऽपि

---

विषयवत् संवित्कर्मत्वाभावात्। न च संवित्कर्मत्वाभावे अपरोक्षत्वं न स्यादिति वाच्यम्? किं परोक्षत्वेन संवित्कर्मत्वं सिषाधयिषितम्? उत संवित्कर्मत्वाभावेनापरोक्षत्वाभावः। नाद्यः। अप्रयोजकत्वात्। न द्वितीयः। कर्मत्वाभावेऽपि संविदाश्रयत्वेनापरोक्षतोपपत्तेः। प्रत्युत संवित्कर्मत्वे घटादिवदनात्मत्वप्रसङ्गात्।

ननु साङ्ख्या अचिदात्मन्यन्तःकरणे चिदाकारप्रतिबिम्बः तथाविधबिम्बसन्निधानपुरस्सरः प्रतिबिम्बत्वात् दर्पणादौ मुखप्रतिबिम्बवदित्यात्मानमनुमिमते। नैय्यायिकास्तु इच्छादीनां गुणत्वाद्द्रव्याश्रितत्वे परिशेषादात्मसिद्धिरिति वर्णयन्ति। वार्तिककारीयास्तु विषयगतज्ञाततालिङ्गात् आत्मनिष्ठज्ञानं अनुमिमते। संवेदनेषु विषयाकारप्रतिबिम्बावभासः तथाविधबिम्बसन्निधानपुरस्सरः तदवभासत्वात् दर्पणस्फटिकादिषु मुखरक्तत्वादिवत् इति नित्यानुमेया विषया

यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते। तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेय-व्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः ; सर्वाणि च शास्त्राणि विधिप्रति-षेधमोक्षपराणि। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति।

---

सत्यत्वादिगुणयुक्तो न भवतीत्यर्थः। नित्यमुक्त एवाऽऽत्मा भवतीति भावः। एवं 'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः'' इतिन्यायेन प्रथममध्यासलक्षणं सपरिकरं प्रतिपाद्य तत्रैव लौकिकाभिमतं प्रमाणमाह-तमेतमित्यादिना सर्वलोकप्रत्यक्षः इत्यन्तेन। तं उक्तलक्षणलक्षितं परीक्षकप्रसिद्धम्। अविद्याख्यं तं पण्डितैः अविद्येति विभावितं आत्मानात्मनोरित-रेतराध्यासं पुरस्कृत्य हेतूकृत्य सर्वे प्रमाणं प्रमेयं प्रमाता प्रमितिरिति लौकिकव्यवहाराः प्रवृत्ताः। विधिप्रतिषेधमोक्षपराणि सर्वाणि शास्त्राणि च प्रवृत्तानि इत्यन्वयः। अनेन, लौकिकशास्त्रीयव्यवहारान्यथानुपपत्त्या तत्कारणमात्मानात्मनोः इतरेतराध्यासं कल्पयन्ती-त्यर्थापत्तिलक्षणं प्रमाणमुपन्यस्तं भवति। केचित्तु केवलव्यतिरेक्यनुमानमिति वदन्ति। उक्तव्यवहारस्य उक्ताध्यासेन विनाऽनुपपत्तिं प्रपञ्चयितुं उक्ताध्यासस्य व्यवहारहेतुत्वमाक्षिपति-कथं पुनरिति। यद्वा उक्तव्यवहारस्याध्यासहेतुत्वमाक्षिपति कथं पुनरिति। प्रत्यक्षादिप्रमाणानि शास्त्राणीव कथमविद्यावद्विषयाणि प्रमाणत्वविरोधात्। यद्यविद्यावद्विषयाणि प्रत्यक्षादीनि तर्हि कथं प्रमाणानि। तथा च प्रत्यक्षादीनां शास्त्राणां च प्रमाणत्वान्यथानुपपत्त्या अविद्यावद्विषयकत्वं न संभवतीत्याक्षेपार्थः। एतेषां व्यावहारिकमानत्वेऽपि तात्त्विकमानत्वाभावादविद्यावद्विषयकत्वमेवेति प्रपञ्चयितुं

---

इति सौत्रान्तिकाः कल्पयन्ति। अपरोक्षत्वेऽपि विषयसंविद्व्यतिरिक्तमनस्संयोगजज्ञानान्तर-विषय आत्मेति नैय्यायिकाः। ज्ञानं च संयुक्तसमवायजज्ञानान्तरविषयः इति। विज्ञान-वादी तु ज्ञानस्यैवाऽऽकारो विषयः। स च संविदभिन्नत्वात अपरोक्ष इति। कथमेतेषु जाग्रत्सु ज्ञानं स्वप्रकाशतया अपरोक्षं, आत्मा तदाश्रयत्वेनापरोक्षः। विषयः संवित्कर्मतया-ऽपरोक्ष इतीयं प्रक्रिया सिध्यतीति।

अत्रोच्यते। यदि नैय्यायिकादयः आत्मादीनामपरोक्षत्वेऽपि विप्रतिपत्तिनिराकरणार्था-न्यनुमानानीति वर्णयन्ति तदा न विरोधः। यदि नित्यानुमेयत्वं तदा अनुभवविरोधः।

उच्यते। देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति। न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते। न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते।

---

प्रतिजानीते-उच्यत इति। देहेन्द्रियादिष्विति। अहंममाभिमानाभावे प्रमतृत्वानुपपत्तिः यथा देवदत्तसुषुप्तौ तस्यैव देहादिष्वहंममाभिमानहीनस्य प्रमातृत्वाभावदर्शनात्। तथा प्रमातृत्वाभिमानाभावे प्रमाणप्रवृत्त्यभावोऽपि दृश्यते। अतः प्रमाणप्रवृत्त्यन्यन्यथानुपपत्त्या प्रमातृत्वसिद्धिः। प्रमातृत्वान्यथानुपपत्त्या चात्मानात्मनोरितरेतराध्याससिद्धिरित्यर्थापत्तिरेवाध्याससिद्धौ मानमिति भावः। देहेऽहमभिमानादेव प्रत्यक्षादिव्यवहारोऽस्तु। किमिन्द्रियेषु ममत्वाभिमानेनेत्यत आह—नहीति। चक्षुषा पश्यामि श्रोत्रेण शृणोमीति इन्द्रियोपादानपूर्वक एव प्रत्यक्षादिव्यवहारो जाग्रति दृश्यते। सुषुप्तौ इन्द्रियोपादानाभावे न दृश्यते। अतः इन्द्रियेषु ममत्वाभिमानोऽपि व्यवहारे कारणमिति भावः। नन्विन्द्रियेषु ममत्वाभिमानादेव प्रत्यक्षादिव्यवहारोऽस्तु। किं देहेऽहमभिमानेनेत्यत आह–न चेति। इन्द्रियाणां अधिष्ठानं देहः। तेन विना इन्द्रियाणां व्यापारो न संभवतीत्यर्थः। ननु देहेन्द्रियैरेव व्यवहारोऽस्तु। किं तदध्यासेनेत्यत आह—न चेति। अनध्यस्तः आत्मभावो यस्मिन् देहे स तथा तेन देहेन कश्चिन्न व्याप्रियते। अतस्तदध्यासो व्यवहारकारणमित्यर्थः। नन्वात्मनः एव चेतनत्वात् प्रमातृत्वोपपत्तौ प्रमाणप्रवृत्त्युपपत्तेः किं देहाद्यध्यासेनेत्यत आह—न चैतस्मिन्निति। सर्वस्मिन्देहेन्द्रियादिष्वहंममाभिमाने

---

भट्टमते ज्ञानस्य ज्ञाततालिङ्गगम्यत्वे नियताधिकरणकज्ञानासिद्धिप्रसङ्गः। सौत्रान्तिकमते अनुमानं प्रतिज्ञातार्थं विषयीकरोति न वा। आद्ये प्रत्यक्षेण किमपराद्धम्। यद्यदाकारं न तत्तद्विषयमिति चेत्। अनुमानेऽपि तुल्यम्। अन्यथा अनुमाने व्यभिचारात्। आत्मज्ञानयोः अपरोक्षत्वेऽपि मनस्संयोगजन्यज्ञानान्तरविषयत्वमित्यत्र प्रमाणाभावात्। सुषुप्त्यादौ मनस्संयोगाभावे तयोरभानं मानं इति चेत्; न, विषयसंविदभावादेव तयोः अभानोपपत्तेः। तत्रैव मनस्संयोगानुविधानस्यान्यथासिद्धत्वात्। ज्ञानस्यानुव्यवसायविषयत्वपक्षे येन मनस्संयोगेन विषयज्ञानमजनि तेनैव तदनुव्यवसायोऽपि जन्यते, उतान्येन? नाद्यः। युगपज्ज्ञानद्वयावस्थानप्रसङ्गात्।

न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्याव-द्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च। पश्वादिभिश्चाविशेषात्।

यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्ददिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते। अनुकूले च प्रवर्तन्ते। यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पला-यितु मारभन्ते हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति।

---

असतीत्यर्थः। प्रमातृत्वं नाम प्रमाश्रयत्वम्। प्रमा च लौकिकी करणजन्या। सा च करणप्रयोक्तारमन्तरेणानुपपन्ना सती करणप्रयोक्तारं प्रमातारं कल्पयति। करणप्रयोक्ता च न शुद्धचिद्धातुरसङ्गत्वात्। "असङ्गो ह्ययम्" इति श्रुतेः। अहङ्कारोऽपि न प्रमाता। तस्य जडत्वेन विषयानुभावकत्वानुपपत्तेः। अतः परस्परैक्याध्यासापन्न एव प्रमाता चिदचिद्ग्रन्थिरूपः कश्चित्प्रमाकरणानां प्रमाजननव्यापारे प्रयोक्ता कल्पनीय इत्यर्थः। ननु करणानां स्वातन्त्र्येणैव प्रमोत्पादकत्वमस्तु। किन्तत्प्रयोक्तृकल्पनयेत्यत आह–न चेति। प्रमातृत्वमन्तरेण, प्रमातृत्वमिति धर्मिप्रधानो निर्देशः। तथा च प्रमातारमन्तरेणेत्यर्थो बोद्धव्यः। अथवा आत्मनः प्रमातृत्वं प्रमाकरणप्रयोक्तृत्वम्। तेन विना करणानां स्वविषयप्रमोत्पत्तौ प्रवृत्तिर्नसंभवतीत्यर्थः। उपक्रान्तमध्याससिद्धौ अर्थापत्तिप्रमाणमु-पसंहरति-तस्मादिति। यस्मादुक्ताध्यासलक्षणां उक्ताविद्यामन्तरेण प्रत्यक्षादिः लौकिकः शास्त्रीयश्च व्यवहारो न सिध्यति तस्मादित्यर्थः। ननु पामरव्यवहारस्य उक्ताध्यास-पूर्वकत्वेऽपि विद्वद्व्यवहारस्य कथं तत्पूर्वकत्वमित्याशङ्क्य शास्त्रार्थानुभववेलायां अध्यासाभावेऽपि व्युत्थानदशायां प्रातीतिकव्यवहारसमये तदध्यासपूर्वकत्वमस्तीति अन्वय्यनुमानेन साधयति—पश्वादिभिश्चेति। तदेव विवृणोति—यथाहीत्यादिना। विद्वद्व्यवहारः उक्ताध्यासपूर्वकः व्यवहारत्वात्, पश्वादिव्यवहारवत् इत्यनुमानमभिप्रेत्य तत्र दृष्टान्तभागं प्रपञ्चयति—यथेत्यादिना तं प्रत्यभिमुखीभवन्तीत्यन्तेन। स्पष्टार्थो दृष्टान्तः।

---

न द्वितीयः। क्रियाविभागन्यायेन संयोगान्तरोत्पत्तिसमये पूर्वज्ञानस्य चिरध्वस्तत्वेन प्रत्यक्षज्ञान-विषयत्वानुपपत्तेः। विज्ञानवादिमते विषयस्य संविदभिन्नत्वेन अपरोक्षत्वेन रजतादेः बहिष्ट्वं संविद्भिन्नं, उत नेति वक्तव्यम्। आद्ये बहिष्ट्वस्यापरोक्षत्वं न स्यात्। अन्त्ये तदंशे

एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते। तद्विपरीतान् प्रति प्रवर्तन्ते। अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः पश्वादीनां च प्रसिद्धोऽविवेकपुरस्सरः प्रत्यक्षादिव्यवहारः। तत्सामान्यात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यहारः तत्कालः समान इति निश्चीयते। शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धमधिक्रियते तथापि न वेदान्तवेद्यमशनायाद्यतीतं

---

अत्र व्यवहारत्वाध्यासपूर्वकत्वयोः व्याप्तिः प्रदर्शिता। पक्षे व्यवहारत्वरूपहेतुसत्वं प्रपञ्चयति-एवमित्यादिना प्रमाणप्रमेयव्यवहार इत्यन्तेन। ननु पश्वादिव्यवहारस्याध्यासपूर्वकत्वे सिद्धे तद्दृष्टान्तेन विद्वद्व्यवहारस्याध्यासपूर्वकत्वं साधनीयम्। तदेव न संभवतीत्यत आह—पश्वादीनां चेति। दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति-तत्सामान्येति। तत्काल इति तस्य पश्वादिव्यवहारस्य काल इव कालः यस्य विद्वद्व्यवहारस्य। तत्कालः समान इत्यध्यासपूर्वकत्वेन तुल्य इत्यर्थः। निश्चीयते साध्यत इत्यर्थः। ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिविधिविहितव्यवहारस्य देहाद्यात्माभिमानपूर्वकत्वे देशान्तरे कालान्तरभाविस्वर्गसंबन्धानुपपत्तेः देहेन्द्रियादिविलक्षणात्मविद्यापूर्वकत्वादुक्ताध्यासपूर्वकत्वमसिद्धमित्याशङ्कते-शास्त्रीये त्विति। प्रकृतिव्यवहाराद्वैलक्षण्यद्योतनार्थः तुशब्दः। अथवा तुशब्दो यस्मादर्थे। यस्माद्बुद्धिपूर्वकारी विमृश्यकारी देहादिविलक्षणमात्मानं जन्ममरणादिरहितं कालान्तरादिभाविस्वर्गसंबन्धिनं विदित्वैवाधिक्रियते। तस्मात् तद्व्यवहारस्याविद्यावत्कर्तृकत्वरूपसाध्यं बाधितमिति नोक्तानुमानादध्याससिद्धिरिति पूर्वपक्षाशयः। यद्यपीत्याक्षेपार्थः। तथापीति। अविद्यावत्कर्तृकत्वं तद्व्यवहारो न जहातीत्यर्थः। तदीयविद्याया अविद्यात्वमेवेति वक्तुं पारमार्थिकविद्यास्वरूपमाह-वेदान्तवेद्येत्यादिना। वेदान्तैकलक्ष्यं "तन्त्वौपनिषदं" इति श्रुतेः। अशितुमिच्छा अशनाया। सा

---

भ्रान्तिबाधयोः अनुपपत्तिः। विज्ञानरूपत्वात्। अतः प्रकारान्तरस्यासंभवात् संवित्स्वप्रकाशतया अपरोक्षा। आत्मा तदाश्रयत्वेनापरोक्षः विषयः कर्मत्वेनापरोक्षः इत्यहंपदार्थस्य संविदाश्रयत्वेनात्मत्वादनिदंरूपत्वं नेदमनिदंरूपत्वमिति।

अपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्वमधिकारेऽपेक्ष्यते । अनुपयोगादधिकारविरोधाच्च। प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रं अविद्यावद्विषयत्वं नातिवर्तते । तथाहि—'ब्राह्मणो यजेत' इत्यादीनि शास्त्राणि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते। अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति। तथा देहधर्मान् स्थूलोऽहं कृशोऽहं तिष्ठामि गच्छामि लङ्घयामि चेति। तथेन्द्रियधर्मान् मूकः काणः क्लीबः बधिरः अन्धोऽहमिति। तथान्तः करणधर्मान् कामसङ्कल्पविचिकित्साध्यवसायादीन् । एवमहंप्रत्ययिनं अशेष

---

आदिः येषां आरोपितधर्माणां तदतीतम् तद्धर्मरहितम्। "निष्कलं निष्क्रियं शान्तं" "अस्थूलं अनणु" इत्यादिश्रुतिभिरावेदितम्। असंसार्यात्मतत्वं यत्तद्विषयकनिश्चयो ब्रह्मविद्या सा कर्मपूर्ववृत्तौ कारणभावं न भजते, अनपेक्षितत्वात्, व्याघाताच्च। तस्मादेवमात्मानं जानन् यागादौ न प्रवर्तत एव। किन्तु तद्वैपरीत्येन कर्ताऽहं भोक्ता अहं सुखी दुःखीत्यात्मानं जानन्नेव प्रवर्तते यस्मात् तस्मादविद्यावानेव स भवति। अतः तद्व्यवहारस्याविद्यावत्कर्तृकत्वमेवेति नोक्तानुमानस्य बाधितसाध्यकत्वमिति-न वेदान्तेत्यारभ्याविद्यावद्विषयकत्वं नातिवर्तत इत्यन्तभाष्यस्याभिप्रायः। शास्त्रीयव्यवहारस्याध्यासपूर्वकत्वमेव प्रपञ्चयति-तथ हीति। आदिपदेन राजा राजसूयेन यजेत। अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत। अत एव ब्रह्मचर्यवान्प्रव्रजति। गृहस्थः सदृशीं भार्यां विन्देत्। जातपुत्रः कृष्णकेशोऽग्नीनादधीत इत्यादिविधयो ब्राह्मणत्वाद्यध्यासवन्तं पुरुषमधिकृत्यैव प्रवर्तन्ते अन्यथा ब्राह्मणादिपदोपादानानर्थक्यप्रसङ्गात्। एवं सर्वव्यवहारस्याप्यध्यासपूर्वकत्वे साधिते कोऽयमध्यासो नामेति विस्मृत्य पृच्छन्तं प्रति पूर्वोक्तं स्मारयति-अध्यासो नामेति। तमेवोदाहरणमुखेन प्रपञ्चयति-तद्यथेति। अतिस्थूलधियां दर्शनमनुवदति—पुत्रेति। ततः सूक्ष्मदृशां दर्शनुमनुवदति-तथा देहेति। शिष्टं स्पष्टार्थम्। एतावता प्रबन्धेन प्रतिपादितं अध्यासं बुद्धिसौकर्यार्थं संक्षिप्य दर्शयति—एवमहमिति। अहं प्रत्ययो यस्याऽस्तीति अहं प्रत्ययी अहङ्कारः तं अहंप्रत्ययिन अशेषस्वप्रचारः वृत्तिविशेषाः तत्साक्षिणि प्रत्यगात्मनि अध्यस्य तं च प्रत्यगात्मानमहङ्कारादिषु संसृष्टत्वेषेणाध्यस्यति।

स्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तः करणादिष्वध्यस्यति । एवमयमनादिरनन्तो नैसर्गिको ऽध्यासो मिथ्याप्रत्ययरूप : कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ।

---

ननु न शुद्धात्मा अध्यासकर्ता, शुद्धस्य चिद्धातोः अपरिस्पन्दात्मकस्य कर्तृत्वासंभवात् । अहङ्कारादेः जडतयाऽध्यस्यमानत्वात्प्रागसिद्धेः तत्कर्तृत्वानुपपत्तेः तदुभयविलक्षणस्य चिदाभासस्याप्यध्यस्ताहङ्कारतन्त्रतया अध्यासान्तःपातित्वेन तत्कर्तृत्वानुपपत्तेः । कर्तुरनिश्चयान्मातृत्वादिबन्धस्य सत्यतया ज्ञाननिवर्त्यत्वाभावात् प्रयोजनाद्यभावेन शास्त्रमिदमनारभ्यमेवेति प्राप्ते, प्रत्यक्षसिद्धस्याध्यासस्य अहङ्कारादेः अनिरूपितरूपस्य कर्ताप्यनिरूपितरूप एवावनादिवासनावासितः कश्चित्कल्पनीयः, किमत्र कर्तृस्वरूपपरीक्षया । कर्तृस्वरूपे हि सम्यग्विचार्यमाणे न कर्ता नापि तत्कर्तृकोऽध्यासः तद्धेतुको बन्धो वा, किमपि न सिध्येत् । "न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" इत्यादिश्रुतेः ।

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥

इति भगवद्वचनाच्च । तस्मादविचारितसिद्धिकबन्धहेत्वध्यासस्य तथाविधमेव कर्तारं अधिकृत्य शास्त्रं प्रवर्तत इत्याशयेन पूर्वोक्तमध्यासमुपसंहरति—एवमयमिति । अयं साक्षिसिद्धः अनाद्यविद्याविजृम्भितत्वादनादिः ब्रह्मविद्यामन्तरेण अन्यतोऽनिवृत्तेः अनन्तः नैसर्गिकः विक्षेपशक्तिं विना निमित्तान्तरानपेक्षः । अनेन प्रवाहरूपेणानादित्वमुक्तम् । मिथ्याप्रत्ययः अनिर्वचनीयः प्रत्ययः । रूपं लक्षणं यस्य सः मिथ्याप्रत्ययरूपः । तस्यानर्थहेतुत्वमाह—कर्तृत्वेति । कर्तृत्वभोक्तृत्वप्रवर्तितः । सर्वलोकेति । एकजीवपक्षे सर्वश्चासौ लोकश्चेति विग्रहः । तस्य प्रत्यक्ष इत्यर्थः । नानाजीवपक्षे सर्वे च ते लोकाश्चेति विग्रहः । तेषां प्रत्यक्ष इत्यर्थः । एवं सप्रपञ्चमध्यासं निरूप्य तन्निरूपणफलं शास्त्रारम्भौपयिकमनुबन्धजातं विशदयति--अस्येति । कर्तृत्वाद्यभिमानो हि साक्षादनर्थहेतुः । अस्यानर्थहेतोः प्रकर्षेण हानायोन्मूलनायात्मैकत्वविद्याफलप्राप्तये सर्वे वेदान्ताः तत्करणभूता आरभ्यन्ते । वेदपुरुषेणेति शेषः ।

**अत्रोच्यते।** किं आत्मा चैतन्यप्रकाशः अनुभवो जडप्रकाशः, उत द्वावपि चैतन्यप्रकाशौ, अथ वा अनुभव एव चैतन्यप्रकाशः आत्मा जडरूपः? इति। न तावत् प्रथमः कल्पः। जडरूपे प्रमाणफले विश्वस्यानवभासः। तथा हि। किं प्रकाशमानं चक्षुः साक्षादेवार्थं प्रकाशयतीत्युच्यते। उतानुभवद्वारा। नाद्यः, असिद्धेः। न द्वितीयः। अनुभवस्य साक्षादेवार्थप्रकाशकत्वेन दृष्टान्तवैलक्षण्यात्। अतः प्रदीपवदवभासमान एवानुभवोऽर्थं प्रकाशयति।

**नन्वत्रापि** प्रदीपस्यानुभवद्वारेणैवार्थप्रकाशकत्वात् दृष्टान्तवैलक्षण्यमिति चेत्; न, द्विविधो हि प्रकाशः, तमोनिवृत्तिलक्षणः, अज्ञाननिवृत्तिलक्षणश्च। यद्यपि प्रदीपोऽज्ञाननिवृत्तिलक्षणप्रकाशमनुभवद्वारा करोति। तथापि तमोनिवृत्तिलक्षणं साक्षादेव करोतीति वैलक्षण्यम्। चक्षुस्तूभयमपि न करोति अज्ञानत्वात्। अनालोकत्वाच्च। तस्मादनुभवः सजातीयप्रकाशान्तरनिरपेक्षः प्रकाशमान एव विषये प्रकाशादिव्यवहारनिमित्तं भवितुमर्हति। अव्यवधानेन विषये प्रकाशादिव्यवहारनिमितत्वात् प्रदीपालोकवत्। व्यवहारनिमित्तमित्युक्ते चक्षुरादिवदप्रकाशमानस्य निमित्तत्वेनार्थान्तरम्, तदर्थं **प्रकाशमान** इति। तावत्युक्ते परप्रकाश्यत्वेनार्थान्तरम् तदर्थं **प्रकाशान्तरनिपेक्ष** इति। तावत्युक्ते प्रदीपाद्यपेक्षणात् बाधः, तदर्थं **सजातीयेति**। हेतौ चक्षुषि व्यभिचारवारणार्थं **अव्यवधानेनेति**। न च प्रदीपस्य चक्षुस्सापेक्षस्यैव स्वविषये प्रकाशादिव्यवहारनिमित्तत्वात दृष्टान्तवैलक्षण्यमिति वाच्यम्। प्रदीपः किं तमोनिवृत्तिलक्षणप्रकाशे चक्षुरपेक्षते? उताज्ञाननिवृत्तिलक्षणप्रकाशे। नाद्यः। असिद्धेः। प्रकाशात्मकत्वेन तस्मिन् तमः प्रसक्त्यभावात् प्रदीपस्य स्वयमेव तन्निवृत्तिक्षमत्वाच्च। न द्वितीयः, स्वनिष्ठाज्ञाननिवृत्तौ यद्यपि ज्ञानं अपेक्षते। न तत्सजातीयं प्रदीपस्य। अतो न साध्यवैकल्यम्। तस्मात्सुष्ठूक्तमनुभवस्य अप्रकाशमानत्वे विश्वस्यानवभासप्रसङ्ग इति।

ननु प्रमातृचैतन्यमेव जडानुभवबलात् आत्मानं विषयं चावभासयतीति चेत्; न, चित्प्रकाशस्य विषयसम्बन्धार्थं जडानुभवाङ्गीकारो युज्यते। तदधीनप्रकाशता तु न युज्यते। किञ्च चक्षुरादिवदप्रकाशमानस्यानुभवान्तरद्वारा प्रकाशकत्वमित्यनवस्थाप्रसङ्गः। द्वितीयविकल्पे आत्मापि स्वयमेव प्रकाशते, किमति विषयानुभवमपेक्षते। अथ चैतन्यस्वभावत्वेऽपि पुरुषान्तरसंवेदनवन्नात्मा स्वयं प्रकाश इति चेत्; तस्यानुभवोऽपि स्वयं प्रकाशो न स्यात। तर्ह्यव्यवधानात स्वयं प्रकाशोऽनुभवः। पुरुषान्तरवेदनं तु व्यवधानात न स्वयंप्रकाशमिति चेत्; आत्मन्यपि तुल्यम्। किञ्च उभयोः स्वप्रकाशत्वे परस्परविषयत्वाभावान्मयाऽवगतो घट इति

यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः।

---

समाप्य क्रियास्सर्वाः दाराग्न्याधानपूर्विकाः।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे॥

इत्याचार्यवचनात्। अथवा लूयते केदारः स्वयमेवेत्यादिवद्वेदान्तास्स्वयमेवारभ्यन्ते। अत्र वेदान्तानां ब्रह्मात्मैकत्वं विषयः। तद्विषयिणी विद्या। तत्फलं करणफलयोः एकविषयत्वात् समूलस्य प्रमातृत्वाद्यनर्थस्य निवृत्तिः प्रयोजनम्। मुमुक्षुः अधिकारी। संबन्धश्च पूर्वोक्त एवानुसर्तव्यः। नन्वस्तु वेदान्तानां विषयप्रयोजनमुक्तम्। विचारात्मकस्य शास्त्रस्य किमायातमिति चेत्। उच्यते। वेदान्तानां उक्तविषयादिमत्वे सिद्धे तद्विषयकविचारात्मकशास्त्रस्यापि तदेव विषयप्रयोजनं, व्याख्यानव्याख्येययोः एकार्थत्वनियमादिति। ननु वेदान्तेषु प्राणाद्युपास्तिपरेषु सत्सु कथं ब्रह्मात्मविषया एव वेदान्ता इति चेत् तत्राह—यथेति। सर्वेषामुपास्तिपराणामपि वेदान्तानां निर्विशेषब्रह्मात्मतात्पर्यरूपोऽर्थः सामञ्जस्येन यथोपपद्येत तथा वयं प्रदर्शयिष्याम इत्यन्वयः। केत्याकाङ्क्षायामाह—अस्यामिति। अस्यां व्यासाचार्यकृतसूत्रसन्दर्भरूपायाम्। शरीरमेव शरीरकम्। कुत्सितार्थे कप्रत्ययः। तत्र भवः शारीरकः। तदभिमानीति यावत्। तस्य ब्रह्मात्मविषयिणी मीमांसा। तस्यां सूक्ष्मार्थनिर्णयहेतुविचारात्मिकायामित्यर्थः।

इति प्रथमवर्णकम्।

---

संबन्धावगमो न स्यात्, संबन्धावगमस्य सम्बन्धिविषयत्वनियमात्। विषयत्वे वा स्वप्रकाशत्वक्षतिः। तृतीये विकल्पे अनिच्छितोऽप्यात्मैव चितिप्रकाश अपद्येत।

तथाहि--संवेदनं नाम कर्म वा द्रव्यं वा गुणो वा? नाद्यः। कर्मत्वे प्रकाशत्वानुपपत्तेः। नापि द्वितीयः। तत्राप्यणुपरिमाणत्वे अणुमात्रदेशे विषयावभासप्रसङ्गः। अनन्तपरिमाणत्वे शरीरानवच्छिन्नप्रदेशेऽप्यात्मा प्रकाशेत। मध्यमपरिमाणत्वे सावयवत्वेन अवयवपरतन्त्रता स्यात्। नात्मपरतन्त्रता। नन्ववयवपरतन्त्रत्वेऽपि घटादेः भूतलपरतन्त्रतावदात्मपरतन्त्रतापि स्यादिति चेन्न। आत्मनोऽस्वप्रकाशत्वे प्रदीपेन प्रकाशितमितिवत् मयावगतो घटः इत्यात्मरूपावगतिविषयत्वानुभवः पीड्येत। काष्ठेन प्रकाशितमितिवत् औपचारिकः स्यात्। न च

तद्युज्यते । संवेदनस्य गुणत्वे आत्मैव स्वयंप्रकाशः स्यात् प्रकाशगुणवत्वात् प्रदीपवत् । स च स्वाश्रयोपाधौ न जायते । प्रकाशगुणत्वात् , आदित्यादिप्रकाशगुणवत् इति । तस्य नित्यत्वे स एव न आत्मा । तदतिरिक्तात्मसद्भावे प्रमाणाभावात् ।

ननु विषयानुभवस्य प्रमाणजन्यत्वात् कथं आत्मरूपत्वमिति चेत्, तत्र वक्तव्यम्–किं अनुभवानां स्वरूपस्य प्रमाणजन्यत्वम् ? उत नीलानुभवः पीतानुभव इति विषयोपरक्ताकारानुभवात् तद्विशिष्टस्य ? नाद्यः, तदभावात । न द्वितीयः, विषयोपरागमात्रे प्रमाणव्यापार इति कल्पनं लघीयः, न धर्मिभेदं कल्पयित्वा तत्र प्रमाणजन्यत्वकल्पनं, अनुगमार्थं जातिभेदकल्पनं च । तथा च संविन्नान्तर्गणिकभेदवती उपाधिपरामर्शमन्तरेण अविभाव्यमानभेदत्वात् आकाशवत । तथा चात्मैक एव तत्तद्विषयोपरागवशादनुभवाभिधानीयकं लभते । अविवक्षितोपाधिः आत्मादिशब्दैः अभिधीयते ( अवधिरिति ) । तत्र नाभिधाननिमित्तकदेशावस्थाना इव वृक्षाः वृक्षादिशब्दैः इत्यप्यभ्युपगन्तव्यम् । तथा चेत्थं प्रयोगः । आत्मा अनुभवान्न व्यतिरिच्यते । संवित्कर्मत्वानधिकरणत्वे सत्यपरोक्षत्वात् संवेदनवत् । तथा च स्वप्रकाशानुभवरूपस्यात्मनः कथं परप्रकाश्याहङ्काररूपतेत्यतिरिक्त एवाहङ्कारः ।

ननु नाहङ्कारः परप्रकाश्यः । किन्तु स्वप्रकाशात्मस्वरूपोऽपि विषयानुभवमपेक्ष्याहं इत्युल्लिख्यत इति चेत्; तत्र वक्तव्यम् , किं विषयोपरक्तसप्रतियोगिरूपोऽहङ्कारः ? उत निष्प्रतियोग्यात्मस्वरूपः ? नाद्यः , तस्य प्रतियोगित्वे अनात्मस्वरूपत्वात्तस्य निष्प्रतियोगित्वात् । न द्वितीयः । सुषुप्ते स्वप्रकाशात्मनि भासमानेऽप्यहमित्यनुल्लेखात् । ननु सुषुप्ते स्वरूपेण भासमानेऽपि न तस्योल्लेखः । तस्य प्रतियोगिज्ञानसापेक्षत्वात् । परिमाणस्य द्रव्यग्रहसामग्रीग्राह्यत्वेऽपि दीर्घादिव्यवहारे प्रतियोग्यपेक्षावदिति चेत्; न, तत्राऽपि तज्ज्ञान एव तदपेक्षणात् ! उल्लेखे वा ह्यस्तनाहङ्कारवत् उत्तरकालं अनुसन्धानप्रसङ्गः । अविनाशिनः संस्काराभावादननुसन्धाने ह्यस्तनस्यापि अननुसन्धानप्रसङ्गः । नन्वनुसन्धीयत एव सुखमहं अस्वाप्सं इति सुखानुसन्धानात्तस्य चाश्रयसापेक्षतया अहङ्कारस्तदाश्रयतयाऽनुसन्धीयते । अन्यथा सुखस्याप्यननुसन्धानप्रसङ्गः इति चेत्; न , तव मते सुखस्य विषयजन्यत्वनियमेन तदानीं विषयाभावादेव तदभावात् । परामर्शस्य दुःखाभावविषयत्वात् । दुःखाभावोऽपि प्रतियोगिज्ञानाभावात् नानुभवितुं शक्यत इति न तस्याप्यनुसन्धानमिति चेत् ; तर्ह्युत्थितस्य सुषुप्तौ दुःखकारणाभावप्रतिसन्धानादर्थापत्त्या तत्कल्पनमस्तु, अस्मन्मते तु सुषुप्तावनुभूतसाक्षिस्वरूपसुखस्यानुसन्धानान्न सुखाश्रयतयाहङ्कारसिद्धिः ।

ननु स्वरूपसुखस्याभूततया कथं तद्भानम् । भाने वा जागरणेऽपि तत्प्रसङ्ग इति चेत्, भासत एव परमप्रेमास्पदत्वलक्षणं सुखम् । जागरणे विक्षेपवशात् तीव्रवायुविक्षिप्तप्रदीपवन्न स्पष्टमवभासते । ननु सुखस्यानुभवेऽपि तदनुभवस्य साक्षिणो नाशाभावेन संस्काराभावात् कथमनुसन्धानमिति चेत्; न, सुषुप्तावज्ञानसुखस्वापविषयाविद्यापरिणामो जायते । तत्प्रतिबिम्बितचैतन्यं त्रयस्यावभासकम् । तस्य च स्वरूपतो नाशाभावेऽपि विशिष्टरूपेण नाशात् संस्कारोपपत्तिः । ह्यस्तनाहङ्कारानुसन्धानमप्यहमाकारवृत्तिप्रतिबिम्बितचैतन्यनाशसंस्कारादेवेति न तत्राप्यनुपपत्तिः । तथा चाहङ्कारो नात्मा, असति बाधके तस्मिन्भासमानेप्यभासमानत्वात् अस्वप्रकाशत्वात् घटवदिति न्यायानुगृहीत आगमोऽहङ्कारव्यतिरिक्तमात्मानं साधयति । तथा हि-भूमाख्यब्रह्म प्रकृत्य "स एवाधस्तात्" इत्यादिना तस्य सर्वात्मत्वमुपदिश्य 'अथातोऽहङ्कारादेश " इत्यादिना ब्रह्मणः प्रत्यक्त्वसिद्ध्यर्थं प्राकृतमतिमनुरुध्याहङ्कारसार्वात्म्यं उपदिश्य स्थूलारुन्धतीन्यायेनात्मानमुपदिशति— अथात आत्मादेश इति । अतः पृथक् निर्देशादवगम्यते अहङ्कारात्मनोः भेद इति । ननु यथा जीवपरमात्मनोः पृथक् सार्वात्म्योपदेशः अभेदप्रतिपत्त्यर्थः द्वयोः सर्वात्म्यासम्भवात्, तद्वत् किन्न स्यादिति चेन्न । तत्र भेदस्य प्रमाणान्तरसिद्धत्वादभेदप्रतिपत्त्यर्थः पृथगुपदेश इति युज्यते । अहङ्कारात्मनोस्त्वभेदस्यैव सर्वलोकसिद्धतया पृथगुपदेशो भेदप्रतिपत्त्यर्थ इति युज्यते ।

ननु प्रमाणतः साधितोऽप्यहङ्कारः प्रयोजनाभावात् परित्याज्यः । न चासङ्गाद्वितीये प्रत्यगात्मनि ज्ञानेच्छाप्रयत्नसुखदुःखकामसङ्कल्पादिधर्मोपरागः कर्तृत्वभोक्तृत्वोपरागः उत्क्रान्तिगत्याद्युपरागो भेदोपरागश्च प्रयोजनं; अन्तः करणोपाधिवशात् खल्वेते आत्मनि प्रतिभासन्त इति वाच्यम् । तेषामात्मनि स्वाभाविकत्वात् । किञ्च स्वस्वविषयसम्बद्धेषु इन्द्रियेषु ज्ञानक्रमानुरोधात् क्रमकारि करणं मनः कल्पितम् । न च तज्ज्ञानादिधर्मकं करणत्वात् । तदतिरिक्तं चान्तः करणं न पश्यामः । बुद्धिरिति चेत् । बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरत्वात् । किञ्च यद्यप्यस्य परमेश्वराधिष्ठितानिर्वाच्याविद्योपादानं तथापि स्वरूपं दुर्वचम् । ज्ञानक्रियाशक्त्यात्मकमिति चेत्; न, सुषुप्ते प्राणे क्रियाशक्त्यात्मनि विद्यमानेऽपि " यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन्प्राण एवैकधा भवति " इत्यादिनान्तः करणादिलयाभिधानानुपपत्तेः इति ।

अत्रोच्यते । न तावत्कार्याभावः । असङ्ग आत्मनि कर्तृत्वादिप्रतिभासस्य कार्यत्वात् । न चासङ्गत्वासिद्धिः । 'असङ्गो ह्ययं पुरुष' इत्यादिश्रुतेः । तथा च स्फटिकस्येव जपाकुसुमसन्निधाने लौहित्यं अन्तःकरणसन्निधाने तथैवाऽऽत्मनः कर्तृत्वं दर्पणोपरागे मुखभेदवत्

जीवब्रह्मविभागोऽपि तदुपाधिकः । तथोत्क्रान्तिगत्यादिकमपि क्रियाशक्तिमदन्तः करणोपाधिकम् । करणत्वेन क्लृप्तस्य कथं कर्तृत्वमिति चेत्; न, 'विज्ञानं यज्ञं तनुते' 'विज्ञानेन वा ऋग्वेदं विजानाति'' इति श्रुतिद्वयवशादुभयस्योपपत्तेः । विज्ञानं मनो बुद्धिः इत्यनर्थान्तरत्वात् । ननु चोपलब्धिपर्यायस्य बुद्धिशब्दस्य कथं मनःपर्यायत्वं, उपलब्धिशब्दवाच्यबुद्धेर्गुणत्वात् मनसश्च द्रव्यत्वादिति चेत्; न, 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः' । 'यदा पञ्चैव लीयन्ते ज्ञानानि मनसा सह । बुद्धिश्च नेङ्गत' इत्यादिश्रुतिस्मृतौ गुणक्रियावत्वावगमेन बुद्धेः द्रव्यत्वावगमात् । स धीः स्वप्नो भूत्वेमं लोकं अनुसञ्चरति' 'कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि' इत्यादिश्रुतौ आत्मनः मनआद्युपाधित्वस्य श्रुतत्वाच्च । न च स्वरूपानिरुक्तिः । ज्ञानक्रियाशक्त्यात्मत्वात् । न च प्राणस्यावस्थाने तस्य लयानुपपत्तिः । अन्तःकरणस्य सावयवत्वेन क्रियाशक्त्यंशं विहाय विज्ञानशक्त्यंशस्य लयोपपत्तेः । तथा चात्मनि प्रतीयमानं कर्तृत्वादिकं मिथ्या,क्लृप्तप्रतीतिसत्ताकारणाभावात् । स्फटिकलौहित्यवत् । न च दृष्टान्तासिद्धिः स्फटिकलौहित्यं मिथ्या,क्लृप्तप्रतीतिसत्ताकारणाभावात्, व्यतिरेकेण घटवत् ।

नन्वसिद्धिः ; तथा हि—स्फटिकप्रतिस्खलिता नायनरश्मयः स्फटिकरूपमगृहीत्वा द्रव्यमात्रं गृहीत्वा जपाकुसुममुपसर्पेयुः ; तदीयरूपमात्रं गृहीत्वा तस्य विलक्षणधर्मिनिष्ठतया अग्रहणात् लोहितःस्फटिक इति व्यवहारं जनयन्तीति चेत् ; न, संयुक्तसमवायेन रूपग्रहे संयोगेन द्रव्यग्रहस्याप्यवश्यंभावेन विलक्षणधर्मिनिष्ठतया अग्रहणासिद्धेः । न च दोषवशात् द्रव्यस्याग्रहणम् । प्रत्यक्षतो जपाकुसुमे रूपविशिष्टतया गृह्यमाणे लोहितः स्फटिक इति व्यवहाराभावप्रसङ्गात् । ननु पद्मरागादेरिव जपाकुसुमादेरपि प्रभास्ति । सा स्फटिकसमीपं गता लौहितत्वेनैव गृह्यत इति लोहितः स्फटिक इति व्यवहार इति चेत्; किं प्रभैव लोहिता अवभासते । उत स्फटिकमपि । आद्ये, स्फटिकशौक्ल्यमपि भासेत । द्वितीये अन्यथाख्यातिप्रसङ्गः । विरोधिगुणया प्रभया अपसारितं तदिति चेत् ; तर्हि नीरूपः कथं चाक्षुषः स्यात् । प्रभासन्निधानात् तत्र लौहित्योत्पत्तौ तदपायेऽपि स्फटिकं लोहितमवभासेत । तादृश्यां प्रभायां मानाभावाच्च । अन्यथाख्यातौ अत्र प्रतिपन्नस्य लौहित्यसंसर्गस्यासत्वात् क्लृप्तप्रतीतिकारणाभावः ।

नन्वन्तः करणसन्निधानात् तन्निष्ठं कर्तृत्वं आत्मनि भासते । उत कर्तृत्वान्तरमुत्पद्यत इति । प्रथमे, स्फटिकलौहित्यन्न दृष्टान्तः , द्वितीये कर्तृद्वयभानप्रसङ्ग इति चेन्न । उभयथाप्युपपत्तेः । प्रथमे कर्तृत्वविशिष्टस्यान्तः करणस्यैक्याध्यासादन्तःकरणे भानमेव तत्र भानमिति

न विरोधः । द्वितीयेऽप्यैक्याध्यासादैक्यभानोपपत्तिः । ननु स्फटिकलौहित्योदाहरणेनैव कर्तृत्वाद्यध्यासैक्यसिद्धौ बिम्बप्रतिबिम्बोदाहरणेन जलचन्द्रवदित्यादिवेदान्तविहितेन किं प्रयोजनमिति चेत्; न, तत्वमसीति वाक्यार्थब्रह्मात्मैक्यस्य बिम्बप्रतिबिम्बन्यायेनोपपत्तिः प्रयोजनम् ।

ननु प्रत्यङ्मुखत्वादिविरुद्धधर्माध्यस्तयोः बिम्बप्रतिबिम्बयोः कथमैक्यमिति चेत् ; किमेकत्वे प्रमाणं पृच्छ्यते । उत भेदः सिषाधयिषितः ? नाद्यः , मदीयं मुखमिति प्रत्यभिज्ञानस्य प्रमाणत्वात् । न द्वितीयः । भेदप्रत्ययस्य कल्पितभेदविषयत्वात । न च भेदप्रत्ययात् प्रत्यभिज्ञानस्यैवान्यविषयत्वम् । भेदप्रत्ययस्यासंभावितविषयत्वात् । तथाहि—किं बिम्बसन्निधाने मुखान्तरमुत्पद्यते । उत प्रतिमुद्रा । नाद्यः । बिम्बापायेऽपि मुखोपलम्भप्रसङ्गात् । न च हस्तसंयोगापाये कटविवरणापायवन्निमित्तबिम्बापाये प्रतिबिम्बापायः । तत्र हि चिरसंवेष्टनाहितसंस्कारलब्धसंवेष्टनलक्षणविरोधिकार्यवशात प्रसरणापायः, न निमित्तापायात् । अन्यथा चिरं प्रसरणानुवृत्तावपि पुनः संवेष्टनप्रसङ्गात् । न च कमलमुकुलविलासपरिणतिनिमित्तसावित्रतेजसोऽपाये विकासापायवत् किन्न स्यात ; रात्रेः दिवसस्य समत्वे दिवसस्याधिक्त्वे वा मुकुलसंस्कारभूयस्त्वाभावादिति वाच्यम् । तत्रापि प्रथमतरमुकुलताहेतुपार्थिवाप्यावयवैरेव मुकुलावस्थोत्पत्तौ विकासावस्थापायः, न निमित्तापायात । अन्यथा जीर्णस्यापि पुनः मुकुलतापत्तेः । न द्वितीयः, तत्र हि मुद्राप्रतिमुद्रयोः समपरिमाणत्वं संश्लेषश्च दृश्यते । न तदुभयमत्रास्ति ।

नन्वभेदप्रत्ययस्याप्यसंभावितविषयत्वान्मिथ्यात्वम् । तथाहि—मूर्तद्रव्यमेकमेकस्वभावं युगपद्विच्छिन्नदेशद्वये सर्वात्मनानुभूयमानं न क्वचित्परमार्थं दृष्टम् । इह तु ग्रीवास्थं मुखं दर्पणे समकालमनुभूयमानं कथं परमार्थं स्यात् । अत्र मूर्तमित्याकाशव्यावृत्यर्थम् । तस्य च परममहत्परिमाणशून्यत्वमर्थः । द्रव्यमिति सामान्यव्यावृत्यर्थम् । अनेकव्यावृत्त्यर्थं एकमिति । अवयविनोऽवयवेषु वृत्तिं व्यावर्तयितुं विच्छिन्नदेशद्वय इति । अवयवी तु संश्लिष्टावयवेषु वर्तत इति तद्व्यावृत्तिः । वंशद्रव्यस्यावयवशोऽनेकत्र वृत्तिं व्यावर्तयितुं सर्वात्मनेति । तथा चाभेदप्रत्ययस्याप्यसंभावितविषयत्वात् शुक्तिरूप्यवत् दर्पणमुखस्यानिर्वचनीयत्वं त्वयाऽङ्गीकर्तुं युक्तम् । अथवा दर्पणप्रतिस्फालिता नायनरश्मयः परावृत्य स्वमुखं गृहीत्वा अविवेकात् दर्पणे मुखमिति व्यवहारं जनयन्ति । अन्यथा स्वमुखस्य इन्द्रियासन्निकृष्टत्वेन प्रत्यक्षत्वाभावात् प्रत्यक्षप्रत्यभिज्ञापि अनुपपन्नेत्यख्यातिवादिनो मतं वा युक्तं अङ्गीकर्तुं इति चेत ।

अत्रोच्यते—यद्येकत्वादिलक्षणस्य विच्छिन्नदेशावभासोऽनुपपन्नः तर्हि सः मायाविजृम्भितोऽस्तु । तावता प्रत्यभिज्ञासिद्धं एकत्वं कथं अपह्नूयेत । न च स्वमुखस्यासन्नि-

कृष्टत्वात् प्रत्यभिज्ञानुपपत्तिः। किं सर्वावयवावच्छेदेन सन्निकर्षाभावः। उतैकदेशावच्छेदेनापि। नाद्यः। घटादिप्रत्यक्षेऽपि तस्यासंभवात्। न द्वितीयः। नासाद्यवच्छेदेन संयोगसम्भवात्। यदप्युक्तम् प्रतिबिम्बस्यानिर्वचनीयत्वमिति। तथा सति नेदं रजतमितिवन्नेदं मुखमिति स्वरूपेण बाधः स्यात्। न तथा दृश्यते। किन्तु नात्र मुखमिति दर्पणसंसर्ग एव बाध्यत इति तस्यैव मिथ्यात्वम्। ननु तर्हि तत्वमसिवाक्यार्थे नायं दृष्टान्तः तत्र कर्तृत्वादिविशिष्टजीवस्वरूपलयं विना ब्रह्मभावलक्षणोक्त्यनुपपत्तेः तत्वमसीतिसामानाधिकरण्यस्य यश्चोरः स स्थाणुरितिवत् बाधायामप्युपपन्नत्वमिति चेत्। न, चोरस्थाण्वो रैक्यानुपपत्तेः तत्र तथाऽस्तु। अत्र विरुद्धांशपरित्यागेन स्वरूपस्यैक्यात् मुख्यमेव सामानाधिकरण्यम्। अख्यातिवादिदर्पणगतत्वेन भासमानं पुरुषान्तरवदात्मानं निरीक्षमाणं मुखं ग्रीवास्थमेवेति वदन् कथमाप्तः स्यात्। ननु प्रतिबिम्बस्य विच्छेदाभासोऽज्ञानविजृम्भित इत्युक्तम्; तदनुपपन्नम्। यावतोर्ध्वाग्रो वृक्षो विस्पष्टं अवभासमानोऽधोग्रो जले प्रतीयते। न तत्रोर्ध्वाग्रत्वाज्ञानमस्तीति वदतीति चेत्; न तत्रोर्ध्वग्रत्वाज्ञानविजृम्भितो भ्रमः। किन्तु ऊर्ध्वाग्राधोग्रयो रैक्यावच्छिन्नचैतन्याज्ञानविजृम्भितः। ऐक्यापरोक्षज्ञानं च नास्ति। उपाधिना प्रतिबन्धात्। तदवगमे च तन्निवृत्तिः।

ननु तर्हि जीवब्रह्मविभागस्याप्युपाध्यपगमादेव निवृत्तिः स्यात्। तदपगमश्च दर्पणाद्यपगमवत् कर्मवशादिति तत्वज्ञानं मुधैव स्यादिति चेत्। न, तत्रोपाधेः अन्तःकरणस्य निवर्त्याज्ञानकार्यत्वेन तेन सह निवृत्युपपत्तेः। प्रातिभासिकविच्छेदहेत्वज्ञानस्य दर्पणाद्यनुपादानत्वाद्दर्पणादेः तत्वज्ञानप्रतिबन्धकत्वमेव न तन्निवर्त्यत्वमिति विशेषः। ननु जीवो न भ्रमनिवर्तकतत्वज्ञानाश्रयः प्रतिबिम्बत्वात्। दर्पणादिगतप्रतिबिम्बवत् ब्रह्मैव तु तादृश ज्ञानाश्रयं बिम्बत्वात् देवदत्तवत्; न, आद्ये दर्पणादिगतप्रतिबिम्बस्य जडत्वेन बिम्बात्मताज्ञानायोग्यत्वं उपाधिः। द्वितीये भ्रमनिवर्तकतत्वज्ञानाश्रयत्वे भ्रान्तत्वं उपाधिः। ननु ब्रह्म जीवात्मतामात्मनो जानाति; वा नवा? न चेत् सर्वज्ञताहानिः। जानाति चेत् तदीयदुःखादिप्रसङ्ग इति चेत्; न, तथात्वं जानन्नपि तत्वज्ञानित्वान्नानुशोचति। देवदत्त इव दर्पणादौ मुखमालिन्यादिकं पश्यन्निति। न च जीवस्य प्रतिबिम्बत्वे प्रमाणाभावः। यथा ह्ययं ज्योतिरात्मा विवस्वान्” इति श्रुतेः “एकधा बहुधा चैव दृश्यते जलचन्द्रवत्” इति स्मृतेश्च प्रमाणत्वात्।

नन्वाकाशस्य घटवच्छेदानवच्छेदाभ्यां भेदवदन्तः करणावच्छेदानवच्छेदाभ्यां जीवब्रह्मणोः भेदः किन्न स्यादिति चेत्; तथात्वेऽण्डान्तर्वर्तिचैतन्यस्य समष्टिव्यष्ट्युपाधिभ्यां

जीवभावेनावच्छिन्नत्वादनवच्छिन्नं ब्रह्माण्डात् बहिरेव स्यात्। तथा च तस्य सर्वगतत्वसर्वोपादानत्वसर्वनियन्तृत्वाद्यनुपपत्तिः। न च तत्सर्वं स्वरूपापेक्षया, न बिम्बभूतब्रह्मापेक्षयेति वाच्यम्। "य आत्मनि तिष्ठन्नात्मानं अन्तरो यमयति" इति जीवव्यतिरिक्तस्यैव तत्रस्थस्य नियन्तृत्वश्रवणात्। प्रतिबिम्बपक्षे तु जलान्तरावस्थितबिम्बाकाशे सत्येव साभ्रनक्षत्रप्रतिबिम्बाकाशवत् द्विगुणीकृत्य वृत्तिरुपपद्यते। ननु दर्पणादौ मुखप्रतिबिम्बवत् स्फटिके लौहित्यप्रतिबिम्बः किं न स्यात्; तद्वदेव बिम्बप्रतिबिम्बैक्ये स्फटिकलौहित्यं कथमनिर्वचनीयं स्यात्। कथं वा आत्मनि कर्तृत्वस्य मिथ्यात्वसिद्धिः। उदाहरणद्वयवैयर्थ्यं चेति चेत्; किं लौहित्यमात्रं प्रतिबिम्बते। उत कुसुमादिद्रव्यं रूपविशिष्टम्। नाद्यः। सन्निध्यविशेषे आश्रयं विना रूपमात्रस्य प्रतिबिम्बानुपपत्तेः। न हि रूपमात्रं क्वचित्प्रतिबिम्बितं दृष्टम्। इह दर्शनस्यानिर्वचनीयलौहित्येनाप्युपपत्तेः।

ननु मुखेऽप्येवं वक्तुं शक्यम्। न हि गुरुत्वविनाकृतस्य स्पार्शनत्वादिविनाकृतस्य च प्रतिबिम्बितत्वं संभवति, प्रतिपत्तेः अनिर्वचनीयमुखोत्पत्याप्युपपत्तेः इति। नैष दोषः। दर्पणे मुखप्रतिबिम्ब इत्यस्यायमर्थः दर्पणप्रतिस्फालितैः परावृत्तनायनरश्मिभिः ग्रीवास्थमेव मुखं रूपादिविशिष्टतया गृह्यमाणं दर्पणस्थत्वेन भिन्नत्वेन च ज्ञायते इति। अत एव न स्पार्शनत्वं, स्पर्शनेन्द्रियस्य तत्र व्यापाराभावात्। अत एव उक्तं आचार्यैः—"दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम्। व्याप्नुवन्नाभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम्" इति।

अत एव नासाद्यवच्छिन्नस्य इन्द्रियसंयोगकल्पनाक्लेशोऽपि न भवति। स्फटिकलौहित्ये तु रूपग्राहकनायनरश्मीनां द्रव्यग्राहकत्वनियमान्न रूपमात्रप्रतिबिम्बः संभवति। नापि द्रव्यविशिष्टस्य प्रतिबिम्ब इति द्वितीयः पक्षः संभवति। द्रव्यविशेषापरिज्ञानेऽपि लोहितः स्फटिक इति व्यवहारात् अनिर्वचनीयं लौहित्यं इत्यलमतिप्रसङ्गेन।

नन्वविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमित्यत्राऽविद्या विभाजकोपाधिरुक्ता। अत्र त्वन्तःकरणं इति पूर्वापरविरोधः। उभयोरुपाधित्वे जीवभेदप्रसङ्गात्। जागरिते सुखमहं अस्वाप्समिति परामर्शो न स्यादिति चेत्; न, अज्ञानान्तःकरणस्थूलशरीराणां पूर्वपूर्वोपाधियुक्तानां भेदकत्वात्। स्वातन्त्र्येण भेदकत्वाभावात् नोक्तदोषप्रसङ्गः। न चानेकोपाधिवैयर्थ्यम्। स्पष्टस्पष्टतरस्पष्टतमव्यवहारहेतुत्वेन सार्थकत्वात्। ननु सुषुप्तौ कथं जीवब्रह्मविभागः? तस्य भ्रान्तिलक्षणत्वात्। सुषुप्तौ "नाहं ईश्वर" इति भ्रान्त्यभावात्। अविभागे वा कथं सुषुप्तस्य पुनरुत्थानं? अभ्रान्तिलक्षणत्वे वा ब्रह्मात्मतालक्षणो मोक्षःकथमिति चेत्;

अन्तः करणादिकृतो विभागो भुवि भ्रमगतः। न त्वविद्याकृतः। तथा च सुषुप्तौ न विभागानुपपत्तिः तस्य चानादित्वेऽप्यविद्याप्रयुक्तत्वादविद्यासंबन्धवत् ज्ञानेनाज्ञानविवृत्तौ निवृत्तिः ब्रह्मात्मता-लक्षणमोक्षश्चोपपद्यते ।

**ननु** उक्तोदाहरणद्वयेन कर्तृत्वविभागाद्यध्याससिद्धावपि नाहङ्काराध्यासः सिद्ध्यति । तत्राधिष्ठानाध्यस्यमानव्यतिरेकेण परमार्थस्योपाधेः असंभवादिति चेत्; न, रज्ज्वां सर्पबुद्धे-रेवोदाहरणत्वात् । तत्राध्यास्यमानाधिष्ठानपूर्वानुभवसंस्कारव्यतिरेकेण कस्यचिदुपाधेरभावात् । अहङ्काराध्यासस्य प्रवाहानादित्वेन पूर्वानुभवसंस्कारस्येहापि सत्वात् । नन्वात्मनि कर्तृत्व-विभागादीनां स्वाभाविकत्वमेवास्तु । किं उदाहरणत्रयेणारोपितत्ववर्णनेन । न च "असङ्गो ह्ययं पुरुष" इत्यादिश्रुतेः न कर्तृत्वादेः स्वाभाविकत्वमिति वाच्यम् । तादृशो-दाहरणाभावेनासङ्गत्वस्य स्तुतिपरत्वादिति चेत्, न, घटाकाशोदाहरणस्य सत्वात् । तथाहि— आकाशस्य हि न स्वतो भेदः अस्ति, तथाऽपि घटोपाधिवशात् प्रतीयते घटाकाशो मठाकाशात् भिन्न इति । तस्य च घटोपाधिप्रयुक्तत्वमपि स्पष्टं प्रतीयते घटाकाश इति । तथा स्थूल-सूक्ष्मत्वलक्षणं रूपमपि प्रतीयते—घटाकाशो मठाकाशात् सूक्ष्म इति । सहस्रपदार्थावकाशादि-लक्षणं कार्यमपि दृश्यते । घटाकाशो मठाकाशः इति संज्ञाभेदश्च । एतेषां घटोपाधिपरा-मर्शपूर्वकप्रतीतित्वादेतैरसम्बन्धलक्षणमसङ्गत्वं आकाशस्य स्पष्टम् । स्फटिकादौ लौहित्यादि-संबन्धस्य नोपाधिपरामर्शपूर्वकप्रतीतित्वं इत्यस्पष्टत्वमसङ्गित्वस्येत्युदाहरणान्तरमुक्तम् ।

**ननु** कर्तृत्वादेः औपाधिकत्वं अयुक्तम् । स्वाभाविकत्वोपपत्तेः । न चाविकारत्वश्रुतेः नात्मनः स्वाभाविकं कर्तृत्वमिति वाच्यम् । प्रमातृत्वार्थं विकारित्वस्य अवश्यवाच्यत्वेनाविकारित्व-श्रुतेः स्तुतिमात्रपरत्वात् । **तथाहि**, किमात्मनः प्रमातृत्वम् , उतान्तः करणस्य ? अद्येऽपि किं प्रमाणं प्रति कर्तृत्वं, उत नित्यप्रमाश्रयत्वम् ? आद्ये विकारित्वमावश्यकम् । अन्त्ये स्वरूपचैतन्यस्य सर्वगतत्वेन सर्वावभासप्रसङ्गः । नाप्यहङ्कारस्य प्रमातृत्वं जडत्वात् । तथा चाविकारित्वे प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोग्यलक्षणसर्वव्यवहारोच्छेद इति चेत्; न परमार्थतः प्रमातृत्वादिव्यवस्थापि । अन्तःकरणोपाधिवशात् प्रमां प्रति कर्तृत्वं कर्मव्यवस्था चोपपद्यते ।

तथा हि—सर्वगतमपि चैतन्यं अविद्यावृतं न विषयं प्रकाशयति । असङ्गित्वाच्च न विषयेण स्वतः संबध्यते । यदा तु सावयवं तैजसं अन्तःकरणं अदृष्टेन्द्रियार्थसन्निकर्षसहाय ध्रुवादिविषयपर्यन्तं दीर्घप्रभाकारेण परिणमते तदा परिणामद्वारा ज्ञातृज्ञेयभावेन विषय-

संसृष्टमन्तःकरणं स्वनिष्ठं विषयसंबन्धं चैतन्ये आदधाति यावत्परिणामं चैतन्यमपि अभिव्यनक्ति। विषये स्वनिष्ठचैतन्याभिव्यञ्जकत्वमप्यादधाति। अभिव्यञ्जकत्वाच्चान्तःकरणं तत्परिणामो विषयश्चेति सर्वं चैतन्येनावभास्यते। तथा चान्तःकरणावच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्याश्रयत्वरूपप्रमाकर्तृत्वात् प्रमातेत्युच्यते। वृत्त्यवच्छिन्नं तु प्रमाणम्। वृत्तिसंसृष्टविषयावच्छिन्नं फलम्। तथा च यद्विषयावच्छिन्नचैतन्यस्यान्तःकरणपरिणामद्वारा यः प्रमातृचैतन्याभेदः स तस्य विषयः, नान्यः। न चान्तःकरणस्य तादृशपरिणामे प्रमाणाभावः 'ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति धीशब्दवाच्यज्ञानपरिणामवन्मनसः श्रुतिसिद्धत्वात्।

नन्वसङ्गस्यात्मनो विषयेण संबन्धार्था वृत्तिरित्ययुक्तम्। असङ्गत्वादेवान्तःकरणसंबन्धस्याप्यनुपपत्तेः। नन्वन्तःकरणप्रतिबिम्बो जीवः परिच्छिन्नः। तस्य विषयस्थचैतन्येऽनेकोपाध्यवच्छेदप्रयुक्तभेदे सम्बन्धार्था वृत्तिरिति चेत्; न, विषयावच्छिन्नचैतन्यस्य बिम्बचैतन्यत्वेन तदभेदे तन्निष्ठसर्वज्ञत्वादिभानप्रसङ्गात्। अभाने वा तदध्यस्तविषयस्याप्यभानप्रसङ्गात्। नन्वविद्याप्रतिबिम्बो जीवः सर्वगतोऽप्यविद्यावृतत्वान्न प्रकाशते। अन्तःकरणवृत्त्या आवरणाभिभवे च प्रकाशते प्रकाशयति चार्थमिति चेत्; न, अन्तःकरणस्याविद्याकार्यत्वेन कारणाभिभावकत्वानुपपत्तेः इति।

अत्रोच्यते। सर्वगतमपि चैतन्यं पदार्थान्तरेष्वसङ्गस्वभावमप्यन्तःकरणेन संबध्यत एव। सर्वसर्वगता जातिरिति पक्षे यथा गोत्वादयः सर्वत्र स्थिता अपि व्यक्तिविशेषेष्वेव संबध्यन्ते। एवं चैतन्यमपि स्वभावविशेषात्। अन्तःकरणावच्छिन्नपक्षेऽपि नानुपपत्तिः। न च घटाद्याकारान्तःकरणवृत्त्या विषयावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदेनाभिव्यक्तत्वात् ब्रह्मगतसर्वज्ञानादिसाङ्कर्यं ब्रह्मणो नित्यवत्प्रकाशश्च प्रसज्येतेति वाच्यम्। कल्पितभेदवशान्मुखावदातत्वादिवद्व्यवस्थोपपत्तेः। ब्रह्माकारान्तः करणवृत्त्यभावाच्च न ब्रह्मणः तत्सार्वज्ञ्यादेश्च भानप्रसङ्गः। सर्वस्यापरोक्षत्वे तत्तदाकारवृत्तेः प्रयोजकत्वात्। अन्यथा जीवगतधर्माधर्मादेः प्रत्यक्षत्वप्रसङ्गात्। जीवस्याप्यहमाकारवृत्तिदशायामेव अपरोक्षत्वम्।

आवरणाभिभवार्था वा वृत्तिः। न च कार्यस्य कारणाभिभावकत्वं न दृष्टम्। वृश्चिकवृक्षादीनां गोमयमृदादिकारणस्वभावतिरोधायकत्वदर्शनात्। अतो नास्मत्पक्षे प्रतिकर्मव्यवस्थानुपपत्तिः। किञ्च आत्मनो विकारित्वपक्ष एव सा। तथाहि—सर्वगतात्मवादिनां मते ज्ञानं गुणो वा क्रिया वा उभयथाऽपि स्वाश्रयसंयुक्ते सर्वत्र स्वोचितातिशयजनकत्वप्रसंगः। प्रदी-

पादिनिष्ठप्रकाशकगुणे इषुनिष्ठक्रियायां च स्वाश्रयसंयुक्तप्रकाशनभेदनाद्यतिशयजनकत्वदर्शनात् । न वाऽदृष्टवशान्नियमः । दृष्टकारणपौष्कल्ये तस्य अनियामकत्वात् । ननु स्वाश्रयसाक्षात्संबन्धो न नियामकः । किन्तु स्वाश्रयात्मसंयुक्तमनस्संयुक्तेन्द्रियसंयुक्तेऽर्थे ज्ञानं अतिशयं जनयतीति चेत्; तर्हि तत्संयुक्तस्याप्यवभासप्रसङ्गात् नियामकाभावात् । अतः स्वाश्रयसंयुक्त एवाऽतिशयं जनयतीति वक्तव्यम् । तथा चातिप्रसङ्गः । न चाभिचारक्रियायाः स्वाश्रयासंयुक्ते मरणहेतुत्वं दृष्टमिति वाच्यम् । तत्र तदाराधितस्य परमेश्वरस्यैव मरणहेतुत्वात् । मध्यमपरिमाणात्मवादे तस्य बाह्यपदार्थसंसर्गाभावात् बाह्यघटादेरनवभासप्रसङ्गः । असंसृष्टस्यापि भाने सर्वभानप्रसङ्गः । एवमणुपरिमाणात्मवादेऽपीत्यलमतिप्रसङ्गेन ।

ननु प्रमातृचैतन्याभेदेनाभिव्यक्तविषयचैतन्यतादात्म्याद्विषयभाने विज्ञानवादिपक्षः समर्थितः स्यादिति चेन्न । यत्किञ्चित्साम्यात्साङ्कर्ये सर्वसिद्धान्तसङ्करः स्यात् । सर्वसाम्यं तु नास्त्येव । विज्ञानवादी तु क्षणिकाद्विज्ञानात् भेदेनार्थक्रियावन्नीलादिवस्तु नास्तीति वदति । वेदवादिनस्तु अद्वितीयात् संवेदनात् भेदेनार्थक्रियासमर्थं वस्त्वस्तीति वर्णयन्ति । न च तत्र प्रमाणाभावः । घटसंवित् पटसंविदिति घटादिषु व्यावर्तमानेष्वपि संवित्स्वरूपमनुवृत्तमेव प्रतीयते । तथा च प्रयोगः । अनुवृत्तं व्यावृत्ताद्भिन्नं अनुवृत्तत्वात् । कुसुमेभ्यः सूत्रवत् ।

किञ्च विज्ञानवादिभिरप्यनुभवबलात् संवित्संवेद्ययोः अभेदो वक्तव्यः, उतानुमानात् ? नाद्यः । अहं नीलं पश्यामीति कर्मकर्तृरूपेण भेदानुभवात् । न चाहमित्येकं ज्ञानं नीलं इत्यपरं, जानामीति च अपरं ज्ञानमिति वाच्यम् । ज्ञानयौगपद्यानङ्गीकारात् । क्रमिकत्वे मयेदं विदितमिति संबन्धावगमानुभवविरोधात् । नापि द्वितीयः । अनुमानं ह्येवम्—विमतं नीलादि संविदभिन्नं संबन्धान्तराभावे सति संविदि भासमानत्वात् संवेदनवत् । न चासिद्धिः । विमतं संयोगादिसंबन्धान्तराभाववत् व्यापारशून्यत्वात् । न च तत्राप्यसिद्धिः । स्थायिनः खलु व्यापारवत्ता सम्भवति । न क्षणिकस्य । संवेदनं तु क्षणिकम् । न च तत्र प्रमाणाभावः, प्रत्यक्षस्यैव प्रमाणत्वात् । वर्तमानमात्रावगाहि विज्ञानं विषयस्याप्यवर्तमानताव्यावृत्तिद्वारा क्षणिकत्वं गमयति । नीलविशिष्टज्ञानमिवाऽनीलव्यावृत्तिद्वारा पीतादिव्यावृत्तिमिति । भवेदेवं यदि क्षणिकत्वं प्रत्यक्षं भवेत् तदेव न । तथात्वे संविदां स्वगतो भेदः खण्डमुण्डादिवद्भासते न वा ? नाद्यः, अनुभवविरोधात् । न द्वितीयः । भेदाभावे कथं क्षणिकत्वं अध्यक्षं स्यात् । अतिसादृश्यात् भेदो न भासत इति चेत्; किं

संविदां स्वरूपमेव [भेदः तज्ज्ञानमेव] भेदज्ञानमित्युच्यते । किं वा धर्मिप्रतियोगिसंविद्भ्या-मन्यो ज्ञानान्तरगम्यश्चेति । नाद्यः । संविद्रूपभेदस्याऽभाने संविदोऽप्यभानात् जगदान्ध्य-प्रसङ्गः । न द्वितीयः; भेदज्ञानस्य धर्मिप्रतियोगिसंविद्विषयत्वे संविदः स्वप्रकाशत्वक्षतिः । धर्मिप्रतियोगिसंविदोः भेदस्य च तत्र कल्पितत्वं तदभिन्नत्वं च स्यात् । यो यद्विषयः सः तत्र कल्पितः, तदभिन्नश्चेत्यभ्युपगमात् । अविषयत्वे च विशिष्टभेदासिद्धिप्रसङ्गः । किञ्च भेदसिद्धौ सादृश्यसिद्धिः । भिन्नयोरेकत्वभ्रमस्य सादृश्यकल्पकत्वात । सादृश्यसिद्धौ च तेन प्रति-बन्धात् सतोऽपि भेदस्याभानमिति तत्सिद्धिरिति परस्पराश्रयप्रसङ्गः । प्रत्यभिज्ञानविरोधश्च ।

ननु प्रत्यभिज्ञा ज्ञानद्वयमेव । न त्वेकं ज्ञानं, तत्र कारणानिरूपणात । न तावदिन्द्रियं कारणम् । तस्य असन्निकृष्टपूर्वदेशकालादावसामर्थ्यात् । नाऽपि संस्कारः । तस्यानु-भूतमात्रविषयत्वेन [ए]तद्देशकालादावसामर्थ्यात् । नाप्युभयम् । तथात्वे प्रत्यभिज्ञानस्य प्रत्यक्षत्वस्मृतित्वाभ्यां दुर्निरूपत्वप्रसङ्ग इति चेत्; न, मिलितयोः कारणत्वेऽपीन्द्रियजन्यत्वा-दपरोक्षत्वोपपत्तेः । न च संस्कारजन्यत्वात स्मृतित्वम् । संस्कारमात्रजन्यत्वस्यैव तत्प्रयोज-कत्वात् । नन्वेवं अनात्मनि प्रत्यभिज्ञासम्भवेऽप्यात्मनि सा न सम्भवति । तत्र किं स्वरूपज्ञानमेव प्रत्यभिज्ञा । उत तदतिरिक्तं संस्कारजन्यं ज्ञानान्तरम् ? नाद्यः । स्वरूपस्य प्रदीपादिवद्वर्तमानमात्रप्रकाशत्वेन पूर्वकालसंबन्धाभानप्रसङ्गात् । न द्वितीयः, स्वप्रकाश-त्वादेव स्वविषयज्ञानान्तराभावेन तन्नाशजनितसंस्काराभावात् । अत एव इदानींतनप्रमाण-कारणाभावात् नात्मनि प्रत्यभिज्ञानमिति । नैष दोषः । किं परमात्मनि प्रत्यभिज्ञानं संभवतीत्युच्यते । उत जीवात्मनि । नाद्यः । तस्य 'अजो नित्यः शाश्वतः' इत्याद्या-गमवशादेव स्थायित्वसिद्धौ प्रत्यभिज्ञानानपेक्षणात् । न द्वितीयः । पूर्वकालीनाहृ-माकारवृत्तिनाशजनितसंस्कारसध्रीचीनान्तः करणेन पूर्वापरकालविशिष्टात्मप्रत्यभिज्ञोपपत्तेः ।

नन्वात्मनः प्रत्यभिज्ञाविषयत्वे कर्तृकर्मविरोधः । न च देहः स्वव्यतिरिक्तद्रष्टृकः दृश्य-त्वात इत्यनुमानविषयस्य सर्वसंप्रतिपन्नत्वाद्विरोध एव नास्तीति वाच्यम् । अनुमाने विषयस्यातीता-दिरूपत्वेनाकारकत्वात् आकारार्पकत्वमात्रेण विषयत्वव्यपदेशः । प्रत्यक्षे तु विषयस्य कार-कत्वात् विरोधस्स्यादेवेति चेत्; न, अन्तःकरणविशिष्टत्वेन कर्तृत्वं पूर्वापरकालविशिष्टत्वेन कर्मत्वमित्यवच्छेदकभेदेन अविरोधोपपत्तेः । प्रभाकरास्तु कर्मकर्तृविरोधादेव प्रत्यभिज्ञाविषय-त्वेन नात्मनः स्थायित्वम् । किन्तु प्रत्यभिज्ञाश्रयत्वेनेत्याहुः । तन्न, प्रत्यभिज्ञायाः क्षणि-कत्वेन तदाश्रयतया क्षणमात्रसम्बन्ध आत्मनः सिध्येत्, न पूर्वकालसम्बन्धः ।

नन्वनुभूतं मयेति ज्ञानस्य स्मर्यमाणत्वात् इदानींतनस्मरणाश्रयत्वेनैतत्कालीनात्मसिद्धिः। स्मर्यमाणानुभवाश्रयत्वेन तस्य पूर्वकालसंबन्धसिद्धिरिति चेत्; न, अनुभवस्मरणाश्रययोः पूर्वोत्तरकालसंबन्धसिद्धावपि प्रत्यभिज्ञाविषयत्वाभावे तयोरैक्यं कुतः सिद्ध्येत्। किञ्चानुभूतं मयेति अनुभवकालीनात्मप्रधानानुभवाश्रयत्वेन तस्य परप्रकाश्यत्वे तद्बलादात्मसिध्यनुपपत्तेः। अन्यथा धर्माद्याश्रयत्वेनाप्यात्मसिद्धिः स्यात्। ततो यत्किञ्चिदेतत्। अतः सादृश्यस्याप्रामाणिकत्वात्तत्प्रतिबन्धात् स्वगतविशेषानुपलम्भस्य वक्तुमशक्यत्वात्, प्रत्यभिज्ञाविरोधाच्च न क्षणिकत्वं संविदां प्रत्यक्षम्। नाप्यनुमेयम्। अनुमानं ह्येवं—घटादीनां अन्त्यक्षणावच्छिन्न सत्वं स्वाव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगि दृष्टम्। तथा च पूर्वपूर्वक्षणावच्छिन्नसत्वमपि स्वाव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगि सत्वात अन्त्यक्षणावच्छिन्नसत्ववत्। अथवा सर्वे भावाः क्षणिकाः अर्थक्रियाकारित्वात्। यदक्षणिकं न तत् अर्थक्रियाकारि यथा शशशृङ्गमिति। तत्र नाद्यानुमानं संभवति। आभासतुल्यत्वात् घटाभावावच्छेदकत्वेनाभिमतः क्षणः घटसत्तावच्छेदकः क्षणत्वात् सत्तावच्छेदकक्षणवत् इति। अत्र प्रत्यक्षबाधितत्वात् नानुमानं इति यदि, तर्हि अत्रापि प्रत्यभिज्ञया बाधितत्वान्नानुमानमिति तुल्यम्। नापि द्वितीयं अनुमानं क्षणिकत्वसाधकम्, स्थायित्वेऽप्यर्थक्रियाकारित्वसंभवेनाप्रयोजकत्वात्।

ननु न स्थायिनः अर्थक्रिया संभवति। तथा हि—स तां सातत्येन वा कुर्यात्। किं वा यावज्जीवकृत्यं युगपदेव। न तावदाद्यः। समर्थस्य क्षेपायोगात् प्रथमक्षण एवैककार्यवत्सर्वं कुर्यात्। न द्वितीयः। सकृत्कृत्वोपरतस्य पुनः अर्थक्रियाकारित्वाभावेनासत्वप्रसङ्गात्। अर्थक्रियाकारित्वलक्षणत्वात् सत्वस्येति चेन्न। अर्थक्रियाकारित्वस्यैव त्वन्मते दुर्वचत्वेन सत्वस्य तल्लक्षणत्वानुपपत्तेः। तत्किं स्वविषयज्ञानजनकत्वं? स्वसन्तानपतितज्ञाने विषयतया जनकत्वाभावेऽपि सन्तानान्तरपतितज्ञाने विषयत्वाज्जनकत्वं इति चेत्; सन्तानान्तरं किं संसारिणः। उत सर्वज्ञस्य? नाद्यः। तस्य सन्तानान्तरज्ञानविषयप्रत्यक्षाभावेन तत्र विषयतया जनकत्वाभावात्। अनुमितिसंभवेऽपि तत्र विषयस्याजनकत्वात्। न द्वितीयः, सर्वज्ञज्ञान ( वत् )स्य संसारिज्ञानविषयाविषयप्रत्यक्षत्वे तदीयोपप्लवैः दूषितत्वं तदभिन्नत्वं च स्यात्। यो यद्विषयः स तदभिन्न इत्यभ्युपगमात्। नापि स्वसन्तानपतितज्ञानान्तरजनकत्वम्। चरमज्ञानस्यार्थक्रियाकारित्वाभावेनासत्वे पूर्वेषामपि ज्ञानानां तेनैव न्यायेनासत्वप्रसङ्गात्। तस्मान्नार्थक्रियाकारित्वलक्षणं सत्वम्। किन्तु स्वरूपमेव। तच्च सर्वदास्तीति सकृत्कृत्वोपरतस्यापि नासत्वप्रसङ्गः। नापि स्थायिनः क्रमकारित्वानुपपत्तिः। समर्थस्यापि सहकारिविशेषापेक्षया क्रमकारित्वोपपत्तेरित्यलमतिप्रसङ्गेन।

किञ्च तवापि मते वह्निस्वलक्षणधूमस्वलक्षणयोः न कार्यकारणभावग्रहः। तयोः-क्षणमात्रापवर्गिणोः अन्वयव्यतिरेककालावस्थानाभावात्। किन्तु वह्निधूमसन्तानयोः। तथा च वह्निसन्तानपतितात् अङ्गारावस्थवह्नेः कुतो न धूमजन्म। काष्ठस्वलक्षणाभावादिति चेत्; न, तस्यापि स्वसन्ताने सत्वात्। तस्य सन्निधानाभावादिति चेत्; यथा तव सन्तानस्य स्थायित्वेऽपि कादाचित्कसहकारिसन्निधाने जनकत्वं अन्यथाऽजनकत्वम्; एवं मम व्यक्तेः स्थायित्वेऽपि क्रमिकसहकारिसन्निधानापेक्षया क्रमकारित्वं उपपद्यते। ननु विषयस्य चैतन्याभिन्नत्वेऽप्यवान्तरवैलक्षण्यादपसिद्धान्तप्रसङ्गाभावेऽपि विषयस्यापि चैतन्याभिव्यञ्जकत्वेनापरोक्षत्वे अनुमेयादिष्वपि चैतन्याभिव्यञ्जकत्वं अपरोक्षत्वं च स्यादिति चेत्; न, अनुमेयादेः अनुमितिकाले अवर्तमानत्वेनेन्द्रियसन्निकर्षद्वारान्तःकरणनिर्गमनाभावेन तत्सम्बन्धप्रयुक्तव्यञ्जकत्वानुपपत्तेः। ज्ञानस्य वह्न्याकारत्वं त्विन्द्रियसन्निकृष्टधूमेनाविनाभावसबन्धेनाप्युपपद्यते।

नन्वसत्प्रत्ययविषयत्वेऽपि नात्मनोऽधिष्ठानत्वम्। आरोप्येण सहैकेन्द्रियग्राह्यत्वस्य शुक्त्यादावधिष्ठानत्वव्यापकत्वेन दृष्टस्याभावादिति चेत्; न, आत्मनोऽपरोक्षत्वात्तावन्मात्रेणैवाधिष्ठानत्वोपपत्तेः। न चापरोक्षत्वमसिद्धम्। प्रकारान्तरेण प्रत्यगात्मप्रसिद्धेरनुपपत्तेः। किं अन्तःकरणे चित्प्रतिबिम्बः तथाविधबिम्बपुरस्सरः, प्रतिबिम्बत्वात् दर्पणे मुखप्रतिबिम्बवदिति तत्सिद्धिः, उत स्वप्रकाशसंविदाश्रयत्वेन आहो मनस्संयोगजज्ञानान्तरेण? नाद्यः, आत्मनोऽप्रत्यक्षत्वे मयाऽवगतो घट इति संबन्धावगमः प्रत्यक्षो न स्यात। तथा च स्वसंविदितपरसंविदितयोः विशेषाभावात् सर्वं सर्वस्यावभासेत। न भासेत वा। ननु संबन्धावगमाभावेऽपि घटनिष्ठप्राकट्यरूपफलस्य यदीयज्ञानजन्यत्वं तं प्रति सोऽपरोक्ष इति चेत्; न, मया अवगतो घट इति सम्बन्धावगमस्य अनुभवसिद्धस्याऽऽत्मनो अभावे अभावप्रसङ्गात्, ज्ञानस्य तदीयत्वासिद्धेः। आत्मभानं च न ज्ञाततजनकज्ञानाश्रयत्वेनानुमानात् तथापि प्रत्यक्षसम्बन्धावगमे अभानप्रसङ्गात्। ज्ञाततायाः विषयगतायाः सर्वसाधारण्येन पुरुषविशेषज्ञानानुमानं, तद्वाराऽऽत्मविशेषसिद्धिश्च न स्यात। न द्वितीयः, संवित्कर्मत्वाभावे तत्र भानानुपपत्तेः अन्यथा अतिप्रसङ्गात्। न तृतीयः। येन मनसंयोगेन विषयज्ञानमजनि तेनैव तत्सम्बन्धावगमोऽपि, उत संयोगान्तरेण? आद्ये असमवायिकारणभेदाभावात ज्ञानभेदो न स्यात्। द्वितीये क्रियाविभागादिन्यायेन द्वितीयसंयोगसमये पूर्वज्ञानस्य नष्टत्वेन तत्संबन्धावगमानुपपत्तेः तस्मात परिशेषात् स्वप्रकाशत्वेनापरोक्षे आत्मन्यध्याससिद्धिः।

ननूक्तविधया यद्यपि प्रत्यगात्मन्यपि अध्यासः सम्भवति। तथाऽपि तत्र प्रमाणं वक्तव्यम्। न हि सम्भावनामात्रात् प्रमाणमन्तरेणार्थसिद्धिः इति चेन्न! अस्मन्मते साक्षिरूपानु-

भवसिद्धत्वात् देहेन्द्रियाद्यध्यासस्य न प्रमाणान्तरापेक्षा। विप्रतिपन्नं प्रत्यनुमानं अर्थापत्तिर्वा सम्भवति। तथाहि—देवदत्तस्य जाग्रत्स्वप्नकालौ तस्यैव कर्तुः करणभूतदेहेन्द्रियादिष्व-हम्ममाभिमानपुरस्सरप्रमातृत्वादिव्यवहारवन्तौ। तस्यैव सुषुप्तिकालादन्यकालत्वात्। यन्नैवं तन्नैवम्। यथा तस्यैव सुषुप्तिकालः। यद्वा प्रमात्रादिनवविधो व्यवहारः उक्तरूपाध्यासं विना अनुपपद्यमानोऽध्यासं गमयति। अत्र व्यतिरेकव्याप्तिप्रदर्शनार्थं **न हीन्द्रियाण्यनुपादाय प्रमातृत्वादिव्यवहार** इत्यादि भाष्यम्।

ननु प्रमात्रादिव्यवहारसिध्यर्थमात्मनः देहादिना कश्चित्सम्बन्धो वक्तव्यः। नाध्यासः। स च स्वस्वामिभावादिः अन्य एव अस्त्विति चेत्; न तावत्स्वस्वामिभावसम्बन्धो व्यवहारनिमित्तम्। भृत्यादिशरीरेऽपि प्रसङ्गात्। इच्छानुविधायित्वमिति चेत्। किं इच्छानुविधानयोग्यत्वं उतेच्छानुविधीयमानत्वम्। नाद्यः। सुषुप्तेऽपि प्रसङ्गात्। न द्वितीयः, अत्यातुरस्य स्वशरीरेऽपि तदभावात्। संयोगसमवाययोः सर्वशरीरसाधारण्यात्। भोक्तृ-भोग्यत्वस्य कर्मारभ्यत्वस्येऽन्द्रियाधिष्ठेयत्वादीनां अध्यासाधीनत्वात्। तस्मात्परिशेषात् अध्या-साधीनत्वसिद्धिः। नन्वध्यासाधीनत्वे वा सर्वगतस्याऽऽत्मनः सर्वशरीरसंबन्धात् कथं एकत्रैव प्रमातृत्वादिव्यवहारः, नान्यत्र। उच्यते। अविद्याध्यासः तावत् अनादित्वान्न पर्यनुयोज्यः। तदारब्धत्वात् लिङ्गशरीरे, तत्संश्लेषात् स्थूलशरीरे चाध्यासव्यवहारनियमयोः उपपत्तेः। ननु प्रमाणानां अविद्यावदाश्रयत्वे आश्रयदोषेण दुष्टत्वात् अप्रमाणत्वम्। नैष दोषः। किं अविद्याख्यो दोषोऽभिप्रेतः। उतान्यः। नाद्यः, तस्याद्वितीयात्मावभासप्रति-बन्धेन द्वैतावभासनिमित्तत्वादात्मतत्वं प्रति दोषत्वेऽपि प्रपञ्चावभासं प्रत्यनुकूलत्वेनादोषत्वात्। प्रमाणकारणे सति तत्प्रतिबन्धकत्वेन पश्चाद्भवन् दोष इत्युच्यते, न तु पूर्वमेव तत्कारणत्वेन विद्यमानः। न द्वितीयः, अन्यस्यादर्शनात्।

नन्वविवेकिव्यवहारस्त्वध्यासपूर्वकः, न विवेकिव्यवहारः। ततः कथं व्यवहार-स्याऽध्यासनिमित्तत्वं तत्रैव व्यभिचारादिति चेत्। किं विवेकशब्देन पश्वाद्यपेक्षया प्रकृष्टमतयः पुरुषाः उच्यन्ते। उत शास्त्रीयव्यवहारयोग्यदेहव्यतिरिक्तात्मज्ञानवन्तः? नाद्यः। पश्वादि-तुल्यव्यवहारतया तद्वदेवाध्यासपूर्वकत्वानुमानात्। न द्वितीयः, देहव्यतिरिक्तात्मज्ञानेऽप्य-शनायाद्यतीतात्मतत्वप्रतिपत्त्या तद्व्यवहारस्यापि अध्यासपुरस्सरत्वोपपत्तेः। तथाहि —यद्यपि अदृष्टार्थप्रवृत्त्यनुपपत्त्या देहातिरिक्तात्मज्ञानं अस्ति, तथाऽपि तत्परोक्षं नाध्यासनिवृत्तिक्षमम्। अन्तः करणात्तु व्यतिरेकज्ञानं नापेक्षितमेव। तथा च शास्त्रीयव्यवहारस्याप्यन्तःकरणाध्यास-प्रयुक्तकर्तृत्वभोक्तृत्वाधीनत्वात् अध्यासपुरस्सरत्वम्। अतो ब्रह्मात्मैकत्वविज्ञानात् प्राक् प्रवर्तमानं

शास्त्रं अविद्यावद्विषयत्वं नातिवर्तते । किञ्च ब्राह्मणो यजेत इत्यादिशास्त्रमपि विधेः वोढारं ब्राह्मणादिशब्दैः अनुवददध्यासे प्रमाणम् ।

नन्वात्मनः अपरोक्षत्वात् अन्तःकरणस्याणुपरिमाणत्वेनानुमेयत्वात् कथं ऐक्याध्यासः । एकबुध्युपारूढत्वाभावात् । तथा हि—आत्मनः सर्वविषयसन्निधाने क्रमकार्योत्पादः क्रमकारिसाधारणकरणापेक्षः, सन्निहितबहुविषयस्य कर्तुः क्रमेण कार्योत्पादत्वात् सन्निहितबहुच्छेद्यस्य देवदत्तस्य कुठारसापेक्षक्रमभेदनवत् । अर्थापत्त्या वा तत्सिद्धिः । आत्मेन्द्रियविषयेषु समवहितेषु ज्ञानोत्पत्तिक्रमान्यथानुपपत्त्या क्रमकारि मनः कल्प्यत इति । अत्रोच्यते । न तावदनुमानं सम्भवति मनसः प्रतीन्द्रियव्यापारे क्रमवर्तिनि साधारणकरणकरणान्तरशून्येऽनैकान्तिकत्वात् । फलस्य वृक्षात्पततः क्रमवर्तिन्याकाशसंयोगे कुठारादिव्यापारे चानैकान्तिकत्वात् । नाप्यर्थापत्तिः । आत्मन एव क्रमकरणसामर्थ्यादन्यथोपपत्तेः । द्रव्यान्तरं कल्पयित्वा तस्य क्रमकरणसामर्थ्यकल्पनाद्वरं क्लृप्तात्मन एव तादृशसामर्थ्यकल्पनात् । नापि शास्त्रान्मनःसिद्धिः । शास्त्रश्रवणहीनानामपि मम मनोऽन्यत्र गतमित्यादिप्रतीतेः । तस्मात् साक्षिवेद्यं मन इत्येकबुध्युपारूढत्वाद्युक्तोऽध्यासः ।

ननु यद्यात्मन्यन्तःकरणाध्यासः तदा आत्मस्वरूपं नावभासेत । शुक्तिस्वरूपवत् । यदि तत्परिहारायात्मनोऽप्यनात्मनि देहेन्द्रियादौ अध्यासः उच्येत तर्ह्यात्मनः मिथ्यात्वं रजतवत्स्यात् अनात्मनश्च पारमार्थिकत्वं शुक्तिवत्स्यादिति चेत्; न, इतरेतराध्यासाङ्गीकारात् न द्वयोरप्यभानप्रसक्तिः । अध्यस्यमानस्य विशेषतो भाननियमात् । न च पारमार्थिकत्वमनात्मनः, अबाध्यत्वप्रयुक्तत्वात्तस्य । अनात्मनश्च नेह नानास्तीति बाध्यत्वात् । न च आत्मनः मिथ्यात्वप्रसङ्गः । संसृष्टरूपेणेष्टत्वात् । स्वरूपतस्तु बाधाभावेनामिथ्यात्वोपपत्तेः । एतदभिप्रेत्योक्तं **तं च प्रत्यगात्मानं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति** । एवं अध्यासे लक्षणसम्भावनासद्भावप्रमाणैः सिद्धेः शास्त्रीयविषयप्रयोजनसिद्धिरिति प्रदर्शनार्थं **अस्याऽनर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति** भाष्यम् । नन्वनर्थप्रहाणायेति वक्तव्यम्; किमिदं उच्यते हेतोः प्रहाणायेति । नैष दोषः । हेतोः प्रहाण्या हि हेतुमतः अनर्थस्य प्रहाणिरात्यन्तिकी भवतीति तदुपादानात् ।

नन्वध्यासोऽनादित्वादात्मवन्न निवर्तयितुं शक्यः । अनादित्वेऽपि 'भिद्यते हृदयग्रन्थिः' इत्यादिश्रुतिप्रामाण्यात् निवर्तत इति चेत्; श्रुतेरपि न्यायविरोधे उपचरितार्थत्वोपपत्तेः इति । अत्रोच्यते; न तावल्लोकदृष्टचैतदुच्यते लोके प्रागभावस्यानादेरपि निवृत्तिदर्शनात् ।

नापि वादिदृष्ट्या, मीमांसकमते धर्मतत्वज्ञानेन तदज्ञाननिवृत्तेः । सुगतमते अनादिवासनाया-श्चतुर्विधभावनाप्रकर्षान्निवृत्तेः । साङ्ख्यानामपि प्रकृतिपुरुषविवेकात् तदविवेकनिवृत्तेः । अनादि-भावस्य न निवृत्तिः लोके व्याप्तिदर्शनादिति चेन्न; ज्ञानादज्ञाननिवृत्तिरिति विशेषव्याप्तया तस्याः सामान्यव्याप्तेः बाधात् । ननु तरति शोकमात्मविदित्यादिशास्त्रादनर्थनिवृत्तेः प्रयो-जनत्वे ब्रह्म वेद ब्रह्मैव भवति इत्यादिशास्त्रात् ब्रह्मावाप्तेरपि प्रयोजनत्वात् ब्रह्मावाप्तये इत्यपि वक्तव्यम् । न चाऽऽत्मैकत्वविद्याप्रतिपत्तय इत्यनेन ब्रह्मात्मैक्यस्य विषयत्वनिर्देशे पुरुषाकाङ्क्षा-वशात् अर्थात् प्रयोजनत्वमपि तस्य सिध्यति । अतो न पृथङ्निर्देशः इति वाच्यम् । तर्हि ब्रह्मात्मैक्यस्य विद्यात्वप्रतिपादकशास्त्रेणैव जीवब्रह्मगतप्रपञ्चाभावस्यार्थसिद्धत्वादनर्थानिवृत्तिरपि न पृथग्वक्तव्येति चेत्; न, किं ब्रह्मणि स्वाभाविकप्रपञ्चाभावोऽर्थसिद्धः इत्युच्यते, उत जीवे प्रपञ्चप्रतिभासनिवृत्तिः ? नाद्यः । तस्य स्वतःसिद्धत्वेन शास्त्रप्रयोजनत्वाभावात् । न द्वितीयः । तत्रापि किं निवृत्तिरूपत्वमसिद्धम् । उत तज्ज्ञानम् ? नाद्यः, प्रतिभासनिवृत्तिं विनापि ब्रह्मात्मैक्यप्रतिपादनसम्भवात् वाक्यार्थप्रतिपत्त्युत्तरकालीनत्वात् प्रतिभासनिवृत्तेः । न द्वितीयः, न ह्युत्तरकालीनानर्थप्रतिभासनिवृत्तिमात्रादिदानीं तदवगमं विना श्रवणादौ प्रवृत्तिः सम्भवति । तत्प्रतिपादकशब्दाभावे विषयप्रदर्शनमात्रात् तस्यासंवृत्तेः । अतो युक्तमुक्त-मस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तय इति ।

ननु प्रपञ्चप्रतिभासे विरोधिनि जाग्रति कथमैक्यं जीवब्रह्मणोः प्रत्येतुं शक्यम् । नैष दोषः । किं ब्रह्मणि वियदादिप्रपञ्चप्रतिभास ऐक्यबुद्धिं विरुणद्धि । उत जीवे कर्तृत्वादि-प्रपञ्चप्रतिभासः ? नाद्यः । ब्रह्मणि वियदादिप्रपञ्चग्राहि प्रमाणं किं प्रत्यक्षम् उतागमः ? नाद्यः, प्रत्यक्षस्य ब्रह्मागोचरत्वेन प्रपञ्चब्रह्मसंबन्धागोचरत्वात् । न द्वितीयः । तत्रापि किं "इदं सर्वं यदयमात्मा" इत्यादिनिर्विशेषप्रकरणपठितं वाक्यं ब्रह्मणि प्रपञ्चप्रापकं उत ब्रह्मणो जगदुपादानत्वप्रतिपादकवाक्यं उत सर्वकर्मा सर्वकाम इत्याद्युपासनाप्रकरणपठितं ? नाद्यः, तस्योपादानत्वश्रुतिसामर्थ्यसिद्धसार्वात्म्यानुवादेनास्थूलादिवाक्यापेक्षितप्रतियोगिसमर्पकत्वेन प्रतिषेधं प्रत्यङ्गभूतस्य तद्बाधकत्वानुपपत्तेः । न च उपजीव्यविरोधात अस्थूलवाक्यार्थाप्रतिपत्तिः । प्रपञ्चमात्रस्योपजीव्यत्वेऽपि तत्पारमार्थिकत्वस्यानुपजीव्यत्वात् । पारमार्थिकत्वेनास्थूलादिनिषेध-वाक्यार्थप्रतिपत्तिसम्भवात । रजतज्ञानोपजीवि 'नेदं रजतं' इति ज्ञानवत । न द्वितीयः । उपादनत्वश्रुतिसामर्थ्यस्य साक्षाच्छ्रुतिविरोधे अप्रमाणत्वात् । न तृतीयः, उपासनापराणां स्वातन्त्र्येणार्थप्रतिपादकत्वानुपपत्तेः । उपासनस्यारोपितरूपेणाप्युपपन्नत्वात् । नाप्याद्यद्वितीयः । जीवे कर्तृत्वादेः प्रमाणसिद्धत्वाभावात् । न तावदनुमानादिगम्यः कर्तृत्वादिप्रपञ्चः । अपरोक्षत्वात् ।

नापि चक्षुरादिबाह्येन्द्रियगम्यः। तस्य तदयोग्यत्वात्। अन्तः करणस्य तद्ग्राहकत्वे प्रमाणाभावात। सत्यन्तः करणे भानादसति चाभानादन्वयव्यतिरेकौ प्रमाणमिति चेत्; तयोः कर्तृत्वादिस्वरूपोपक्षीणत्वेन तज्ज्ञानकारणत्वाभावात्। अतः शुक्तिरजतादिवत्साक्षिमात्रभास्यत्वेन प्रमाणसिद्धत्वाभावान्निष्परिपन्थ्यागमादैक्यसिद्धिः; अनर्थनिवृत्तिस्त्वर्थात सिध्यति।

ननु सर्वो व्यापारः स्वविषयमेव साधयति, इषुक्रियावत; तत्कथमनर्थनिवृत्तेरैक्यवाक्यात्सिद्धिः? तस्य तदगोचरत्वात्। 'सदेव सौम्येदं' इत्यादिषु नेदं रजतमितिवत् नञाद्यभावेन साक्षादसामर्थ्यात। सामर्थ्ये वा सापि न पृथग्वक्तव्येति चेन्न। बाधकज्ञानं ह्यारोपिते द्विप्रकारं दृश्यते। किञ्चिन्निषेधमात्रविषयम्। यथा नेदं रजतमिति। किञ्चित्तु वस्तुतत्वविषयम्। यथा इयं शुक्तिरिति। तज्जनकं वाक्यमपि द्विप्रकारम्। किञ्चिन्नञ्युक्तम्। किञ्चित् तदयुक्तम्। सदेव सौम्येत्याद्यैक्यवाक्ये नञ्पदाभावेन साक्षान्निषेधासंस्पर्शित्वेऽपि तुलोन्नमनव्यापारेणानमनस्येवार्थात सिद्धिः। न हि तुलोन्नमनव्यापारस्यानमनेऽपि जनकत्वम्। तथा लोकेऽप्रसिद्धेः। तद्वत् प्रकृतेऽपि आरोपगृहीतं वस्तु तन्निरासादृते तत्वतः न निर्णेतुं शक्यं इत्यर्थात तन्निवृत्तिरपि सिध्यति। अत एव वस्तुतत्वबोधिशुक्त्यादिज्ञानात नान्तरीयकतया निषेधसिद्धेः नेदं रजतमित्याद्यनुवादः। अनर्थनिवृत्तेः साक्षादप्रतिपाद्यत्वेन प्रयोजनभाष्ये पृथङ्निर्देश्यता च युक्तेति। अत एव यजतिचोदना द्रव्यदेवताक्रियमभिदधाति। न क्रियामात्रम्। क्रियामात्रेऽभिहितेऽप्याकाङ्क्षाया अनिवृत्तेः। द्रव्यदेवताक्रियाणां समुदायेऽभिहिते आकाङ्क्षोपरमात पदान्तराणि नियमाय अनुवादाय वेति नान्तरीयकार्थसिद्धिरुक्ता "यजतिचोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात" इत्यत्र। अनर्थहेतोः प्रहाणायेति चतुर्थीप्रयोगोऽपि वेदान्तानां ज्ञानद्वारा तत्प्रयोजकत्वात् उपपद्यते।

ननु तथाप्यात्मैकत्वविद्यायै इत्येवास्तु। प्रतिपत्तिशब्दः किमर्थः? न हि विद्या घटादिवत्तटस्था सिद्ध्यति। येन तत्प्रातिवचनं प्रतिपत्तिशब्दस्स्यात। किन्तु वेदितृाश्रया वेद्यं तस्मै प्रकाशयन्त्येवोदेति। अतो व्यर्थः प्रतिपत्तिशब्दः। न च वेदान्तवाक्याज्जातमपि ज्ञानं ब्रह्मात्मविषयं अतिसूक्ष्मविषयत्वादसम्भावनया विपरीतभावनया चास्कन्दितमुन्मज्जननिमज्जनमिवानुभवदप्राप्तमिव भवति। अतो दृढप्रतिपत्त्यर्थः प्रतिपत्तिशब्द इति वाच्यम्। विचारात्मकतर्कसाचिव्याज्जाताया दृढप्रतिपत्तेरेव विद्याशब्दार्थत्वे तत एव तत्सिद्धेः। न च स्वतः प्रामाण्यविरोधः शब्दस्य तर्कसापेक्षत्वे प्रसज्यत इति वाच्यम्। स्वत एव प्रमाजननशक्तस्य शब्दस्य विपरीतशङ्कारूपप्रतिबन्धिनिवृत्तिमात्रोपयोगित्वात्तर्काणां न स्वतः प्रामाण्यविरोधः।

नन्ु प्रामाण्यस्य स्वतस्त्वसिद्धौ तद्विरोधशङ्का । तदेव कुतः । संशयानुपपत्तेस्तुल्यत्वात् । तस्याप्रामाण्यवत्परतस्त्वं किं न स्यादिति । तत्र वक्तव्यम्—किमुत्पत्तौ परतस्त्वम्, उत ज्ञप्तौ? आहो उभयत्र । नाद्यः । तद्धि ज्ञानसामान्यसामग्र्यतिरिक्तोत्पाद्यत्वम् । तत्किमन्वयव्यतिरेकगम्यम्, उत प्रमाणान्तरगम्यम्? नाद्यः ज्ञानसामग्र्यामपि प्रमानुत्पादस्य अप्रमाकारणदोषरूपप्रतिबन्धकविषयत्वेन कारणान्तराविषयत्वात् । न च तत एव प्रतिबन्धकाभावकारणविषयत्वं, अभावस्याकारणत्वात् । न द्वितीयः । तदभावात् । नापि प्रामाण्यस्य ज्ञानग्राहकातिरिक्तग्राह्यत्वम् । उत्पन्नज्ञानमात्रात् प्रामाण्यानिश्चये प्रवृत्त्यभावप्रसङ्गात् । अतिरिक्तमपि किं गुणजन्यत्वज्ञानं, उतार्थक्रियासंवादज्ञानम् । नाद्यः । तस्यापि गुणान्तरजन्यत्वं तस्य तस्यापीत्यनवस्थाप्रसङ्गात् । न द्वितीयः । प्रामाण्यनिश्चयाधीनप्रवृत्त्युत्तरकालीनत्वादर्थक्रियासंवादस्येत्यलमतिप्रसङ्गेन । अत एव नोभयं परतः । अतो वेदान्तवाक्यानां तर्कसापेक्षत्वेऽपि प्रामाण्यपरतस्त्वाभावात्तज्जन्यज्ञानस्य विद्याशब्देनैवाभिहितत्वात् प्रतिपत्तिशब्दो व्यर्थ इति ।

अत्रोच्यते । यद्यपि वेदान्तवाक्यादुत्पन्नं ज्ञानं अपरोक्षब्रह्माकारत्वादपरोक्षमेव भवति । तथाऽपि चित्तस्यानैकाग्रतादोषात् परोक्षमिव भवति । विषयेण सहापरोक्ष्यं प्रतिपत्तिशब्देनोच्यते । अतो न तस्य वैय्यर्थ्यम् । तादृशप्रतिपत्त्यर्थत्वेन च यज्ञादीनां शमादीनां मनननिदिध्यासनयोश्च विधानाद्यज्ञादिनिबर्हितकल्मषं शमादिनिरुद्धविपरीतप्रतिपत्तिकं मननसन्दर्शितप्रमेयादिसम्भावनागुणप्रदीपोज्ज्वलितं निदिध्यासनप्रचयपरिनिर्मितब्रह्मात्मैकाग्रताकं चित्तदर्पणं ब्रह्मापरोक्षताभिव्यक्तिक्षमं वेदान्तानां ब्रह्मणि शक्तितात्पर्यावधारणभाजामद्वितीयब्रह्मात्मज्ञानं जनयतामितिकर्तव्यतास्थाने निपतति । अतः तत्संपत्तौ विचारादुत्पन्नं स्फुटं अपरोक्षमविद्यानिवृत्तिक्षमं भवति । तदभिप्रायेण उक्तं—**विद्याप्रतिपत्तय इति** ।

ननु वेदान्तश्रवणस्यैव शक्तितात्पर्यावधारणापरपर्यायस्य मननस्वरूपोपकारितया तदङ्गत्वम् तद्द्वारा च निदिध्यासनाङ्गत्वम् । निदिध्यासनमेव प्रधानं ब्रह्मात्मतासाक्षात्कारे इति चेन्न ; प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानेन फलवत्त्वात् । तत्सन्निधौ श्रूयमाणं मननादिकं तदपेक्षोत्पत्तिकमपि अप्रमाणत्वेन चित्तैकाग्र्यादिव्यवधानेन च स्वयं अफलत्वात्तदङ्गत्वेनावतिष्ठत इति न दोषः । ननु ब्रह्मज्ञाने सत्यपि यथापूर्वं संसारदर्शनात् जीवन्मुक्तिशास्त्राच्च कथं तस्यानर्थहेतुप्रहाणार्थत्वम् । नैष दोषः । निवृत्तेऽप्यज्ञाने तत्संस्कारस्य प्रारब्धभोगसंपादनपटीयसः सक्लेशस्य वा कल्पनात् । ननु न सर्ववेदान्ता आत्मैकत्वविद्याप्रतिपत्तय

आरभ्यन्ते। उपासनापराणामपि तत्र तत्र बहुलं उपलब्धेरिति; उच्यते, वेदान्तानामद्वितीयब्रह्मप्रतिपत्त्येकपराणां स्वरूपतो निर्विशेषस्य प्रतिपादयितुमशक्यत्वात् अध्यारोपापवादन्यायेन प्रतिपादयितुं प्रवृत्तानां तदर्थं जगत्कारणत्वप्रतिपादनेन सार्वात्म्यं ब्रह्मणः प्रतिपादयतां अनिराकृत्यैव प्रपञ्चं उपासनामपि प्रसङ्गाद्विदधतां आत्मैकत्वविद्याप्रतिपत्त्यर्थत्वमस्ति, दर्शपूर्णमासार्थानामिव वाक्यानां प्रसङ्गात् गोदोहनं पश्वर्थतया विदधतामित्यदोषः।

नन्वाश्रित्य विधाने गोदोहनवदधिकृताधिकारत्वात् मोक्षकामस्यैवोपासनास्वप्यधिकारप्रसङ्ग इति चेन्न। अप्प्रणयनस्योद्दिश्यमानत्वात्। यथाप्राप्तस्य च तस्योद्देशाद्दर्शपूर्णमासाधिकारिण एव तत्प्राप्तमिति तदनुवादेन गोदोहनविधानमपि तस्यैवेत्यधिकृताधिकारत्वं युज्यते। वेदान्त–वाक्यात् सप्रपञ्चप्रतिपत्तिस्तु मुमुक्षोरमुमुक्षोश्चाविशेषेण भवतीति मुमुक्षोरुपासनाफलादपि ब्रह्मलोकात् निर्विण्णत्वादमुमुक्षुविषयं उपासनाविधानम्। ननु वेदान्तानां यद्यनर्थनिवृत्तिः प्रयोजनं स्यात् तदा तद्विचारशास्त्रस्यापि तत्प्रयोजनं भवेत् तदेव कुत इति चेत्; उच्यते, श्रोतव्य इति तव्यप्रत्ययादिष्टसाधनत्वेऽभिहिते किं तदिष्टं इत्यपेक्षायां अधिकारिविशेषणमोक्षः फलत्वेन सम्बध्यते। स चानर्थनिवृत्तिरिति विचारशास्त्रस्यापि तदेव प्रयोजनम्।

नन्विष्टसाधनत्वं न विध्यर्थः। तथा सति तस्य भावार्थरूपप्रकृत्यर्थेऽन्वयो वक्तव्यः। स नोपपद्यते। स्वर्गरूपेष्टं प्रति किं साक्षात् साधनत्वम्। उत परम्परया? नाद्यः। आशुविनाशिनः कालान्तरभाविस्वर्गसाधनत्वानुपपत्तेः। नापि परम्परया। परम्पराघटकानु–पस्थितेः। न च साक्षात्परम्परौदासीन्येन साधनत्वमात्रान्वयः। यावद्विशेषबाधे सामान्यस्याभावात्। किञ्च इष्टसाधनत्वस्य लिङाभिधाने ज्योतिष्टोमेनेत्यत्र तृतीया नोपपद्यते। तिङ्कृत्तद्धितसमासैः अनभिहिते हि करणकारके तृतीया विहिता। अतो नियोग एव कार्यत्वेन विध्यर्थः। तस्य च नियोज्यविषयसाकाङ्क्षत्वात् स्वर्गकामो नियोज्यत्वेन संबध्यते। यागो विषयत्वेन। यागस्य च स्वर्गकामनियोगविषयत्वं नियोज्याभिलषितसाधनत्वं विनाऽनुपपन्न इति तदर्थात् सिध्यतीति चेत्।

अत्रोच्यते। साधनत्वं विना किं नियोगस्वरूपं अनुपपन्नम्। उत तस्य प्रवर्तकत्वम्। आहो कामिनो नियोगः? नाद्यः। अनाप्तनियोगे नैय्यमिकनियोगे च तदभावात्। न द्वितीयः। फलकामनाया अपि प्रवर्तकत्वम्, उत न? आद्ये तत एव प्रवृत्तिसिद्धौ किं नियोगेन। अन्त्ये फलकामनामनपेक्ष्यैव बलवदनिलसलिलौघवन्नियोगस्य प्रवर्तकत्वे कुतो नियोगवशादिष्टसाधनत्वसिद्धिः। न तृतीयः। किमिष्टसाधनत्वाभावे फलकामनाया अधि-

अथ द्वितीयवर्णकम्

एतावता प्रबन्धेन विशिष्टानुबन्धमिदं शास्त्रं व्याख्यानार्हमिति व्यवस्थाप्य स्वेन व्याचिकीर्षितस्य सूत्रसन्दर्भस्याद्यं सूत्रं अवतारयति—वेदान्तेति । वेदान्तधर्मिका या मीमांसा सूक्ष्मार्थनिर्णयहेतुविचारात्मिका सैव, शास्ति अयथार्थव्युदासेन यथार्थं व्यवस्थापयतीति शास्त्रं तस्य, व्याख्यातुं इष्टस्य। आदौ विशिष्टाधिकार्यादिसमर्पणेन

---

कारिविशेषणत्वं न स्यादित्युच्यते उत साध्यस्य विशेषणत्वं न स्यादिति ? नाद्यः इष्टसाधनत्वाभावेऽपि जीवनगृहदाहादीनां अधिकारिविशेषणत्वात् । न द्वितीयः । किं यत्र कर्मणि नियोगः तेन साध्यस्य विशेषणत्वं अनुपपन्नम् उत येन केनचित् साध्यस्य विशेषणत्वम् । नाद्यः । तेन साध्यमिति प्रथमं ज्ञातुं अशक्यत्वात् । न द्वितीयः । जीवनादेरपि तथात्वात् । कामनाया अधिकारिविशेषणत्वमपि न । अयोगान्ययोगव्यवच्छेदासम्भवात् । न तावत्स्वर्गकामना दर्शपूर्णमासनियोगस्य स्वाश्रयेण योगं व्यवच्छिनत्ति । नित्यविधिनैव तस्य सिद्धत्वात् । नाप्यस्वर्गकामसम्बन्धं, नित्यनियोगस्य अस्वर्गकामसम्बन्धात्तद्व्यवच्छेदानुपपत्तेः । तस्माद्दण्डी प्रैषानन्वाहेतिवदर्थप्राप्तकामनानुवादेन विशेषणस्वर्गरूपफलपर एव । फलं च साधनेनान्विताभिधानयोग्यमितीष्टसाधनत्वमेव विध्यर्थः । न च ज्योतिष्टोमेनेति तृतीयानुपपत्तिः । तिङा साधनत्वमात्रस्याभिहितत्वेऽपि ज्योतिष्टोमकरणत्वस्यानभिहितत्वेन तृतीयोपपत्तेः । तस्माद्युक्तमुक्तमधिकारिविशेषणमोक्षसाधनब्रह्मज्ञानाय श्रवणादिविधिरिति । तस्मात्संभावितविषयप्रयोजनत्वात् शास्त्रमारम्भणीयमिति प्रथमवर्णकं सिद्धम् ॥



टीकाद्यर्थान्समालोड्य व्याकरोत्सारसंग्रहम् ।
अद्वैतभूषणं नाम विदुषां प्रीतयेऽधुना ॥

यदबोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

---

अथ द्वितीयवर्णकम्

विचारविधेः व्यवहितविषयानुबन्धः फलानुबन्धश्च प्रवर्तमानपुरुषस्य प्रथमाकाङ्क्षितत्वाद्विचारितः ।- अनन्तरमव्यवहितविषयस्य विचारस्य गतार्थत्वशङ्कायां द्वितीयवर्णकारम्भः । विचारशास्त्रमारम्भणीयं नवेति गतार्थागतार्थत्वाभ्यां सन्देहे नारम्भणीयमिति तावत्प्राप्तम् । पूर्वतन्त्र

शास्त्रारम्भपरमिदं सूत्रमित्यर्थः। प्रथमवर्णकेनाध्यासनिरूपणद्वाराधिकार्यादिसिद्धेः शास्त्रस्याऽऽरभ्यत्वप्रदर्शनेनाद्यसूत्रतात्पर्यं दर्शितम्। द्वितीयवर्णकेन तु विचारात्मकशास्त्रस्य साक्षाद्विषयाः वेदान्ताः पारंपर्येण जीवब्रह्मैक्यं अनुग्राह्यानुग्राहकयोः एकविषयत्वात्, पूर्वमीमांसया गतार्थत्वाभावश्च सूचित इति विषयभेदो द्रष्टव्यः।

इति द्वितीयवर्णकम् ॥

---

एव सिद्धत्वात्। ननु अथाऽतो धर्मजिज्ञासेति प्रतिज्ञाय धर्ममात्रविचारः तत्र कृतः न ब्रह्मविचार इति चेत्; न, वेदस्य कार्यमात्रनिष्ठत्वेन अलौकिकश्रेयस्साधनवाचिधर्मशब्देन तद्विचारस्य साकल्येन प्रतिज्ञातत्वात्। ननूपनिषद्वाक्यानां तत्रोदाहृत्य विचारणं नास्तीति चेत्; तथाऽप्युत्पत्तिविनियोगप्रयोगाधिकाररूपविधिभेदस्य विचारितत्वात् तस्यापि सङ्क्रमयितुं शक्यत्वात् तथाहि—श्रोतव्य इत्युत्पत्तिविधिः शमादिभिः उपकृत्येति विनियोगविधिः। शमादिभिः यज्ञादिभिश्चोपकृत्य श्रवणं कुर्यादिति प्रयोगविधिः। मोक्षकाम इत्यधिकारविधिरिति।

नन्वथातो धर्मजिज्ञासेति वेदाध्ययनानन्तरं वेदस्य विवक्षितार्थत्वात् धर्माय जिज्ञासेति प्रतिज्ञाय लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इति लक्षणप्रमाणापेक्षायां चोदनालक्षणः धर्म इत्यनेन चोदना प्रमाणमित्युक्तम्। अर्थाचोदनालक्षणकोऽर्थो धर्म इत्यनेन चोदना प्रमाणमित्युक्तम् अर्थाचोदनालक्षणत्वे सत्यर्थत्वं धर्मलक्षणमित्युक्तम्। तत्र भोजनादिव्यावृत्यर्थं चोदनालक्षण इति। श्येनादिव्यावृत्यर्थं अर्थ इति। श्येनादेः हिंसात्वेन प्रतिषिद्धत्वेनानर्थत्वात्तद्व्युदासः। एवं सूत्रद्वये वेदस्य धर्मे प्रामाण्ये सिद्धे तत एव धर्मावगतिसंभवेऽपि यथाऽभ्यधिकाशङ्कानिरासार्थं उत्तरो ग्रन्थसन्दर्भः, तद्वदेव ब्रह्मविचारारम्भोऽपि।

तथा हि। लौकिकानां शब्दानां मानान्तरसिद्धार्थबोधित्वाद्वेदेऽपि तथात्वम्। तथा च चोदनैव धर्मे प्रमाणं इति कथम्? तथाऽर्थवादमन्त्रनामधेयानां अचोदनात्वादप्रामाण्यमिति शङ्कायां तन्निरासाय त्रिपाद्यारम्भः। वैदिकानां अपौरुषेयत्वान्न मानान्तरसापेक्षत्वम्। लौकिकानां च तथात्वम्। अर्थवादानामपि विध्यपेक्षितप्राशस्त्यसमर्पणेन प्रामाण्यम्। मन्त्राणां अपूर्वोपयोगिप्रत्ययजनकत्वात् विधिशेषत्वेन प्रामाण्यम्। नामधेयस्यापि विधेयार्थपरिच्छेदकत्वेन प्रामाण्यं प्रथमे अध्याये निरूपितम्। तत्र तत्र विहितानां कर्मणां भेदाभावे यावद्वेदार्थानुष्ठाने फलं स्यात्। तच्चाशक्यमिति अननुष्ठानलक्षणाप्रामाण्यं वेदस्य। भेदे च प्रमाणाभाव इति शङ्कायां शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयरूपकर्मभेदप्रमाणनिरूपणाय द्वितीयाध्यायारम्भः।

ननु आग्नेयादीनां प्रयाजादीनां सर्वेषां समप्राधान्यं तावन्न सम्भवति। प्रयाजादीना फलसंबन्धे प्रमाणाभावात् दर्शपूर्णमासाभ्यां स्वर्गकामः यजेत इति कालसंबन्धानां षण्णामेव फलसंबन्धावगमात्। न च प्रयाजादीनां आग्नेयाद्यङ्गत्वम्। अङ्गत्वानिरुक्तेः। न च उपकारकत्वं अङ्गत्वम्। आधानस्याऽपि दर्शाद्यङ्गत्वे विकृतावतिदेशप्रसङ्गात्। न च परार्थत्वं अङ्गत्वम् तत्र प्रमाणाभावात्। न च श्रुतिलिङ्गादिकं प्रमाणम्। सक्तून्जुहोतीत्यत्रानन्यगत्या विभक्तिविपरिणामः। इह त्वङ्गत्वसंभवादिति तन्निरासेन श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानामङ्गत्वबोधकत्वोपपिपादयिषया **तृतीयाध्यायारम्भः**।

ननु साङ्गे कर्मण्यनुष्ठापकप्रयोगविध्यभावे तत्र प्रवृत्त्यनुपपत्तिः। न च प्रधानवाक्यं साङ्गानुष्ठापकम्। तत्राङ्गाश्रवणात्। नाप्यङ्गवाक्यम्। तत्र प्रधानाश्रवणादिति शङ्कायां वाक्यैकवाक्यतया तेषामेव प्रयोगविधित्वनिरूपणार्थः **चतुर्थाध्यायारम्भः**। **ननु** तथाऽपि एकेन कर्त्रा अनुष्ठेयानां बहूनां कर्मणां न नियतक्रमः सम्भवति। तत्र प्रमाणाभावादिति शङ्कायां श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिलक्षणप्रमाणसम्भवादनियतक्रमाङ्गीकारे च कालविलम्बवैरूप्यादिप्रसङ्गेन प्रयोगविधिकोपप्रसङ्गादित्यभिप्रायेण **पञ्चमाध्यायारम्भः**। ननु तथाऽपि फलाभावे निरधिकारं दर्शपूर्णमासादिकर्म नानुष्ठेयम्। न च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन स्वर्गस्य भाव्यत्वावगमात् फलत्वम्। लिङर्थभावनाभाव्यत्वेनैकपदोपात्तधात्वर्थस्यैवान्वयात् स्वर्गस्य पदान्तरसमभिव्याहारलक्षणवाक्यप्रमेयत्वेन दुर्बलत्वात्। स्वर्गपदन्तु सुखवाचि लक्षणया तत्साधनं व्यनक्ति। तच्च सिद्धत्वात् सिद्धसाध्ययोः समभिव्याहारे सिद्धं साध्यायोपयुज्यत इति न्यायात् धात्वर्थसाधनत्वेन सम्बध्यते। कामशब्दश्चाऽर्थप्राप्तसाधनकामनानुवादः। तथा च स्वर्गसाधनं स्रक्चन्दनादि साधनत्वेन कामयमानः यागं भावयेदिति वाक्यार्थः सम्पद्यते। यागस्य च क्लेशात्मकत्वेनाफलत्वान्निरधिकारकर्माननुष्ठेयमिति शङ्कायां विधेः प्रवर्तकत्वार्थं इष्टसाधनत्वावच्छिन्नभावनायाः विध्यर्थत्वेन समानपदादप्यन्तरङ्गसमानप्रत्ययोपात्तेष्टस्यैव भाव्यत्वे स्वर्गकामपदस्य तद्विशेषसमर्पणेनार्थवत्त्वे न लक्षणया साधनकामनानुवादत्वमिति प्रतिपादयितुं **षष्ठाध्यायारम्भः**। एवं प्रकृत्यपेक्षितो विचारः पूर्वषट्केन कृतः।

ननु सर्वत्रोपदेशेन सर्वेषामङ्गानां प्राप्तत्वात्प्रकृत्यपेक्षितो विचार इति विशेषणं व्यर्थम्। सर्वेषां कर्मणां समग्राङ्गयुक्तत्वेन प्रकृतित्वात्। तथा हि। वाक्येषु अङ्गप्रधानश्रवणात् प्रधानवाक्यविहितं कर्म यजिनानूद्य तत्राङ्गान्यङ्गविधिभिः विनियुज्यन्त इति वक्तव्यम्। यजे-

श्चाविशेषेण सर्वकर्माभिधायित्वात् सर्वार्थतया अङ्गान्युपदिश्यन्त इत्यतिदेशासम्भवः । न च यजेः सर्वाभिधायित्वेऽपि दर्शपूर्णमासप्रकरणात प्रकृतस्यैव यागस्योद्देशः ग्रहैकत्ववदुद्देश्यविशेषणस्य वाक्यभेदप्रसङ्गादविवक्षितत्वमिति शङ्कायां प्रधानवाक्यमेवाङ्गप्रधानसंयुक्तामपूर्वभावनां विधत्ते । भावनया चाङ्गानां प्रथमं संबन्धः । पश्चात्तु करणेन । भावनायाश्च विधेयत्वेनोपादेय-विशेषणस्य च पश्वैकत्ववत् विवक्षितत्वात् । प्राकृतभावनासंबन्धान्यङ्गानि विकृतावतिदिश्यन्त इति प्रतिपादनार्थः सप्तमाध्यायारम्भः ।

ननु तथापि दर्शपूर्णमासज्योतिष्टोमद्वादशाहादिप्रकृतिधर्माणां अविशेषेण सर्वविकृतिषु प्राप्तौ परस्परविरोधादननुष्ठानलक्षणाप्रामाण्यम् । न च कस्यचिद्धर्मः कुत्रचिदतिदिश्यते, न न सर्वः सर्वत्र, प्रकृतावदर्शनादिति वाच्यम् । विशेषे प्रमाणाभावादिति शङ्कायां विकृतिगत-द्रव्यदेवतादिसामान्यात् प्रकृतिविशेषोपस्थितौ तद्धर्मातिदेश इति प्रतिपादनार्थ**मष्टमारम्भः**। ननु तथापि प्रकृतौ शब्दतः प्राप्तानां मन्त्रसामसंस्काराणां अग्निनीद्यादिस्वरूपप्रयुक्तानां विकृतौ प्राप्त्यभावादूहो न युक्तः ; साधनप्रयुक्तत्वेऽपि आग्नेयादिस्वरूपसाधनप्रयुक्तत्वादिति शङ्कायां अङ्गानां कारणस्य च भावनायां प्रथममन्वयाद्भावनायाश्चाऽपूर्वद्वारा फलहेतुत्वात् अपूर्वसाधनांश-विनिवेशिनो धर्माः विकृतावप्यपूर्वसाधनत्वपुरस्कारेण प्राप्ताः सूर्यनीवारादिषूहं भजन्त इति प्रतिपादनार्थं **नवमारम्भः** ।

**ननु** तथापि प्रकृतितः प्राप्तानामवघातादीनां विकृतौ कृष्णलादौ तुषविमोकादिकार्यलोपात् बाधो न सम्भवति । अतिदेशेन प्रकृतितः सर्वेषां पदार्थानां प्राप्तौ दृष्टोपकारालाभेऽपि अदृष्टोपकारकल्पनयार्थवत्त्वोपपत्तेः । न च प्रकृतितः प्राप्तिसमये कार्यमुखेनाङ्गानां प्राप्तेः, तदभावे प्राप्तिरेव न भवतीति वाच्यम् । तत्र प्रमाणाभावादिति शङ्कायां विकृतिभावनाया इतिकर्तव्यताकाङ्क्षासमये सादृश्यात् प्रकृतिभावनोपस्थितौ साक्षात्फलानुकूलोऽङ्गजन्योपकार एव बुद्धिस्थो भवति । स एवाऽऽकाङ्क्षितत्वात् योग्यत्वात्सन्निहितत्वात्प्रथमं संबध्यते । तदनन्तरं अवान्तरकार्याणि । ततः पदार्थाः । ततस्तन्त्राणीति । कार्यलोपे पदार्थानां बाध एवेति प्रतिपादनार्थं **दशमा**रम्भः । ननु तथाप्यनेकप्रधानोद्देशेनाङ्गानां सकृदनुष्ठानलक्षणं तन्त्रं न सम्भवति । अतिप्रसङ्गात् । न चैकप्रयोगानां प्रधानानां अङ्गं सकृदनुष्ठेयम् । तस्यैवा-सिद्धेः । न चैकफलसाधनत्वादेकप्रयोगत्वं, प्रत्येकमुत्पत्तिविहितभावनायाः भव्याकाङ्क्षावशात् प्रत्येकमेवाधिकारवाक्यप्राप्तफलसम्बन्धेनैकफलत्वासिद्धेरिति शङ्कायां यद्यप्युत्पत्तिवाक्ये फलमात्र-मवगतं तथाऽपि विनियोगवाक्ये दर्शपूर्णमासाभ्यामिति समुच्चित्य साधनत्वावगतेः एककलत्वम् ।

एकफलत्वे पौर्णमास्यां पौर्णमास्या यजेतेत्यादिवचनात् त्रिकस्य त्रिकस्य सहप्रयोग इति तन्त्रं अङ्गानामिति प्रतिपादनार्थं एकादशारम्भः।

ननु तथाप्यन्यार्थानुष्ठितस्य प्र[illegible]ाकशेष्यन्तरेऽप्युपकारकत्वलक्षणप्रसङ्गो न सम्भवति। प्रमाणाभावादिति शङ्कायां जामात्रर्थस्य सूपस्येवान्यत्राप्युपकारत्वम्। तथा च पश्वर्थानुष्ठितानां प्रयाजानां पशुपुरोडाशेऽप्युपकारकत्वं इति प्रतिपादनार्थं द्वादशारम्भः। एवं इहापि विधेय-ज्ञानविषयस्य ब्रह्मणोऽप्रसिद्धत्वात्तज्ज्ञानं विधातुं न शक्यत इति शङ्कायां तादृशब्रह्मप्रतिपादनार्थं वेदान्तविचारारम्भ इति चेत्; न, यूपाहवनीयादीनां यूपे पशुं बध्नातीत्यादिविधिविहितानां 'यूपं तक्षति' 'यूपमष्टाश्रीकरोति' 'यूपमनक्ति' इत्यादिपदसमन्वयात् तक्षणाञ्जनादिविशिष्टो दारुविशेषो यूपः इत्यादिनिर्णयवद्वेदान्तपदसमन्वयादेव ब्रह्मनिर्णयोपपत्तेः। यापि कैश्चिदेकदेशिभिः अभ्य-धिकाशङ्कोपपादिता—वेदस्य कार्यमात्रपरत्वाद्वेदान्तेषु केषुचिद्विध्यश्रवणात् यत्रापि विधिश्रवणं "आत्मा द्रष्टव्य" इत्यादौ तत्राऽपि किं स्वतन्त्रफलार्थत्वं उत कर्मकारकसमवेतफलार्थत्वम्? नाद्यः। कर्मप्रधानस्य तव्यप्रत्ययस्य स्वतन्त्रफलार्थत्वानुपपत्तेः। न द्वितीयः। आत्मनो नित्यत्वात् स्वरूपत्वात् निर्विकारत्वाच्च उत्पत्त्याप्तिविकृतिसंस्काराणां असंभवात्। न च सक्तूञ्जुहोतीति क्रतुप्रकरणपठितसक्तुहोमस्य क्रत्वङ्गत्वे द्वितीयाश्रुत्या सक्तूनां प्राधान्ये भस्मी-भूतानां आधानप्रोक्षणादिवद्विनियुक्तविनियोक्ष्यमाणसंस्कारतानुपपत्तेः विभक्तिविपरिणामेन यथा प्रधानकर्मत्वं तथाऽऽत्मनोपासीतेति विभक्तिविपरिणामात् स्वतन्त्रफलार्थत्वमिति वाच्यम्। शब्दतः कर्मप्राधान्याभावेऽपि जानातेः सकर्मकत्वादात्मैव कर्मकारकमिति वक्तव्यम्। तच्च न सम्भवति। स्वरूपतः प्रतीतितो वा नित्यसिद्धत्वादिति शङ्कायां कर्मप्राधान्येऽपि स्वतः पुरुषार्थभूताज्ञाननिवृत्तिलक्षणमलापकर्षणसंस्कारसंभवाद्विधिरुपपद्यत इति प्रतिपादनार्थं ब्रह्मविचारारम्भ इति। साऽपि न सम्भवति। धर्मजिज्ञासासूत्रे कर्मप्रधानाध्ययनं अङ्गीकुर्वतां तेनैव गतत्वादधिकाशङ्कानुत्थितेः।

यदपि परिहारसमये मलापकर्षणलक्षणसंस्कारः स्वतः पुरुषार्थ इति तदसत्; किमज्ञान-निवर्तकत्वेन लौकिकात्मज्ञानं विधीयते उताशनायाद्यतीतालौकिकज्ञानम्। नाद्यः। तस्मिन्सत्यप्यविद्याया अविकलमनुवर्तमानत्वात्। न द्वितीयः। तत्किं प्रसिद्धमप्रसिद्धं वा? नान्त्यः। अप्रसिद्धस्य विधानानुपपत्तेः। नाद्यः। तत्किं स्वस्मिन् प्रसिद्धम्? उत पुरुषान्तरे? नाद्यः। विधिवैयर्थ्यात्। न द्वितीयः, परबुद्धेः परेण ज्ञातुं अशक्य-त्वात्। शक्यत्वे वा विषयेण सह ज्ञातत्वाद्विधिवैयर्थ्यम्। यदपि कैश्चित् अभ्यधिका-

शङ्कान्तरं दर्शितम् । ज्ञाने विधिसम्भवेऽपि तद्विषयस्य ब्रह्मणः प्रत्यक्षाद्यगोचरत्वाद्वेदस्य च कार्यपरत्वात् सङ्कर्षपर्यन्त एव वेदार्थविचार इति शङ्कानिराकरणाय ब्रह्मविषयविचारारम्भ इति । तदपि न । ब्रह्मज्ञानाप्रसिध्यादिदोषस्याप्यत्रापि तुल्यत्वात् ।

ननु विधिनिर्मुक्तं वेदान्तवाक्यजातं प्रथमं ब्रह्मस्वरूपं प्रतिपादयति । ततः प्रसिद्धं ब्रह्मज्ञानं विधीयत इति । तन्न । किमपरोक्षज्ञानं विधीयते, उत शाब्दतत्सन्तानः ? नाद्यः, ब्रह्मसाक्षात्कारस्य सुखानुभवत्वेन फलत्वादविधेयत्वात् । न द्वितीयः । किन्तद्वाक्यं वस्तु-स्वरूपं प्रतिपाद्य तज्ज्ञानविधायकम् ।.........न तावदिदं सर्वं यदयमात्मेति । यद्यपीदं वाक्यं ब्रह्मस्वरूपोद्देशेन नानात्मरूपविधायकम् । ब्रह्मणोऽप्रसिद्धत्वेनोद्देश्यत्वानुपपत्तेः । किन्त्वनात्म-स्वरूपप्रविलयेन ब्रह्मरूपतापरं इदं सर्वं यत् अयं आत्मेति । तथाप्यत्र विधिः न श्रूयते । नाऽपि कल्पयितुं शक्यते । अनुष्ठेयार्थप्रतिपत्यप्रतिपत्योः कल्पनानुपपत्तेः ।

नन्वेवंसति पूषा प्रपिष्टभाग इत्यत्रापि विधिकल्पना न स्यात् दोषसाम्यादिति चेत् । तत्र हि प्रपिष्टो भागो यस्येति बहुव्रीहिणा द्रव्यदेवतासम्बन्धावगमे तस्य च देवतो-द्देशेन च द्रव्यत्यागात्मकयागं विनाऽनुपपत्तेः, तत्सिद्धौ पुरुषप्रवृत्तिसिद्धये विधिकल्पनं युज्यते । नेहात्मनो नियोगाविनाभावः । लोकेऽप्यात्मनः सत्वात् । नच वैदिकपदसमन्वयत्वाद-र्थवादवत् साक्षाद्वा परंपरया वा नियोगसम्बन्धः कल्प्यत इति वाच्यम् । तथाऽपि नियोग-विषयसमर्पकः धातुः कः ? किं कर्तव्यमिति, उत ज्ञातव्यमिति । पक्षद्वयेऽपि यदि प्रपञ्चः सत्यः अन्यदन्यात्मना कर्तुं ज्ञातुं चाशक्यम् । अनात्मस्वभावताया अनिवृत्तेः । अमी पिष्ट-पिण्डाः सिंहाः क्रियन्तामित्यत्राऽपि पिष्टस्वभावतावत् । अथ न सत्यः, तदा ज्ञान-विधानेऽपि यत्तावद्विदितपदपदार्थसङ्गतिकस्य वेदान्तवाक्यादुत्पन्नं ज्ञानं तत्तावन्न विधेयम् । तस्याध्ययनादेव प्राप्तेः । तस्मिन्सत्यपि फलादर्शनात् । नापि ज्ञानान्तरम् । प्रथमज्ञान-वत्तस्याप्यफलत्वात् ।

ननु मन्त्रैः अध्ययनविधिविहितैः विदितपदपदार्थसङ्गतिकस्य वृथाज्ञाने जातेऽपि पश्चा-त्तेषां 'ऐन्द्या गार्हपत्यमुपतिष्ठते' 'बर्हिः देवसदनं दामि' 'इमामगृभ्णन्रशनां ऋतस्येत्यश्वाभि-धानीमादत्त' इति श्रुतिलिङ्गवाक्यैः कर्माङ्गत्वेन विनियुक्तानां किं अदृष्टद्वारोपयोगः उत दृष्टद्वारेति विशये दृष्टे सत्यदृष्टकल्पनानुपपत्तेः मन्त्रैरनुष्ठेयार्थज्ञानं कर्मकालीनमपूर्वोपयोगीति कल्प्यते विधिसामर्थ्यात् । तथाऽत्रापि द्वितीयं ज्ञानं विधिरूपसहकारिवशात् अनर्थनिवृत्तिं फलिष्यति । प्रयोगविधिस्तत्रानुष्ठापक इति चेत् । इहाऽपि प्रकरणं पर्यालोच्य विवरणरूपप्रयोगविधेरुप-

पादितत्वादिति चेत्। यत्तावद्विधिपरं वाक्यं तदेव ब्रह्मपरमिति वक्तुं न शक्यते। तथात्वे ब्रह्मणो विधेयज्ञानविशेषणत्वेन गुणत्वं विधानायोद्देश्यत्वं सिद्धत्वापरपर्यायं, अनूद्यत्वं ज्ञातत्वापरापर्यायं आपद्येत। तथा प्रमेयत्वादीप्सिततमत्वेन प्राधान्यं क्रियाजन्यातिशयविशिष्टत्वेन साध्यत्वमुपादेयत्वं तेनैव रूपेणाज्ञातज्ञाप्यत्वं विधेयत्वमिति वैरूप्यप्रसङ्गात्।

नन्वेवं सति व्रीहीन्प्रोक्षतीत्यादिगुणकर्मविधानं न स्यात्। तत्रापि व्रीहीणां कारकत्वात्। गुणत्वोद्देश्यत्वानूद्यत्वानां सिद्धत्वात् विधिवशात्प्राधान्योपादेयत्वविधेयत्वानां सिद्धत्वादिति चेन्न। तत्र क्रियाजन्यातिशयस्य तदर्थक्रियाविध्यनुपपत्तिगम्यत्वेन वैभक्तिकत्वाभावात् ज्ञाने न विरोधः। अत्र तु द्वयोः शाब्दत्वाद्विरोधः स्यादेव। नन्विहाऽपि विधिनिर्मुक्तमेव प्रथमं ब्रह्म प्रतिपादयति। पश्चाद्विधायकेनैकवाक्यं विधिरपि प्रतिपादयतीति चेत्। तत्र वक्तव्यम्। किं पदैकवाक्यता उत वाक्यैकवाक्यता अर्थवादवाक्यवत्। नाद्यः। न सुरां पिबेदित्यात्रापि नञ्विनिर्मुक्तस्य विधायकत्वं तेन सह प्रतिषेधकत्वमिति विरुद्धमापाद्येत। न द्वितीयः। युक्तमर्थवादानां स्वतः पुरुषार्थापर्यवसानात् वाक्यान्तरेणैकवाक्यत्वम्। अत्र तु ब्रह्मस्वरूपप्रतिपादनमात्रादेव निखिलानर्थनिवृत्तिब्रह्मप्राप्तिलक्षणफललाभान्न वाक्यान्तरेणैकवाक्यत्वं, 'कृतंकृत्यं प्राप्तं प्रापणीयमात्मलाभान्नपरं विद्यत इति' श्रुतेः।

ननु न शाब्दज्ञानमात्रात् तथाविधफललाभः। अपरोक्षज्ञानस्याविद्यानिवर्तकत्वात् तस्यैव विधेयत्वादिति चेत्। तादृशज्ञानं केन भवति? न तावच्चक्षुरादिना। "न चक्षुषा पश्यति" इति मन्त्रवर्णात्। नापि ध्यानात्। तस्य अश्रवणात्।

ननु कथं अश्रवणं "आत्मेत्येवोपासित" "आत्मानमेव लोकमुपासीत" "ततस्तु तं पश्यते निष्कलं ध्यायमान" इति श्रवणात् इति चेत्; न तावदाद्यं वचनद्वयं ध्यानविधायकम्। तस्य स्वभावसिद्धलौकिकाज्ञानानुवादेनात्मस्वरूपमात्रविधिपरत्वात् एवकारस्य विशेषणसङ्क्रान्तत्वेन तद्विधिपरत्वात्। नापि तृतीयं वचनम्। तस्याऽप्यतिसूक्ष्मवस्तुसाक्षात्कारेऽन्वयव्यतिरेकसिद्धकारणभावचित्तैकाग्र्ये वेदान्तवाक्यस्याऽपरोक्षज्ञानं जनयतः सहकारित्वेन नियमविधित्वात्स्वतन्त्रफलार्थतया विधानानुपपत्तेः। औपनिषदत्वश्रुतिसामार्थ्याच्छब्दस्यैवापरोक्षज्ञानजनकत्वात्। एतेन सन्तानो विधीयत इति पक्षोऽपि निरस्तो वेदितव्यः।

यदपि केनचिदुक्तम्। विधिपरमेव वेदान्तवाक्यम्। न ब्रह्मस्वरूपपरम्। तथाऽपि निर्विषयप्रतिपत्तेः असम्भवात् तद्विषयमपि प्रतिपादयतीति; तन्न, प्रमाणान्तरविरोधाभावेऽन्य-

परात् शब्दात् अन्यत्सिद्ध्यति । अत्र तु द्वैतग्राहिप्रत्यक्षादिविरोधे न तत्सिद्धिः । ननु समिदादिपदार्थानां विधायकः शब्दः क्रमस्यापि विधायको दृष्टः । तद्वद्विधिपरत्वं ब्रह्मपरत्वं चेत्यपि न ; तत्र एककर्तृकाणां बहुकर्मणां युगपदनुष्ठानानुपपत्त्या कस्यचित्क्रमस्य सिद्धौ सन्निहितत्वात्पाठनिष्ठः क्रमः तत्रोपरज्यते । न शब्दस्य तत्र सामर्थ्यं इह तु शब्दस्यैव सामर्थ्यं वक्तव्यम् । तच्चानुपपन्नमित्युक्तम् । तस्माद्वेदान्तानां विधिपरत्वे ब्रह्मस्वरूपासिद्धेः अहंप्रत्ययावसेय एवाऽऽत्मनि विद्यमानैः आरोपितैर्वोपासनं मोक्षफलाय विधीयत इति वक्तव्यम् । तथा च वेदान्तानां विधिमात्रनिष्ठत्वाद्विधेयानां तुल्यत्वेन पूर्वतन्त्रे निरूपितत्वात्किमपरमवशिष्यते यद्ब्रह्मजिज्ञासां पृथक्प्रयुञ्जीतेति ।

अत्रोच्यते । वेदान्तानां कार्यपरत्वं किं कार्यान्वितव्युत्पत्तिबलादाश्रीयते, उत सूत्रकाराद्यभियुक्तवचनसामर्थ्यात् । नाद्यः, तस्य समन्वयसूत्रे निराकरिष्यमाणत्वात् ।

नन्वथातो धर्मजिज्ञासेत्यत्राऽथशब्देनानन्तर्याभिधानमुखेन सकलवेदाध्ययनस्य हेतुत्वप्रतिपादनात् , अतश्शब्देन च तस्यैव साकल्येनार्थविवक्षायाः प्रतिपादितत्वात्, भाष्यकारेण च धर्माय वेदवाक्यानि विचारयिष्यन्तीत्यनेन सकलवेदार्थविचारप्रतिज्ञापरत्वस्योक्तत्वात् , सौत्रधर्मशब्दस्य चोपक्रमस्थातश्शब्दानुरोधेन वेदार्थपरतया व्याख्येयत्वादभियुक्तवचनसामर्थ्यादेव पूर्वतन्त्रे सर्ववेदार्थविचारः सिद्ध इति चेत् ।

धर्मजिज्ञासासूत्रे हीदं विचार्यते । धर्मविचारः कर्तव्यो नवेत्यालम्बनप्रमाणसम्भवासम्भवाभ्यां सन्देहे, नेति तावत् प्राप्तं;विचारस्य तर्करूपत्वेन प्रमाणानुग्राहकत्वात् । अनुग्राह्यं प्रमाणं किं प्रत्यक्षादि, उतागमः? नाद्यः, धर्मस्य प्रत्यक्षाद्यगोचरत्वात् । नाप्यागमः, तस्य विहितत्वेनादृष्टार्थत्वादर्थविवक्षाभावात् । न चोभयार्थत्वं सम्भवति । विषनिर्हरणादिकार्यान्तरे विनियुक्तानां हुंफडादीनां अर्थविवक्षाऽदर्शनात् । न च फलाभावः । जपाध्ययनफलस्य घृतकुल्यादेः अध्ययनत्वसामान्याद्रात्रिसत्रन्यायेन कल्प्यत्वात्, सक्तुन्यायेन विभक्तिविपरिणामसम्भवादिति प्राप्ते; अभिधीयते । अध्येतव्य इति कर्मकारकसमवेताक्षरावाप्त्यर्थज्ञानानुष्ठानपरंपरया पुरुषार्थपर्यवसाने न स्वतन्त्रादृष्टार्थत्वम् । नापि रात्रिसत्रन्यायेन विपरिणामः सक्तुन्यायेन विभक्तिविपरिणामो वा युक्तः । विधिवशात्किञ्चिददृष्टं अस्तीत्येतावत् , न स्वतन्त्रम् , हुंफडादीनां त्वर्थाप्रतीतेरेवाविवक्षा, न तु कार्यान्तरे विनियुक्तत्वात् । इह तु विदितपदपदार्थसङ्गतिकस्यार्थप्रतीतिदर्शनात् तद्विवक्षायां न किञ्चिद्बाधकमस्तीति ।

ननु वेदार्थो यदि धर्मः स्यात् तदा वेदस्यार्थविवक्षाप्रतिपादनं धर्मविचारोपयोगि स्यात्। तदेव कुतः। चैत्यवन्दनादेरपि धर्मत्वावगमात् धर्मस्याप्रसिद्धत्वेन तद्विषयविचारानुपपत्तेः इति शङ्कायां तदर्थविचारान्तरम्।

तथा हि—धर्मो नाम लोकाख्यप्रमाणात्[+] कालान्तरभाविश्रेयःसाधनभूतोऽवगतः। स किं वेदार्थोऽग्निहोत्रादिः उतागमार्थश्चैत्यवन्दनादिरिति विशये चैत्यवन्दनादिरेव धर्मः। तत्प्रतिपादकः आगम एव विचार्यः, न वेद इति शङ्कायां वेदस्यापौरुषेयतया निर्दुष्टत्वेन तदर्थः एव धर्म इति धर्माय वेदवाक्यानि विचारयिष्यन्नथातो धर्मजिज्ञासेति सूत्रयामास जैमिनिः। एवं स्थिते शास्त्रारम्भे न सर्ववेदार्थविचारः तत्रेति गम्यते। अर्थज्ञानानुष्ठानपरंपरया प्रयोजनवत्त्वकीर्तनात्, चैत्यवन्दनाग्निहोत्राद्यनुष्ठेयकीर्तनात्, अथाऽतो धर्मजिज्ञासेति धर्मग्रहणसामर्थ्याच्च। न चोपक्रमस्याथातश्शब्दविरोधाद्धर्मशब्दस्य वेदार्थपरत्वं सामान्यप्रसिद्धिविशेषप्रतिपत्तिभ्यां विचार्यत्वेन धर्मस्य प्राधान्यात् प्रधानानुरोधेनेतरस्य नयनात्। चोदनालक्षणोऽर्थो धर्म इत्यत्र चोदनाग्रहणसामर्थ्यादप्यन्योऽविचारितो वेदार्थः अस्तीति गम्यते। अन्यथा वेदलक्षण इत्येव अवक्ष्यत्।

ननु चोदनाग्रहणस्याधिकारसिद्धिः प्रयोजनम्। तथा हि—चुद प्रेरणे इत्यस्माद्धातोः चोदनाशब्दस्य प्रेरणाख्यलिङादिशब्दव्यापाररूपशब्दभावनाभिधायित्वात्। तस्याश्च स्वज्ञानकरणिकायाः प्राशस्त्यज्ञानेतिकर्तव्यताकायाः भाव्यापेक्षायां पुरुषप्रवृत्तिलक्षणार्थभावना भाव्यत्वेन संबध्यते। तस्याश्च धात्वर्थकरणिकायाः प्रयाजादीतिकर्तव्यताकायाः पुरुषार्थरूपभाव्यालाभे अनिवृत्तेः भिन्नपदोपात्तोऽपि स्वर्गादिरेव भाव्यः। न समानपदोपात्तोऽपि धात्वर्थ इति प्रतिपादनार्थः चोदनाशब्दप्रयोग इति चेत्; न, अत्र चोदनाग्रहणाभावेऽप्यध्ययनविधेः प्रवर्तकत्वानुरोधादेव तत्सिद्धेः।

ननु दृष्टो हि तस्यार्थः कर्मावबोधनं नाम। आम्नायस्य क्रियार्थत्वादानर्थक्यं अतदर्थानां, तद्भूतानां क्रियार्थेन समाम्नायः इति सर्वस्य वेदस्य कर्मावबोधनं अर्थः इति गम्यते। नैष दोषः। उपक्रमानुरोधेन तस्य कर्मकाण्डरूपवेदैकदेशपरत्वात्। किञ्च दृष्टो हि तस्यार्थ इति भाष्यं आम्नायस्य कर्मावबोधनं अर्थोऽस्तीत्येतावन्मात्रमाह। नान्ययोगव्यवच्छेदम्। वेदमधीत्य स्नायादिति वाक्यात् वेदस्य आनर्थक्ये शङ्किते अतिक्रमिष्यामः इममाम्नायं अनतिक्रामन्तो वा वेदमर्थवन्तं सन्तं अनर्थं कल्पयेम। दृष्टो हि तस्यार्थ इत्युप-

क्रमानुरोधात्। आम्नायस्य क्रियार्थत्वादानर्थक्यमित्यत्रापि किमर्थशून्यत्वं उत प्रयोजनशून्यत्वम्? नाद्यः, अर्थस्य प्रतीयमानत्वात्। न द्वितीयः, युक्तं सोऽरोदीदित्यादिक्रियाविधिपठितानां स्वतः प्रयोजनाभावात्कल्पनानुपपत्तेश्च विधिनैकवाक्यत्वम्। वेदान्तानां तु न तथात्वम्। ब्रह्मप्रतिपादनेन स्वतः प्रयोजनवत्त्वात्। अत एवार्थवादाधिकरणे न वेदान्तवाक्यं किमप्युदाहृतम्।

नन्वस्तु भट्टमतानुसारेण धर्ममात्रविचारः पूर्वतन्त्रे। गुरुमतानुसारेण तु सकलवेदार्थविचारो वृत्तः। तथा हि—अध्यापनविधेः साधिकारत्वात्तत्र तावद्विधिः। तस्य चाध्ययनमन्तरेणानुपपत्तेः विहितं अध्ययनं तेन प्रयुज्यते। उपस्थितत्वात्। तथा चाध्ययनं अध्यापनशेषं तत्प्रयुक्तत्वात्। स्वाध्यायो ह्यध्ययननिर्वर्तकत्वात् तच्छेषः। तथा चाध्यापनशेषत्वात् स्वाध्यायस्य नार्थविवक्षा। विषनिर्हरणाद्याकर्षणमन्त्रवत्। किञ्च अध्येतव्य इति तव्यप्रत्ययावगतापूर्वार्थत्वात् नार्थविवक्षेति शङ्कायाम्। उच्यते। न तावदध्यापनविधिशेषत्वमध्ययनस्य। प्रमाणाभावात्। न च तत्प्रयुक्तत्वमात्रेण तच्छेषत्वं आधानस्योत्तरक्रतुविधिप्रयुक्तस्य तच्छेषत्वप्रसङ्गात्! यदप्युक्तमपूर्वशेषत्वमिति, तत्रापि न स्वतन्त्रापूर्वशेषत्वम्, तव्यप्रत्ययावगतकर्मकारकसमवेतादृष्टार्थत्वेऽपि दृष्टार्थज्ञानादिपरंपरया तस्य प्रयोजनवत्त्वेन न स्वतन्त्रादृष्टार्थत्वं इत्यारम्भणीयो विचारः। स च विचारः इत्थं प्रवर्तते। अधीतस्वाध्यायात् विदितपदपदार्थसङ्गतिकस्य आपातज्ञाने सति सन्देहो भवति। उद्भिदा यजेत पशुकाम इत्यत्र किं पशुफलार्थत्वेनोद्भिद्यागो विधीयते उत पशुकामनानिमित्ते विधीयत इति। तथा सत्रे ये यजमानाः त ऋत्विजः इत्यत्र किमृत्विज उद्दिश्य यजमानभावः विधीयते। उत यजमानानुद्दिश्यर्त्विग्भावः इत्यादि प्रत्यधिकरणं विचाराङ्गविप्रतिपत्त्या सन्देहे वेदार्थानिर्णयाद्वेदार्थनिर्णयार्थं प्रवृत्तं अथातो धर्मजिज्ञासेति। तत्र यद्यपि धर्मपदमस्ति। तथाऽपि तद्वेदार्थपरं व्याख्येयम्। तथा चोदनासूत्रेऽपि चोदनाग्रहणं वेदमात्रोपलक्षणम्। वेदसामान्यविषयाध्ययनविध्यनुरोधात्।

एवं स्थिते कथं वेदान्तानां अवगतार्थत्वमिति चेत्। न, यद्यप्यध्ययनविधिः सकलवेदाध्ययनं विधत्ते। तथाऽपि तस्य प्रतिवाक्याध्ययनं व्यापारभेदो वक्तव्यः। भूभोजनाङ्गारपात्रधारणादीतिकर्तव्यताभेदात्। तथा चाध्ययनविधिप्रयुक्तत्वेऽपि मुमुक्षूणां विरलत्वात् कर्मिणां बहुलत्वात् तदाकाङ्क्षानुरोधेन धर्ममात्रविचार उपपद्यते। एवं च

धर्मजिज्ञासेति धर्मग्रहणं उपपन्नं भवति। अन्यथा चोदनालक्षणो वेदार्थः इति स्यात्। चोदनाग्रहणं चानुपपन्नं वेदार्थमात्रस्य विचार्यत्वे वेदलक्षण इत्येव स्यात्।

ननु धर्मपदं वेदार्थमात्रपरम्। चोदनापदं वेदमात्रपरमिति चेत्; न, तथा सति वेदलक्षणो वेदार्थ इत्युक्तं स्यात्। तच्चाप्रतिपाद्यं किं वेदलक्षणो वेदार्थः, उतावेदलक्षण इति सन्देहाभावात्। चोदनासूत्रस्य वेदार्थमात्रलक्षणपरत्वेऽर्थशब्दो व्यर्थः, श्येनादेरपि वेदार्थत्वात्। धर्मलक्षणपरत्वे तु श्येनादेः हिंसात्वेन प्रतिषिद्धत्वात्तद्व्यावृत्तिः प्रयोजनम्। ननु चोदनाशब्दो विधिमात्रवाची। धर्मशब्दस्तु वेदार्थे वर्तते। तथा चोदनालक्षणो वेदार्थो नार्थवादादिलक्षणः इति सिध्यतीति चेत्; न, धर्मशब्दस्य वेदार्थे वृत्तिः किं रूढ्या। उत लक्षणया? नाद्यः। चैत्यवन्दनादावपि प्रयोगविप्रतिपत्त्या रूढेरनिश्चयात्। नापि जहत्स्वार्थ-लक्षणया। वेदार्थस्याऽधर्मत्वप्रसङ्गात्। गङ्गापदलक्ष्यस्यागङ्गात्ववत्। नाप्यजहत्स्वार्थ-लक्षणया। तथा सति विध्यर्थवादादिलक्षणवेदसमुदायार्थजातस्य लक्ष्यत्वे तस्य सर्वस्य चोदनालक्षणत्वे बोधिते वेदार्थस्त्वेतावानिति न सिध्यति। अथ चोदनालक्षणे धर्मज्ञानविधि-परमिदं सूत्रं इत्युच्यते। तदप्रक्रान्तं निष्प्रयोजनं च। वेदार्थमात्रपरत्वे अर्थशब्दोऽप्यनु-पपन्नः। श्येनादेरपि चोदनालक्षणत्वेन वेदार्थत्वेन च तद्व्यावृत्त्यर्थत्वानुपपत्तेरित्युक्तम्। चोदनालक्षण इत्यनुपपन्नम्। तस्य किं वेदलक्षण इत्यर्थः, उत विधिलक्षण इति? आद्ये वेदप्रमाणको वेदार्थ इति लक्षणलक्ष्ययोरभेदः। अन्त्ये अचोदनात्मको वेदभागोऽस्ति न वा? न चेत्, चोदनाग्रहणं व्यर्थम्। अस्ति चेत्सोऽप्यर्थवान्, उत निरर्थकः? आद्ये अचोद-नात्मकवेदार्थः कथं चोदनालक्षणः स्यात्। अन्त्ये चोदनालक्षणः चोदनार्थः इति लक्ष्य-लक्षणयोरभेदः तदवस्थः। धर्मलक्षणपरत्वे तु न कश्चिद्दोष इत्यभियुक्तवचनसामर्थ्यादपि धर्मविचार एव पूर्वतन्त्रे कृतो भवेत्, न ब्रह्मविचार इत्यगतार्थत्वात् ब्रह्मजिज्ञासा कर्तव्येति द्वितीयवर्णकं सिद्धम्॥

---

वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्—

## अथातो ब्रह्मजिज्ञासा. (१.१.१.)

इति । तत्राथशब्दः आनन्तर्यार्थः परिगृह्यते । नाधिका-

---

अथ तृतीयवर्णकम्

" तद्विजिज्ञासस्व तद्ब्रह्मेति " "सोऽन्वेष्टव्यः सविजिज्ञासितव्यः " इत्यादि-श्रुतिभिः अस्योत्थानादुत्थाप्योत्थापकभावः श्रुतिसङ्गतिः। शास्त्रप्रतिपाद्यस्य ब्रह्मणः जिज्ञास्यत्वप्रतिज्ञानादस्य शास्त्रसङ्गतिः। जिज्ञास्यत्वेन प्रतिज्ञाते ब्रह्मणि सर्वेषां वेदान्तानां समन्वयोक्तेः अस्य समन्वयाध्यायसङ्गतिः स्पष्टा। ब्रह्मलिङ्गानां वाक्यानां प्रतिज्ञाते ब्रह्मणि समन्वयोक्तेरस्याऽऽद्यपादेन सङ्गतिः। आद्यत्वादस्य सूत्रस्य अधिकरणसङ्गतिः नापेक्ष्यते। "पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना। आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् "॥ इति न्यायात् सूत्रस्थमथपदं विभज्य विवक्षितमर्थमाह—तत्र सूत्रस्थ-पदेषु मध्य इत्यर्थः। आनन्तर्यमर्थो यस्य सः तथा। अनभिमतमर्थं प्रतिषेधति—नेति।

---

### अथ तृतीयवर्णकम्

श्रीः। पुनर्विचारशास्त्रमारम्भणीयं न वेति विशिष्टाधिकारिसंभवासंभवाभ्यां सन्देहे अथ-शब्देनानन्तर्याभिधानमुखेन विशिष्टाधिकारिप्रतिपादनायाऽऽरम्भार्थत्वनिराकरणपरं भाष्यम्। तत्राऽथशब्दः आनन्तर्यार्थः परिगृह्यते। नाधिकारार्थः। ब्रह्मजिज्ञासाया अनधिकार्यत्वात्। इति। तन्न युज्यते। ब्रह्मणः तज्ज्ञानस्य च सन्प्रत्ययार्थेच्छां प्रति गुणभूतत्वेनेच्छाया अकृतिसाध्यत्वेन चाथशब्दार्थारम्भानन्वयेऽपि जिज्ञासाशब्दस्य रूढ्यर्थविचारप्रारम्भार्थत्वोपपत्तेः। प्रत्युत रूढिर्योगमपहरतीति न्यायात्तत्रैवान्वयो युक्तः। नच तदसिद्धिः। इदमतो जिज्ञास्य-मित्यादि—भाष्यकाराद्यभियुक्तप्रयोगस्यानन्यनिमित्तत्वेन रूढिसिद्धेः। प्रकृतिप्रत्ययाविनाभूत-विचारस्य लक्षणयोपस्थितत्वेन ब्रह्मतज्ज्ञानयोरप्यर्थतः प्राधान्यमाश्रित्य विचारप्रारम्भार्थत्वोपपत्तेः इति चेत्; न, अधिकारिविशेषस्य श्रवणविधिसन्निधिपठितस्य न्यायतः समर्पणाभावे शास्त्रपर्युदस्तत्वा-दिशङ्कया अनधिकारिकं शास्त्रं अनारम्भणीयं स्यात्। विश्वजिन्न्यायेनाधिकारिकल्पनायां सूत्रवाक्या-द्ब्रह्मविचारः कर्तव्य इति सामान्यतः त्रैवर्णिकाधिकारप्रतिपत्तौ पुनः स्वर्गकाम इत्यन्वये प्रसज्य-प्रतिषेधः स्यात्। सच सति संभवे न युक्तः। अथशब्देन त्वानन्तर्येऽभिहिते हेतुफलयोः

आनन्तर्यस्य मुख्यत्वात्तदभिधानपूर्वकं श्रवणविधिसन्निधिपठितमोक्षकामो वा ब्रह्मज्ञानकामो अधिकारी कल्प्यतामिति। न श्रुतौ प्रसज्यप्रतिषेध इति चेत्

किं सर्वाधिकारं विचारशास्त्रम् उत विशिष्टाधिकारम्? नान्त्यः। विधितः सर्वाधिकार-प्रतीतावर्थवादपर्यालोचनया विशिष्टाधिकारिसमर्पणे प्रसज्यप्रतिषेधः तदवस्थः। नाद्यः। किं सर्वेषां फलार्थत्वात् सर्वाधिकारित्वम्। उताध्ययनविधिप्रयुक्तानुष्ठानत्वाद्विचारस्य सर्वाधिकारत्वम्? नाद्यः। सर्वेषां दृष्टवैषयिकसुखपरित्यागेन अदृष्टचरे मोक्षे तज्जनकब्रह्मज्ञाने वा दृष्टसुख-विरोधिन्यर्थित्वानुपपत्तेः। अतएव रागिगीतः श्लोकः—

'अपि बृन्दावने शून्ये सृगालत्वं स इच्छति।'

इत्यादि। नन्वस्तु द्वितीयः। तथा हि 'स्वाध्यायोऽध्येतव्य' इति तव्यप्रत्ययो विधिरूपत्वात स्वनिष्ठं शब्दभावनाख्यं व्यापारमभिधत्ते। तस्य च भाव्याकाङ्क्षायां अध्ययन-प्रवृत्तिलक्षणार्थभावना भाव्यत्वेन सम्बध्यते। तस्याश्च भाव्याकाङ्क्षायां यद्यपि कर्माभिधायि-तव्यप्रत्ययानुरोधात् कर्मभूतस्वाध्यायप्राप्तिरेव भाव्यत्वेन संबद्धुं योग्या तथापि पुरुषार्थालाभे प्रवृत्त्यनुपपत्तेः फलवदर्थज्ञानं भाव्यत्वेन सम्बध्यते। तच्च ज्ञानं विचारं विना नेत्यध्ययन-विधिवशात् सर्वाधिकारं शास्त्रं इति चेत।

किमर्थज्ञानं अध्ययनविधेः अन्वयव्यतिरेकसिद्धं फलम्? उतार्थज्ञानमुद्दिश्याध्ययन-विधानान्नैयोगिकम्?। किं वा विधेः पुरुषार्थपर्यवसायित्वानुपपत्तिगम्यं? इति। नाद्यः। अध्ययनमात्रात् साङ्गाध्ययनाद्वा तादृशप्रतीत्यदर्शनात्। दर्शने वा तदर्थतया विचारप्रयुक्त्यनु-पपत्तेः। नान्त्यः। स्वतोऽपुरुषार्थभूताया अप्यक्षरावाप्तेः पुमर्थावगतिसाधनत्वात भाव्य-त्वोपपत्तेः। चित्रादियागभावनाभाव्यपश्वादिवत्। तथा सति कर्माभिधायितव्यप्रत्ययोऽप्य-नुगृहीतो भवति। न चाध्ययनादक्षरावाप्तेः भेदाभावात कथं भाव्यत्वमिति वाच्यम्। अवाप्तिर्नाम स्वाधीनोच्चारणक्षमत्वम्। तदर्थो वाङ्मनसयोः व्यापारोऽध्ययनमिति भेदसत्वात। किञ्चानुष्ठानोपयोग्यर्थज्ञानार्थेऽध्ययनस्य यस्य यस्मिन् कर्मण्यनधिकारः तस्य तत्कर्मप्रति-पादकवेदभागाध्ययनं न स्यात्। न चेष्टापत्तिः। स्वाध्यायोऽध्येतव्य इत्यविशेषेण विधिश्रवणात्।

ननु तवापि तदङ्गे तदनुष्ठेयपरमापूर्वाभावात् तद्वाक्याध्ययननियमापूर्वस्य कुत्रोपयोग इति चेत्; न, अनुष्ठानजन्यापूर्वाभावेऽपि प्रायश्चित्तजपादिजन्यापूर्वोपयोगोपपत्तेः। नन्वर्थज्ञान-

रार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वात् । मङ्गलस्य च वाक्यार्थे

---

अधिकार आरम्भः । तत्र हेतुमाह—ब्रह्मेति अयमाशयः । ब्रह्मणो नित्यसिद्धस्य आरभ्यत्वासम्भवात् । अथेन जिगमिषतीत्यादिवत्प्रकृत्यर्थेन सम्बन्धः, कूलं पिपतिषतीत्यादिवत् प्रत्ययार्थेन वा संबन्धः स्यात् । तन्न सम्भवति । प्रकृत्यर्थस्य ज्ञानस्य प्रमाणवस्तुपरतन्त्रस्य पुरुषतन्त्रत्वाभावादनारभ्यत्वं; प्रत्यायार्थस्य इच्छाया विषयसौन्दर्यलभ्यत्वेन पुरुषतन्त्रत्वाभावात् अनारभ्यत्वम् । यद्यपि जिज्ञासापदलक्षितस्य तन्निर्णीतविचारस्य पुरुषतन्त्रत्वेन आरभ्यत्वं संभवति, तथापि विशिष्टाधिकार्यलाभे शास्त्रमिदमनारभ्यं स्यात् । तथा चाथशब्दस्यानन्तर्यार्थपरिग्रहे विशिष्टाधिकारिलाभात् कर्तव्यपदाध्याहारेण च वाक्यार्थसमन्वयान्नाथशब्दस्याधिकारार्थतेति । ननु मङ्गलार्थोऽथशब्दोऽस्त्वित्यत आह—मङ्गलस्य चेति । चशब्द उक्तासंभवसमुच्चयार्थः । आरम्भार्थवन्मङ्गलार्थोऽपि न संभवतीत्यर्थः । तत्र हेतुमाह—वाक्यार्थ इति । समन्व-

---

मुद्दिश्याध्ययनस्य विधानान्नैय्योगिकं फलम् । न चेह हेत्वसिद्धिः । तदभावे वेदस्य तात्पर्यानुपपत्तेः । लोके अर्थज्ञानोद्देशेन प्रवृत्तशब्दे तात्पर्यदर्शनादिति मध्यमः पक्षः किं न स्यादिति चेत ; न, उद्दिश्यविधानस्यैव अनुपपत्तेः । तथा हि—अनवगते वेदार्थज्ञाने तदुद्देशेन विधानानुपपत्तिः । अवगते तु विशेषणीभूतवेदार्थस्यापि प्रागवगतत्वेन सुतरां तदनुपपत्तिः । न च वेदार्थस्य सामान्यतः प्रतीतावप्यग्निहोत्राद्यर्थविशेषोद्देशेन विधिः । तादृशार्थाप्रतीतौ तदुद्देशेन विधानानुपपत्तेः । प्रतीतौ वा विधिवैय्यर्थ्यमिति तुल्यो दोषः । अग्निहोत्राद्यर्थविशेषाणामनेकेषामेकेन पदेनोद्देशनानुपपत्तिश्च । न चोद्दिश्यविधानाभावे तात्पर्यानुपपत्तिः । किमर्थज्ञानमुद्दिश्य विधानमेव तात्पर्यम्, उत तात्पर्ये लिङ्गम् ? नाद्यः, तदर्थप्रतीतिप्रयोजनकत्वस्य तात्पर्यस्य ततोऽन्यत्वात । न द्वितीयः । शब्दधर्मतात्पर्यं प्रति शब्दधर्माणामेवोपक्रमोसंहारादीनां लिङ्गत्वात् ।

नन्वर्थज्ञानमुद्दिश्य विधानाभावे तस्याधिकारिविशेषणत्वानुपपत्तेरन्वयव्यतिरेकसिद्धफले तस्मिन्सति विश्वजिन्न्यायेन कल्पनानुपपत्तेः नियोज्यालाभादनध्ययनमेव प्राप्तम् । नन्वध्यापनविधिप्रयुक्तानुष्ठानमध्ययनम् । ननु चाऽध्यापनविधावप्यधिकारो न श्रुतः । कल्पनायां चाध्ययनविधावेवाधिकारं कल्पयित्वा स्वविधिप्रयुक्तत्वमेवाध्ययनस्यास्तु । लाघवात् । अध्यापनं तु तत्प्रयुक्तानुष्ठानं किन्न स्यात् । ननु लिखितपाठादप्यध्ययनसिद्धेः अध्ययनविधिः अध्यापनं न

प्रयोजयतीति चेत्। तर्हि अविहिताध्ययनेनाप्यध्यापनसिद्धेः प्राङ्मुखत्वाद्यङ्गोपेताध्ययनं न सिध्येत्। यदि च प्राङ्मुखदर्भपवित्रपाणिमध्यापयीतेति श्रवणाद्विहितमेवाध्ययनं प्रयुञ्जत इत्युच्येत। तस्याऽऽचार्याधीनो वेदमधीष्वेति स्मरणाल्लिखितपाठप्रतिषेधादध्ययनविधिप्रयुक्तमेवाध्यापनमस्त्विति चेत्।

उच्यते। आचार्यत्वं यद्यपि न विध्युद्देशे फलत्वेनावगतम्। तथाप्यात्मनेपदसामर्थ्यादवगम्यत एव। तथा हि—सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः। सम्माननं पूजनम्। उत्सञ्जनं उत्क्षेपणम्। आचार्यकरणं आचार्यत्वम्। ज्ञानं घटादिविषयम्। भृतिः वेतनम्। विगणनं ऋणादेः प्रतिनिर्यातनम्। व्ययः धर्माद्यर्थो द्रव्यव्ययः। एषु साध्येषु नयतेः आत्मनेपदविधानादुपनयीतेत्यात्मनेपदादुपनयनसाध्यं अचार्यत्वं तमध्यापयीतेति तच्छब्देनैकप्रयोगतयावगतप्रधानभूताध्यापने संबध्यते। उपनयनस्य माणवकसंस्कारद्वारा दृष्टोपगमनादिद्वारेण तदङ्गत्वात्। तथाचाचार्यत्वकामोऽष्टवर्षं ब्राह्मणमुपनीयाध्यापयेदिति विधिः परिणम्यते। अथ वा "उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥" इति मनुवचनाद्वाऽऽचार्यत्वेन साधिकारोऽध्यापनविधिः अध्ययनं प्रयोजयति।

ननु स्वतन्त्रविधिविहितस्याध्ययनस्याध्यापनविधिविषयत्वतदङ्गतयोरभावे कथं तत्प्रयुक्तानुष्ठानत्वं इति चेत्; न, आधानस्य स्वविधिविहितस्योत्तरकाम्यकर्मविधिविषयत्वतदङ्गताऽभावेऽपि तत्प्रयुक्तानुष्ठानत्ववदुपपत्तेः। तथाहि—किमाधानं पुरुषमुद्दिश्य नित्यतया विधीयते? उत फलमुद्दिश्य काम्यतया? नाद्यः। अग्नीनादधीतेति द्वितीयया कर्मकारकसंस्कारताप्रतीतेः। न द्वितीयः। अश्रूयमाणफलत्वात्। संस्कारकर्मत्वप्रतीतेश्च। न च सक्तुन्यायेन विभक्तिविपरिणामात्र संस्कारकर्मतेति युक्तम्। तत्र संस्कृतानां सक्तूनां भस्मभावादुत्तरत्र विनियोगानुपपत्तेः तथाऽस्तु। अत्र त्वाहवनीये जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिवाक्यैः संस्कृतानां विनियोगात्र तथा। अतः उभयविधाधिकारशून्य आधानविधिः नाधाने प्रवर्तयितुं क्षम इत्युत्तरकाम्यविधिप्रयुक्तता।

ननु तथाऽप्युत्तरक्रतुविधिमात्रप्रयुक्तत्वोपपत्तेः कुतस्तद्विशेषकाम्यविधिप्रयुक्तत्वम्। उच्यते। नित्यविधिहर्युपादेयमेवानुष्ठापयति। नोद्देश्यमाहवनीयादि। काम्यविधिस्तु यदुद्देश्यमुपादेयं वा विना स्वयं न सिध्यति तत्सर्वमनुष्ठापयत्येव। यथा सौवर्णे पीठे समुपविशेदिति। काम्यविधिप्रयुक्ताधानवदध्ययनमध्यापनविधिप्रयुक्तमिति।

अत्रोच्यते । किमुपनयीतेत्यात्मनेपदादाचार्यत्वं विधीयत इत्युच्यते । उत नैयोगिकफलत्वेन कीर्त्यते । नाद्यः । उपनयनभावार्थमात्रविषयत्वात् विधेः । न द्वितीयः । आचार्यत्वस्य आचारान् ग्राहयतीति व्युत्पत्त्या हेतुकर्तृत्वस्य लौकिकत्वात् । न चाङ्गोपाङ्गसहित-नयत्यर्थसाध्यमाचार्यत्वं लौकिकमिति वाच्यम् । तद्यस्मात् सः आचार्य इति तादृशनयत्यर्थं प्रति प्रयोजककर्तृत्वस्य लौकिकस्यैवाऽऽचार्यत्वात् । सहपठितसम्माननादीनां लौकिकत्वात् । आचार्यत्वस्याऽलौकिकत्वेऽपि नयत्यर्थसाध्यस्य तस्याध्ययनफलत्वं कल्पनीयम् । यत्तु तमाचार्यं प्रचक्षते इति मानवं वचनं तदाचार्यसंज्ञापरं वक्ष्यमाणपूजाद्यर्थं, प्रचक्षत इति वचनात् अतोऽध्यापनविधिप्रयुक्तत्वेऽध्ययनस्य साधकं न पश्यामः । प्रत्युत बाधकमप्यस्ति । तथाहि— किमध्यापनविधिर्विहितं अध्ययनं प्रयुङ्क्ते । उताऽविहितम् । नाद्यः । स किमध्ययनविधिः स्वप्रतिपत्तये विषयमिव अधिकारिणमप्यपेक्षते, न वा? आद्ये तस्य साधिकारत्वसिद्धिः । द्वितीये यं कञ्चित् अध्यापयेत् । तच्च न संभवति । अध्ययनानधिकारिणां अनुपनीतानां शूद्राणां च स्वप्रयोजनाभावे आचार्यगुणभावेन प्रवृत्त्यनुपपत्तेः । अविहिताध्ययनं प्रयुङ्क्त इति पक्षेऽपि तुल्यो दोषः ।

नन्वनधिकारिणामपि केषांचित्कुतूहलादिना प्रवृत्तिसंभवादध्यापनसिद्धिरिति चेत् । किं तान् अनुपनीयाऽध्यापयेत उपनीय वा? आद्ये उपनयनरूपाङ्गवैकल्यादाचार्यत्वफलासिद्धिः । अन्त्ये बहुवित्तव्ययायाससाध्ये उपनयने अध्ययने च कुतूहलमात्रादप्रवृत्तिः । किञ्च "श्रोत्रिया अननुवाक्या अनग्नयः शूद्रसधर्माणो भवन्ति" इत्यकरणे प्रत्यवायश्रवणात् स्वाङ्गभूतोपनयन-नित्यत्वाच्चाध्ययनं नित्यम् । अध्यापनं च काम्यतया अनित्यम् । आचार्यत्वस्य स्वतः पुरुषार्थत्वाभावेन नित्येहितत्वाभावात् ।

"षण्णान्तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥"

इति विहितद्रव्यप्राप्त्युपायत्वात् । तथा च तत्प्रयुक्तत्वेऽध्ययनस्य नित्यानित्यसंयोग-विरोधः । द्रव्यस्य वृत्त्यर्थत्वेन नित्येहितत्वेऽपि कस्यचित्प्रमादालस्यादिना अप्रवृत्तौ नित्याध्य-यनासिद्धेः ।

नन्वध्ययनस्य स्वविधिप्रयुक्तत्वेऽपि तुल्यो दोषः । प्रमादालस्यादिना कस्यचिदप्रवृत्तेरिति चेत् न, विधितः कर्तव्यतावगमः । कालविशेषे देशविशेषे कर्मविशेषविषये कर्तृविशेषस्य

अशक्तत्वेऽपि यावच्छक्त्यनुष्ठानं प्रयोजयत्येव प्रत्यवायभयात् । कामना तु नैवम् । अतः साधकाभावात् बाधकसत्वाच्च नाध्यापनविधिप्रयुक्तमध्ययनम् । अपि तु स्वविधिप्रयुक्तम् । न चाधिकार्यभावः । वाजसनेयिनां शाखायां सर्वस्मृतिषु चोपनीतं प्रकृत्याध्ययनविधानादुपनीतोऽधिकारी । तदुद्दिश्याध्ययनलक्षणः संस्कारः स्वाध्यायकर्मको विधीयते कर्माभिधायितव्यप्रत्ययबलात् । तदाप्तिश्च संस्कारफलं गां दोग्धि पय इतिवत् ।

नन्ववाप्तिः स्वाधीनोच्चारणक्षमत्वं, तद्धेतुत्वेनाध्ययनस्य लोकतः प्राप्तत्वान्नियमविधिर्वाच्यः स नोपपद्यते । तथा हि किं क्रत्वर्थतया नियमः । उत पुरुषार्थतया ? नाद्यः । व्रीहीनवहन्तीतिवत् कश्चित क्रतुं अनारभ्याधीतत्वेनाध्ययनस्याक्रत्वर्थत्वात् । न द्वितीयः । याजनाध्यापनप्रतिग्रहैः ब्राह्मणो धनमार्जयेत् इतिवत् फलाश्रवणात् इति चेत्; न, मुखतः फलाश्रवणेऽपि अध्ययनसंस्कारस्य प्रयोजनाकाङ्क्षायां अक्षरावाप्त्यर्थज्ञानकर्मानुष्ठानादिदृष्टद्वारा पुरुषार्थपर्यवसायित्वे संभवति न स्वतन्त्रफलार्थत्वम् । न वा सक्तुन्यायेन विभक्तिविपरिणामः । तथा च परंपरालभ्यपुरुषार्थत्वे नियमादयमर्थो लभ्यते—गुरूपसदनपूर्वाध्ययनावाप्तस्वाध्यायार्थः स्वस्वफलाय प्रभवतीति । तस्य चाध्ययनस्य नित्यत्वम् । अकरणे प्रत्यवायश्रवणात्, अङ्गभूतोपनयननित्यत्वाच्च । न च तदसिद्धिः ।

"अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः "॥

इत्युपनयनाकरणेऽपि प्रत्यवायश्रवणात् ।

ननु तथाऽप्युपनयनस्याध्ययनाङ्गत्वे प्रमाणाभावात् तन्नित्यतया कथमध्ययननित्यता । न चाष्टवर्षं ब्राह्मणमुपनयीतेति द्वितीयया संस्कारकर्मत्वप्रतीतेः संस्कारस्य च प्रोक्षणादिवदन्याङ्गत्वनियमात्तदङ्गत्वसिद्धिरिति वाच्यम् । श्रुत्यादिविशेषसंबन्धप्रमाणाभावेऽध्ययनविशेषसंबन्धासिद्धेः । तस्माद्यथा हिरण्यं भार्यमिति हिरण्यसंस्कारतयाऽवगतं भरणं श्रुत्यादिविशेषसम्बन्धप्रमाणाभावात्, संस्कारत्वमात्रात क्रत्वर्थत्वे चाविशेषात् सर्वक्रतुसम्बन्धप्रसङ्गात्, एकस्य संस्कार्यस्य सर्वक्रतुसम्बन्धित्वे प्रमाणाभावात, अन्याङ्गतामनश्नुवानः संस्कारकर्मत्वं परित्यज्याभ्युदयफलं स्वतन्त्रं विधीयते । एवमुपनयनमपि स्वतन्त्रमभ्युदयफलमिति ।

अत्रोच्यते । यद्यप्यध्ययनेन विशेषसम्बन्धप्रमाणं श्रुत्यादिकं तार्तीयं नास्ति । तथापि चातुर्थिकं औपादानकप्रमाणमस्त्येव । तथा हि । आचार्याधीनो वेदमधीष्वेति वच-

नालिखितपाठानुपपत्तेः गुरूपगमनमन्तरेणाऽध्ययनासिद्धेः, उपगमनस्य च नानाविधेतिकर्तव्यताकोपनयनसंस्कारविधिसामर्थ्यावगतसंस्कारविशिष्टस्याध्ययनाङ्गता अध्ययनविधिसामर्थ्यादवगम्यते। किञ्च "अष्टवर्षं ब्राह्मणमुपनयीत" 'तमध्यापयीत' इत्यस्य "एतया ग्रामकामं याजयेत्" इतिवद्वृत्त्यर्थत्वेन प्राप्तप्रयोजकव्यापारानुवादेन प्रधानकर्तृव्यापारविधिपरत्वस्य वक्ष्यमाणत्वादष्टवर्षो ब्राह्मण आचार्येण नीयमान उपगच्छेत्। सोऽधीयीतेति तच्छब्दश्रुतिसहितोपनयनविधिरेव तस्य अध्यापनाङ्गत्वं गमयतीति तार्तीयमपि प्रमाणमस्त्येव। अपि च **वाजसनेयिनां** सर्वस्मृतिषु चोपनयनं प्रकृत्याध्ययनाम्नानात् फलवदध्ययनसन्निधिपठितं उपनयनं तदङ्गमिति प्रकरणमपि प्रमाणमित्यङ्गभूतोपनयननित्यतयाध्ययननित्यत्वात् तस्याध्यापनविधिप्रयुक्तत्वे नित्यानित्यसंयोगविरोध एवेति।

**ननु** पितुः पुत्रोत्पादनविधिः नित्यः। पुत्राभावे लुप्तपिण्डोदकक्रियाणां नरकपातश्रवणात्। तथा च पिण्डपितृयज्ञाद्यनुष्ठानद्वारा नरकपातत्राणं पुत्रोत्पादनविधेः प्रयोजनम्। तच्चाननुशिष्टेन पुत्रेणानुष्ठातुमशक्यमिति तच्छेषतयोपनयनाध्यापनार्थज्ञापनानुष्ठापनरूपमनुशासनं विदधाति "तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः तस्मादेनमनुशासति" इति वाक्यम्। न च पुत्रोत्पादनविधिशेषतया नित्यत्वे उपनयनाध्यापनयोः प्रागुक्ताचार्यकरणफलकत्वमनुपपन्नं स्यादिति वाच्यम्। दर्शपूर्णमासादिवत् नित्यकाम्यतोपपत्तेः। तथा च न नित्यानित्यसंयोगविरोध इति चेत्; नायं पुत्रोत्पादनविधिशेषतया स्वतन्त्रतया वाऽनुशासनविधिः, किन्तु संप्रदानकर्मविधिशेषोऽयं अर्थवादः। तथा हि—यदा प्रैष्यन्मन्यते अथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याह अहं ब्रह्माऽहं यज्ञोऽहं लोकः इति। अस्यार्थः। अथ प्रारब्धकर्मक्षयानन्तरं अतः अन्यकर्मणामभिव्यक्तेः संप्रदानमुच्यत इति शेषः। यदा प्रैष्यन् मन्यते। श्रुत्युक्तगर्दभारोहणस्वप्नादिवशेनात्मनो भाविमरणं जानाति तदा स्वेनासम्पादितानां वेदतदर्थतत्फलानां पुत्रेऽनुष्ठेयतया समर्पणं त्वं ब्रह्मेत्यादि। पुत्रस्य च तेषामनुष्ठेयत्वेन स्वीकरणं अहं ब्रह्माऽहं यज्ञोऽहं लोक इति। एतच्च पूर्वं पुत्रस्यानुशासनाभावेऽनुष्ठेयतया समर्पणमनुष्ठेहतया स्वीकरणं चानुपपन्नमिति तदर्थं पुत्रोत्पादनविधिशेषतया प्राप्तमनुशासनमनुवदति तस्मात्पुत्रमिति वाक्यम्। तच्चानुशासनं कर्तव्यताज्ञापनमेव नानुष्ठानपरम्। अनुशासितुः पितुः आयुर्नियमाभावेनानुष्ठापनपर्यन्तमवस्थानानुपपत्तेः। तथैव श्रुतिगतमपि लिङ्गं श्वेतकेतुर्हारुणेय आस। तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यम्। न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति कर्तव्यताज्ञापनमेवानुशासनं दर्शयति। नोपनयनाध्यापनादि। तथा चोपनयनाध्यापनयोः पुत्रोत्पादविधिशेषतया कथं नित्यत्वम्? कथं वा न नित्या-

नित्यसंयोग विरोध इति ? किञ्चाचार्यान्तरे मृते आचार्यान्तरकरणं न स्यात् । न च मुख्याभावे प्रतिनिध्युपादानवदाचार्यान्तरप्रत्यानयनं युक्तम् । अवश्यकर्तव्यस्य ह्यकरणे प्रत्यवायभयात् मुख्याभावे प्रतिनिधिराश्रितः । अध्ययनं किं माणवकस्यावश्यकर्तव्यम् ? उत मृतस्याचार्यस्य । अथ वा प्रतिनिधेराचार्यस्य । नाद्यः । तस्य त्वयाऽनङ्गीकारात् । न द्वितीयः । मृतस्याधिकाराभावात् । नापि तृतीयः । तस्यावश्यकर्तव्यतासिध्युत्तरकल्प्यत्वात् । तथा च परस्पराश्रयप्रसङ्गः ।

नन्वेकस्मिन्मृतेऽप्यन्यः आचार्यः स्वाधिकारसिध्यर्थं तमेव माणवकं अध्यापयतीति चेत् । स किं तमुपनीयाध्यापयति, उतानुपनीय ? नाद्यः । पुनरुपनयनाभावात् । न द्वितीयः । उपनयनरूपाङ्गाभावे वैगुण्यात् फलाभावप्रसङ्गात् । न च माणवकान्तरे अङ्गमुपनयनं निर्वृत्तम् । तर्हि तत्रैवाध्यापनस्यापि निर्वृत्तत्वात् माणवकान्तरासङ्ग्रहप्रसङ्गात् । वृत्त्युपचयार्थः सङ्ग्रह इति चेत् । दरिद्रस्यासङ्ग्रहप्रसङ्गात् । अध्ययनस्य स्वविधिप्रयुक्तत्वाभावे अल्पग्रामवासिनामध्ययनार्थं ग्रामान्तरगमनं न स्यात् । अतः स्वविधिप्रयुक्तमेवाध्ययनम् ।

नन्वध्ययनस्य स्वविधिप्रयुक्तत्वे तत्प्रयुक्ततयैवाध्यापनविधेः तमध्यापयीतेति अध्यापने विधिः व्यर्थ इति चेन्न । अस्य वाक्यस्य वृत्त्यर्थत्वेन प्राप्ताध्यापनानुवादेनाध्ययनमात्राविधिपरत्वात् एतया ग्रामकामं याजयेदितिवत् । ननु विहिते दक्षिणाद्यङ्गसहितेऽध्ययने वृत्त्यर्थत्वेनाध्यापनप्राप्तिः । तत्प्राप्तौ च तदनुवादेनाध्ययनविधिरिति परस्पराश्रय इति चेत ; न, ग्रामकामं याजयेदित्यत्रापि तथात्वप्रसङ्गात । यदि स्वविधिविहितेषु ज्योतिष्टोमेन यजेतेत्यादिषु दक्षिणायुक्तेषु यागत्वसामान्यात्प्राप्तं गुणकर्तृव्यापारं अनूद्याप्राप्तः प्रधानकर्तृव्यापारो विधीयत इति न परस्पराश्रय इत्युच्यते । तर्हीहाऽपि तत एव प्राप्तिमनूद्याध्ययनरूपप्रधानकर्तृव्यापारविधानान्न परस्पराश्रय इति तुल्यम् । अथवा अध्ययनविधिसामर्थ्यादेव भाविनीं प्राप्तिं अध्यापनस्य आश्रित्य तदनुवादेनाध्ययनविधिरित्यदोषः ।

ननूपनयीतेत्यत्र प्रयोजकव्यापार एव विधातव्यः न प्रयोज्यमाणवकव्यापारः । तद्वाचकपदाभावात् । अध्यापयीतेत्यत्र प्रयोज्यव्यापारस्य धातुनाऽभिहितत्वेऽपि प्रयोजकव्यापाराभिधायिनोऽपि णिचः प्रयोगादुक्तक्रमसारूप्याय स एव विधातव्य इति चेत् ; न, तत्र प्रयोज्यव्यापाराभिधायकपदाभावेऽपि नयतिधातुप्रयोगादेव तत्कर्मणो माणवकस्यापि व्यापारः प्रतीयते । अजां ग्रामं नयतीत्यादौ तथा दर्शनात् । तथा च स एव नयतिना लक्षणयोपादानाय विधीयते । अध्यापयीतेत्यत्रापि माणवकस्यैव व्यापारोऽध्ययनं विधीयते । नाचार्यस्य ।

समन्वयाभावात्। अर्थान्तरप्रयुक्त एव हि अथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति। पूर्वप्रकृतापेक्षायाश्च फलतः आनन्तर्याव्यतिरेकात्। सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते

---

याभावादिति मङ्गलरूपार्थस्याथपदशक्यत्वाभावात् कर्त्रादिकारकभावेन समन्वयाभावादित्यर्थः। ननु ग्रन्थादाववश्यं मङ्गलस्य कर्तव्यतया तदर्थोऽथशब्दोऽस्त्वित्यत आह—अर्थान्तरेति। मङ्गलरूपादन्योऽर्थोऽर्थान्तरमानन्तर्यम्। तस्मिन्प्रयुक्तोऽप्यथशब्दः श्रुत्या श्रवणमात्रेण मङ्गलफलको भवतीत्यर्थः।

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्वाऽथ निर्यातौ तस्मान्माङ्गलिकावुभौ॥

इति स्मृतेः मङ्गलं नाम भाविशुभं अविघ्नपरिसमाप्तिप्रचयगमनादिलक्षणम्। नन्वथशब्दस्याऽऽनन्तर्यविवक्षायामपि विशिष्टाधिकारिलाभः कथमित्यत आह-पूर्वप्रकृतेति। लोके पुरुषस्य कस्यचिदेव ब्रह्मजिज्ञासा जायते। जायमानायास्तस्याः आकस्मिकत्वानुपपत्तेः पूर्वप्रकृतं कारणं किमप्यपेक्ष्य तदानन्तर्यं विवक्षणीयम्। यस्मिन्सत्येव यज्जायते यदभावे यत् न जायते, तत्तस्य फलं कार्यमिति यावत्। तस्मात्फलतः फलत्वादानन्तर्यस्याव्यतिरेकात् फलत्वानन्तर्ययोः भेदाभावात् सा कस्यचित्कारणस्य फलं भवितुमर्हति। तच्च कारणं यस्येयं जिज्ञासा जायते तस्य अधिकारिणो विशेषणं भवितुमर्हति

---

वृत्त्यर्थत्वेन प्राप्तत्वात्। तथा चाष्टवर्षो ब्राह्मणः उपगच्छेत्। सोऽधीयीतेति वाक्यार्थः संपद्यते।

ननु वृत्त्यर्थप्राप्तप्रयोजकव्यापारानुवादेन अष्टवर्षत्वब्राह्मणत्वलक्षणगुणविधिपरमिदं वाक्यं किं न स्यादिति चेत्; न, एकैकगुणविधाने अतिप्रसङ्गः। गुणद्वयविधाने च प्राप्ताध्यापनानुवादेनाष्टवर्षत्वब्राह्मणत्वरूपानेकगुणविधानाद्वाक्यभेदप्रसङ्गः। ननु त्वत्पक्षेऽपि प्रेयप्रेरकत्वलक्षणविधिपुरुषसम्बन्धनिमित्तं किं? न तावद्ब्राह्मणत्वमात्रम्, स्थविरस्यापि प्रसङ्गात्। नाप्यष्टवर्षत्वम्। शूद्रस्यापि प्रसङ्गात्। नापि विशिष्टम्। विशेषणानां परस्परमाकाङ्क्षाविरहेण वैशिष्ट्याप्रतीतेः। न चारुणैकहायन्यादीनां प्रथमतः प्रत्येकं क्रयसंबन्धेऽपि गुणमात्रस्य

**तत्किमपि वक्तव्यमित्यर्थः। यद्वा यत्र यत्फलत्वं तत्र तदानन्तर्यमिति व्याप्तेः व्यभिचाराभावात् जिज्ञासायामपि फलतोऽवगतं यदानन्तर्यं तेन सा पूर्वप्रकृतकारणविषयाकाङ्क्षां जनयतीति तत्कारणं वक्तव्यमिति निष्कर्षः। नन्वथशब्दस्याऽऽनन्तर्यार्थकत्वमस्तु। जिज्ञासायाः पूर्वप्रकृतापेक्षाप्यस्तु; तथाऽपि जिज्ञासातत्पूर्वप्रकृतयोः फलफलिभावनियमः क्व दृष्ट इत्याशङ्क्य दृष्टान्तोपन्यासपूर्वकं परिहरति—**सति चेति। **यथाऽयं दृष्टान्तः एवमित्यन्वयः। पूर्वकाण्डे हि "ब्राह्मणेन निष्कारणो धर्मष्षडङ्गो वेदः अध्येय" इत्यादि— विधिना अधीतसाङ्गस्वाध्यायस्य ज्ञेयश्चेति वेदार्थज्ञानं संपादनीयं इत्यादिं श्रुत्यर्थं पर्यालोच्य सूत्रितवाञ्जैमिनिराचार्यः—अथातो धर्मजिज्ञासेति। तत्र यथा धर्मजिज्ञासा स्वकारणं वेदाध्ययनं नियमेनाऽऽक्षिपति। एवं ब्रह्मजिज्ञासापि स्वकारणं अधिकारि-**

---

जातिमात्रस्य वा अमूर्तत्वात् क्रयसाधनत्वानुपपत्त्या पार्ष्ठिकवैशिष्ट्यप्रतीतिवदत्रापि स्यादिति वाच्यम्। विधिपुरुषसम्बन्धनिमित्तस्याशाब्दत्वप्रसङ्गादिति। उच्यते। अस्त्येव जातिविशिष्टं वयो वयोविशिष्टा वा जातिः। न चाशब्दत्वम्। तथात्वेऽपि साङ्गानुष्ठानसामर्थ्यवदधिकारिविशेषणत्वोपपत्तेः। शब्दतात्पर्यविषयत्वेन शाब्दत्वसम्भवाच्च। अर्थज्ञानकामना तु नाधिकार इति प्रागेवावोचाम।

नतु यदि नयविधानुप्रयोगादेव माणवकव्यापारो गम्यते। तर्हि तत्र कर्तृत्वेनोपस्थितस्य माणवकस्योपादेयत्वात्तद्विशेशणं ब्राह्मण्यादि नाधिकारिविशेषणं स्यात्। उपादेयं नाम साक्षाद्वा परंपरया वा विधिप्रमुक्तानुष्ठेयम्। तद्यथा 'दण्डी प्रैषानन्वाह' 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' 'व्रीहिभिः यजेत' 'इन्द्राय स्वराज्ञ' इत्युपादेयकर्तृकरणसंप्रदानविशेषणानि। उपादेयविशेषणस्य च गुणभूतस्योद्देश्याधिकारिविशेषणत्वे प्राधान्यापत्त्या वैरूप्यापातादिति चेन्न। किं गुरुमतमाश्रित्य वैरूप्यं चोद्यते, उत भट्टमतम्? नाद्यः, तन्मते नियोगस्य वाक्यार्थत्वात् स्वरूपप्रतिपत्त्यादिहेतुत्वेन प्रथमं अन्वयः। पश्चात्तस्य साध्यत्वेनोपस्थितस्य आकाङ्क्षावशात्कर्तृत्वेनाप्यन्वयादनुपादेयविशेषणमधिकार इत्यस्तु। न द्वितीयः। भट्टमते तु भावनायाः वाक्यार्थत्वात्तस्याश्च कृतिरूपायाः आश्रयाकाङ्क्षायां प्रथमं कर्तृत्वेनान्वयः। पश्चात्कर्तुः फलसम्बन्धान्ममेदं अभिलषितसाधनमिति फलस्वामित्वलक्षणाधिकारान्वयः। तन्मते उपादेयविशेषणमप्यधिकारहेतुर्भवत्येव। गुरुमतेऽपि राजसूये राजत्वं कर्तृविशेषणं अनुपादेयमपि अधिकारिविशेषणमित्यङ्गीकार्यम्। अन्येनाधिकारिणा राजत्वस्य कर्तृविशेषणतया संपादयितु अशक्यत्वात्। तथा च ब्राह्मणत्वादिकमपि तद्वत्किं न स्यात्। न तृतीयः।

एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यम्। स्वाध्यायानन्तर्यं तु समानम्। नन्विह कर्मावबोधानन्तर्यं विशेषः। न। धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। यथा च हृदयाद्यवदानानामानन्तर्यनियमः क्रमस्य विवक्षितत्वात्, न तथेह क्रमो विवक्षितः शेषशेषित्वे अधिकृताधिकारे वा प्रमाणाभावात् धर्मब्रह्म-

---

विशेषणं नियमेनाक्षिपति इत्यर्थः। तद्वक्तव्यमिति। येनाधिकारिविशेषणज्ञानेन विना अधिकारिणां शास्त्रे प्रवृत्तिः न सम्भवति तत्प्रतिपादनेन तज्ज्ञापनीयमिति भावः। ननु धर्मवद्ब्रह्मणोऽपि वेदार्थत्वेन तन्मीमांसाया अपि पूर्वप्रकृतं वेदाध्ययनमेवास्तीति शङ्कते—स्वाध्यायेति। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। परिहरति—समानमिति। विशेषकारणाभावे शास्त्रान्तरत्वाभावात् पृथगारंभो न स्यादिति भावः। विशेषकारणमाशङ्कते—नन्विति। अतो विशेषसामग्रीकत्वात् शास्त्रान्तरमिदं आरब्धव्यमिति भावः। वेदाध्ययनं कर्मावबोधश्चेति द्वयमपि नियमेन यदि कारणं अपेक्षितं स्यात् तदा त्वदुक्तशङ्का स्यात्। नैतदस्ति व्यभिचारादिति परिहरति—नेति। तत्र हेतुमाह—धर्मेति। यस्मिन् सत्येव ब्रह्मजिज्ञासा भवति यदभावे न भवति तदेव तत्कारणं वक्तव्यम्; धर्मजिज्ञासा-व्यतिरेकेऽपि वैराग्यादिमतो ब्रह्मजिज्ञासादर्शनात् व्यतिरेकव्यभिचारान्न तत्पुष्कलकारणमिति भावः। ननु धर्मब्रह्मजिज्ञासयोः क्रमार्थोऽथशब्दो भविष्यति यथा हृदयस्याऽग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः इति शङ्कते—यथेति। नेति परिहरिष्यन् दृष्टान्तवैषम्यं हेतुमाह—क्रमस्येति। हृदयाद्यवदानानामेकपुरुषानुष्ठेयत्वेन युगपदनुष्ठातुमशक्यत्वात् क्रमो विवक्षितः। इह तु जिज्ञासयोः भिन्नपुरुषानुष्ठेयत्वेन तथा क्रमो न विवक्षितः। क्रमार्थोऽथशब्दो नेति सम्बन्धः। ननु धर्मब्रह्मजिज्ञासयोः एककर्तृकत्वं प्रयाजदर्शपूर्णमासयोरिव, यथा वा चमसेनापः प्रणयेत्, गोदोहनेन पशुकामस्येति प्रणयनयोः, यथावा दर्शपूर्णमासाभ्यां इष्ट्वा सोमेन यजेतेत्यत्र दर्शपूर्णमाससोमयोः अधिकृताधिकारविषययोः एककर्तृकत्वं तद्वत् स्यादित्यत आह—शेषेति। प्रमाणाभावादिति।

---

मन्मते यद्यपि श्रेयस्साधनत्वमेव विध्यर्थः। श्रेयश्च साधनत्वरूपोपाधित्वेन प्रथमं कस्येदं श्रेयस्साधनमित्याकाङ्क्षायां ममेदं श्रेयस्साधनमित्यधिकारान्वयः। पश्चादकर्तुः श्रेयस्साधनत्वानु-

श्रुत्यादीनां मध्ये अन्यतममपि प्रमाणं न पश्यामः। अतो नैकपुरुषानुष्ठेयत्वं तयोः। अतश्च न क्रमार्थोऽथशब्द इति भावः। किञ्च धर्मब्रह्मजिज्ञासयोः फलभेदाज्जिज्ञास्यभेदाच्च नैकपुरुषानुष्ठेयत्वं नियतमित्याह—धर्मेति। फलभेदमुपपादयति—अभ्युदयेति।

---

पपत्तेः कर्तृत्वेनाप्यन्वय इत्यनुपादेयविशेषणमेवाधिकारिविशेषणम्। तथाऽपि प्रकृते उपादेयविशेषणत्वं सिद्धम्।

तथाहि—जातिवयोविशिष्टस्य माणवकस्य व्यापारः उपगमनादि सामान्यतः श्रेयस्साधनत्वेन विधिशब्देन प्रतिपाद्यते किन्तच्छ्रेय इति विशेषाकाङ्क्षायां माणवकगतनयत्यर्थजन्यसंस्कारः सम्बध्यते। तथाच तादृशफलभोक्तृत्वेन प्रथमं माणवकोऽन्वेति विध्यर्थश्रेयस्साधनत्वस्वरूपोपाधिभूतश्रेयोभोक्तृत्वान्वयस्य प्रथम्यात्। तदवच्छेदकं ब्राह्मण्यादिकं अनुपादेयविशेषणत्वात् भवत्यधिकारिविशेषणम्। पश्चात् प्रयोज्यव्यापारविषयप्रयोजकव्यापाराभिधायिनो नयतेः प्रयोगसामर्थ्यात् स्वव्यापारं प्रति कर्तृत्वेनापि माणवकोऽन्वीयताम्। को दोषः? तस्मादङ्गकालस्य प्रधानकालान्वयित्वनियमाभावादतीतेऽप्यष्टवर्षत्वेऽप्यध्ययनसम्भवादनुपादेयविशेषणत्वात् अष्टवर्षत्वादिविशिष्टस्याधिकारिणो लाभात् त्वदुदाहृतमपि वाक्यं नित्यतया उपगमनाध्ययनविधिपरमिति सिद्धम्।

नन्वथातो धर्मजिज्ञासेति वेदाध्ययनानन्तरं धर्मजिज्ञासां प्रतिजानता जैमिनिनाऽध्ययनमेव कर्मविचारप्रयोजकमित्युक्तम्। तद्ब्रह्मविचारस्यापि वेदार्थविचारत्वादध्ययनमात्रप्रयुक्तत्वाद्विहित एव सर्वाधिकारमिदं शास्त्रमिति चेन्न। अधीताद्वेदादुत्तरनित्यक्रतुविधीनामापातप्रतिपत्तेः तत्प्रयुक्ततया धर्मविचारप्रवृत्तिः। तद्वदत्र ब्रह्मज्ञानमवश्यकर्तव्यमकरणे प्रत्यवायहेतुरित्यत्र प्रमाणाभावात्। फलतो वा अध्ययनविधितो वा अप्रवर्तिते ब्रह्मविचारे प्रवर्तकस्य श्रवणविधेः अर्थनिर्णयार्थप्रवृत्तसूत्रे तद्विचारस्य सर्वाधिकारत्वानुपपत्तेः। आनन्तर्याभिधानमुखेन विशिष्टाधिकारिसमर्पणार्थोऽथशब्दः न प्रारम्भार्थः। ब्रह्मज्ञानेच्छाया आरम्भानर्हत्वादर्हयोश्च ब्रह्मतज्ज्ञानयोरनर्थ्यमानत्वाज्जिज्ञासानुपपत्तेः। मङ्गलार्थत्वे चाथशब्दस्य विचारकर्तव्यतारूपवाक्यार्थे कर्तृकरणकर्मादिभावेन समन्वयाभावात्, अथशब्दस्वरूपस्यैव मङ्गलत्वाच्च सुष्ठूक्तं **अथशब्दः आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वात्** इति।

नन्‍ु प्रकृतादर्थादर्थान्तरपरतयाप्यथशब्दः प्रयुज्यमानो दृश्यते। अथैवं मन्यस इत्यादौ। तद्वदत्रापि धर्मजिज्ञासारूपप्रकृतार्थादर्थान्तरपरत्वं किं न स्यादिति चेत्; किमुदा-

जिज्ञासयोः । फलजिज्ञास्यभेदाच्च । अभ्युदयफलं धर्मविज्ञानं तच्चानुष्ठानापेक्षम् । निः श्रेयसफलं तु ब्रह्मविज्ञानं न चानुष्ठानान्तरापेक्षम् । भव्यश्च धर्मो जिज्ञास्यः न ज्ञानकालेऽस्ति । इह तु भूतं ब्रह्म-

---

अभ्युदयः स्वर्गादिलक्षणः सुखविशेषः फलं यस्य धर्मज्ञानस्य तत्तथा। धर्मो हि स्वमीमांसया ज्ञायमानोऽनुष्ठीयमानश्च फलाय कल्पते। अतः स्वविषयानुष्ठानद्वारा धर्मज्ञानं स्वर्गादिफलकमित्यर्थः। ब्रह्ममीमांसाफलस्य ब्रह्मज्ञानस्य ततो वैलक्षण्यमाह-निश्श्रेयसेति। निश्श्रेयसं मोक्षः फलं यस्य तत्तथा। तुशब्दो वैलक्षण्यद्योतनार्थः। ब्रह्ममीमांसा फलं ब्रह्मज्ञानमेकं मुक्त्वा नान्यदनुष्ठानमपेक्षते। ब्रह्मवेद ब्रह्मैव भवति। तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्। तरति शोकमात्मवित्। इत्यादि श्रुतिशतेभ्यः ज्ञानसमकाले मुक्त्यवगमात्। अतो महद्वैलक्षण्यं धर्ममीमांसाफलात् ब्रह्ममीमांसाफलस्य ब्रह्मज्ञानस्य। अतः परस्परविलक्षणफलयोः कर्मब्रह्मजिज्ञासयोः एकपुरुषानुष्ठेयत्वनियमः नास्तीति भावः। फलवैलक्षण्यमुक्त्वा जिज्ञास्यवैलक्षण्यमाह—भव्यश्चेति। साध्यः इत्यर्थः। चशब्दः धर्मब्रह्मणोः वेदार्थत्वाविशेषेऽपि धर्मस्य ब्रह्मणो वैलक्षण्यद्योतनार्थः। फलवैलक्षण्यसमुच्चयार्थो वा। वैलक्षण्यमेव विशदयति–नेति। तत्र हेतुमाह–पुरुषेति।

---

सीनतया पूर्वप्रकृतादर्थान्तरपरत्वं अथशब्दस्योच्यते, उत हेतुफलभावेन पूर्वप्रकृतादर्थान्तरपरत्वम्। नाद्य; तादृशादर्थान्तरत्वस्य नित्यसिद्धत्वेन तत्परत्वेऽथशब्दस्यानुवादादृष्टार्थतयोः प्रसङ्गात्। न द्वितीयः। आनन्तर्येऽभिहिते तदप्यर्थात् सिध्यतीति तदभिधानं व्यर्थम्। ननु वैपरीत्यं किं न स्यादिति चेत्; न, हेतुफलभावेन पूर्वपूर्वप्रकृतत्वस्य आनन्तर्यसिध्यधीनत्वात्। तथाहि—प्रक्रियमाणस्यार्थस्य पूर्वप्रकृतं हेतुः तदा स्यात् यदि तदानन्तर्यं प्रक्रियमाणस्य सिध्येत्।

नन्वहेतुफलयोरप्यानन्तर्यदर्शनात्तन्मात्रात् पूर्वप्रकृतस्य कथं हेतुत्वसिद्धिः? नैष दोषः। यस्मिन्सत्यनन्तरक्षण एव यदवश्यं भवति तदेव तस्य मुख्यमानन्तर्यं अथशब्देन द्योत्यते। अन्यत्तु गौणम्। अतो मुख्यानन्तर्येऽभिहिते तदर्थात्सिध्यतीति सुष्ठूक्तम्।

ननु सति चानन्तर्यार्थत्वे ब्रह्मजिज्ञासा यन्नियमेन पूर्वनिर्वृत्तमपेक्षते तत्किं अध्ययनं, उत धर्मजिज्ञासा?। नाद्यः। स्वाध्यायाध्ययनस्य धर्मब्रह्मजिज्ञासयोः साधारणत्वेन ब्रह्मजिज्ञासां

प्रति मुख्यानन्तर्यप्रतियोगित्वाभावेन च तदानन्तर्यस्येहावक्तव्यत्वात् । न द्वितीयः । किं धर्मो जिज्ञास्यते एभिरिति सहस्राधिकरणीन्यायो धर्मजिज्ञासेत्युच्यते । किं वा जिज्ञासनं जिज्ञासेति धर्मनिर्णयः । अथवा जिज्ञास्यन्त इति व्युत्पत्या कर्माणि ? नाद्यः । तत्रापि किं प्रथमपादावलम्बिनां वेदप्रामाण्यसाधनोपयोगिनां उपसङ्ग्रहः, उतेतरेषाम् ? नाद्यः । तेषां धर्मब्रह्मजिज्ञासयोः साधारणत्वेन पुष्कलकारणत्वाभावेन चाथशब्देन तदानन्तर्यसमर्पणस्य अयुक्तत्वात् । न द्वितीयः । तेषां विधिचातूरूप्योपयोगिनामिह सिद्धब्रह्मजिज्ञासायामनुपयोगात् । नन्विहापि गुणोपसंहारे धर्मनिर्णयार्थन्यायापेक्षा दृश्यत इति चेत् । सत्यम् । उपासनायां तदपेक्षा, न ब्रह्मज्ञाने । सा च मानसी क्रिया धर्मविशेष एवेति न तदर्थोऽप्यथशब्दः । न द्वितीयः । स किं ब्रह्मविचारप्रवृत्तिहेतुः । उत ब्रह्मनिर्णये । नाद्यः । अन्यज्ञानस्याऽन्यत्र प्रवृत्तिहेतुत्वाभावात् । न द्वितीयः । अन्यज्ञानमन्यज्ञानहेतुः अविनाभावादिसंबन्धे सति स्यात् । न चेह ब्रह्मकर्मणोरविनाभावादिसम्बन्धोऽस्ति । तस्मात् कर्मणां ब्रह्मजिज्ञासोपयोगात् तदानन्तर्यं अथशब्देनोच्यत इति तृतीयः पक्षः परिशिष्यते । सोऽपि न संभवति । यथा कश्चित्प्रासादमारुरुक्षुः सोपानपरंपरया तमारोहति, तद्वत् सन्ध्योपासनमारभ्य सहस्रसंवत्सरक्रतुपर्यन्तं पूर्वपूर्वकर्मपरित्यागेनोत्तरोत्तरस्वीकारात् सहस्रसंवत्सरे निरतिशये कर्मण्यनुष्ठिते ततः परं अनुष्ठेयाभावात् ब्रह्मजिज्ञासायामवतरति । अथवा पुरुषस्य स्वतो विषयेप्सुत्वात् भोगाभावे विषयस्पृहाया निवृत्यसंभवात् क्षुद्रकर्मफलमारभ्य सहस्रसंवत्सरफलपर्यन्तेषु ततः परं कामयितव्याभावात् विषयस्पृहा दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति । ततो ब्रह्मज्ञानेऽवतरति । अथवा कर्मणां पुरुषसंस्कारत्वाच्चत्वारिंशत्संस्कारैः यदा सर्वात्मना संस्कृतो भवति तदा शुद्धान्तःकरणो ब्रह्मजिज्ञासायामवतरतीति ।

अत्रोच्यते । न तावदाद्यः पक्षः संभवति । सोपानपरंपरायां पूर्वपूर्वप्राप्तिं विनोत्तरोत्तरप्राप्त्यसम्भवात् क्रमेण प्राप्तिरस्तु । इह तु पूर्वकर्माननुष्ठाने उत्तरकर्मानुष्ठानासम्भव इत्यत्र प्रमाणाभावान्नानुष्ठानपरंपरया ब्रह्मजिज्ञासायामवतारः । शतायुषां मनुष्याणां सहस्रसंवत्सरक्रत्वनुष्ठानासम्भवेन ब्रह्मविचारस्य मनुष्याधिकारत्वानुपपत्तेश्च । नापि द्वितीयः । विषयस्य क्षयितालक्षणदोषदर्शनाभावेऽपि उपभोगमात्रात्कामक्षयानुपपत्तेः । न चेच्छायाः स्वविषयसिद्धिनिवर्त्यत्वात् तदुपपत्तिः । सिद्धस्यापि हैरण्यगर्भादिसुखस्यानित्यत्वेन तज्जातीये पुनरिच्छासम्भवात् कर्मफलोपभोगानन्तर्यार्थत्वेऽथशब्दस्य हैरण्यगर्भादिपदस्थस्यैव ब्रह्मविचाराधिकारः स्यात् । न मनुष्यस्य । नापि तृतीयः । स्वतन्त्रफलार्थानां संस्कारकर्मत्वे प्रमाणाभावात् । न च तदसिद्धिः । सर्वे एते पुण्यलोका भवन्तीति श्रुतिसिद्धत्वात् । न च "यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति" इति वाक्यात् संस्कारत्व-

जिज्ञास्यं नित्यानिर्वृत्तत्वान्न पुरुषव्यापारतन्त्रम्। चोदनाप्रवृत्तिभेदाच्च। याहि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्। अवबोधस्य चोदनाजन्यत्वान्न

---

पूर्वमीमांसाविषयवैलक्षण्यं उत्तरमीमांसाविषयस्याह—इह त्विति। तुशब्दोऽत्यन्तवैलक्षण्यद्योतनार्थं, भूतं सिद्धमसाध्यं इति यावत्। तत्र हेतुमाह—नित्येति। फलैकत्वे विषयैकत्वे च शास्त्रैकत्वं युक्तम्। 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति न्यायात्। इह तु फलभेदाद्विषयभेदाच्च शास्त्रभेदः इति भावः। ननु द्वयोः धर्मब्रह्मणोः वेदैकप्रमाणत्वात् मीमांसयोश्च वेदैकप्रमाणानुग्राहकत्वाच्छास्त्रैकत्वमित्याशङ्क्य वेदैकप्रमाणत्वेऽपि तत्तद्बोधकवाक्यप्रवृत्तिभेदाच्च शास्त्रभेद इत्याह-चोदनेति। प्रवृत्तिभेदमेव व्याचष्टे—या हीति। चोदना प्रेरणा धर्मस्य लक्षणं प्रमाणम्। सा स्वविषये यागे पुरुषं प्रेरयन्त्येव बोधयति। तदुक्तम्।

" लिङ्गोऽभिधा सैव हि शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते॥" इति।

---

सिद्धिः। तथा हि। चत्वारिंशत्संस्काराः गर्भाधानपुंसवनसीमन्तविष्णुबलिजातकर्मनामकरणोपनिष्क्रमणान्नप्राशनचौलोपनयनानि दश, चत्वारि वेदव्रतानि पञ्चमहायज्ञाः सप्तपाकयज्ञसंस्थाः सप्तसोमसंस्थाश्च अष्टावात्मगुणाः दया सर्वभुतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलं अकार्पण्यं अस्पृहा च एतैर्युक्तो ब्रह्मसायुज्यं सालोक्यं गच्छतीति स्मृत्या संस्कारत्वसिद्धिः इति वाच्यम्। पुण्यलोका भवन्तीति श्रुतिविरोधे तस्याप्रमाणत्वात्। अन्यार्थद्रव्यसंस्कारत्वे नित्यकर्मणां व्रीहिप्रोक्षणादिवत् गुणकर्मतापत्त्या ब्रह्मज्ञानकारणत्वानुपपत्तिश्च। तद्वदेवाधिकृताधिकारत्वप्रसङ्गात्, ब्रह्मज्ञानाधिकारिण एव कर्मानुष्ठानापत्तिश्च।

नन्वेतद्दोषभयादेव संस्कारत्वं परित्यज्य विविदिषन्ति यज्ञेनेति वाक्यात् ज्ञानार्थतया यज्ञादिविधानम्। तथा हि—तमेतमात्मानं विविदिषन्ति यज्ञेनेत्यत्राख्यातात् भावना प्रतीयते। तस्याश्च भाव्याकाङ्क्षायामिष्यमाणज्ञानमपरोक्षानुभवरूपं भाव्यत्वेन संबध्यते, न शाब्दम्, शाब्दज्ञानात्पूर्वं तदुपस्थित्यभावेन तदुद्देशेन यज्ञादिविधानानुपपत्तेः। तस्मिंस्तु संजाते पश्चादिष्यमाणं ज्ञानमपरोक्षमेवेति तदुद्देशेन यज्ञादिविधानं; यज्ञादिकं च तृतीयानिर्देशाद्भावनाकरणत्वेन

अस्यार्थः। लिङ्गः अभिधावाचकता। सैव शब्दभावनेति तत्संप्रदायविदो वदन्ति। तस्याः शब्दभावनयाः भाव्या फलरूपा पुरुषप्रवृत्तिः यागविषयियिणी। तदीयं तस्याः प्रवृतेः सम्बन्धि करणं किमित्यकाङ्क्षायामह–संबन्धबोध इति। प्रवृत्तिलिङ्गोः प्रवर्त्यप्रवर्तक-भावसम्बन्धबोध इत्याहुः। स्वर्गयागयोः फलफलिभावसंबन्धबोध इति केचित्। केनोपकृत्येत्याकांक्षायामाह–प्ररोचनेति। तथा च प्रशंसयोपकृत्य सबन्धबोधेन करणेन स्वर्गफलकयागविषयकप्रवृत्तिं भावयेदिति वाक्यार्थः इति। तदेतदाह—नेति। स्वमतमाह—ब्रह्मेति। ब्रह्मात्मावबोधकं तत्वमसीत्यादिवाक्यमित्यर्थः। तुशब्दो लिङ्गिसंबन्धरहितत्वरूपविशेषद्योतनार्थः। अयोगव्यवच्छेदार्थ एवकारः। यतो वाचो

---

अन्वितं भावनास्वरूपकरणत्वानुपपत्तेस्तत्तत्फलज्ञानं प्रति करणत्वेन संबध्यते। तथा चात्मानु-भवकामो यज्ञादीन्यनुतिष्ठेदिति विधिः परिणम्यत इति चेत्; न, स्वतन्त्रफलार्थत्वेन तत्र तत्र विहितानां ज्ञानार्थतया विधानानुपपत्तेः कुण्डपायिनामयनगताग्निहोत्रवत् कर्मान्तरमेव ज्ञानार्थतया विधीयत इति वक्तव्यम्। तथा च तदेव कर्मान्तरं ज्ञानद्वारा मोक्षहेतुरपि किं न स्यात्। 'न कर्मणा न प्रजया' इत्यादिनिषेधस्य प्रसिद्धकर्मविषयत्वात्। न च तत्र प्रमाणाभावः। अश्वेन जिगमिषतीत्यत्र इष्यमाणगमनद्वारा अश्वस्य ग्रामप्राप्तिसाधनत्ववत् कर्मणामपि ज्ञानसाध्यमोक्ष-साधनत्वम्। न्यायसहकृतविविदिषावाक्यप्रमेयत्वात् प्रमाणमात्रसाध्यस्य ज्ञानस्य कर्माभावे अभाव इति केवलव्यतिरेकाभावेन च कर्मणां तत्साध्यमोक्षसाधनत्वम्। किं च कर्मणां विविदिषासाधनत्वे द्वाराभावः। न च चित्तशुद्धिःद्वारं, संस्कारपक्षेऽपि तस्यैव द्वारत्वात् संस्कारविविदिषापक्षयोर्भेदाभावप्रसङ्गश्चेति।

अत्रोच्यते। न तावत्संस्कारत्वे प्रमाणाभावः। संस्कारो हि द्विविधः। मलाप-कर्षणो गुणाधानलक्षणश्च। तत्राद्ये प्रमाणं "धर्मेण पापमपनुदति" "योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये।" इत्यादिकम्। गुणाधानलक्षणे तु "विविदिषन्ति यज्ञेन दानेन तपसा" इत्यादि। अत्र हि विविदिषाजनकस्वरूपातिशय उच्यते। न मलापकर्षः। तद्वाचक-पदाभावात्। अत एव—

'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः'

इत्युपक्रम्य

'सिद्धं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे'

इति चोक्त्वा

पुरुषोऽवबोधे नियुज्यते यथा अक्षार्थसन्निकर्षेणार्थावबोधे तद्वत् । तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति ।

---

**निवर्तन्त' इत्यादिश्रुत्या ब्रह्मणो वागाद्यगोचरत्वाद्वाक्यस्याबोधकत्वशङ्काव्युदासेन लक्षणया बोधयत्येवेत्यर्थः।** केवलमिति। **न प्रेरयतीत्यर्थः। अथ वा केवलमिति विषयविशेषणम्। निर्विशेषं ब्रह्म बोधयत्येवेत्यर्थः। ननु ब्रह्मणि नियोगाभावेऽपि बोधे नियोगोऽस्त्वित्यत आह-** अवबोधस्येति। **उपसंहरति-**न पुरुष इति। **दृष्टान्तमाह-**यथेति। **उक्तमर्थमुपसंहरति-**तस्मादिति। **यस्माद्वेदाध्ययनादेः ब्रह्मजिज्ञासां प्रति पुष्कलकारणत्वं न सम्भवति तस्मात्तदन्यत्**

---

"बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥
ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम् "

इति शुद्धिद्वारा ज्ञानहेतुत्वं यज्ञादीनां दर्शयति । न च गुणकर्मतापत्तिः । विहितक्रियाङ्ग-भूतद्रव्यसंस्कारस्यैव गुणकर्मत्वात् ज्ञानस्य चाविहितत्वात् । न च विहितक्रियाङ्गत्वाभावे संस्कारत्वमपि न स्यादिति वाच्यम् । अविहितभोजनाङ्गदधिसंस्कारेऽपि संस्कारत्वप्रसिद्धेः । न चाधिकृताधिकारत्वप्रसङ्गः । इष्टापत्तेः । अत एव तदानन्तर्यप्रतिपादनार्थोऽथशब्दः इत्युच्यते । न च स्वस्ववाक्ये फलान्तरकरणतया श्रुतानामङ्गत्वानुपपत्तिः इति शङ्कयम् । तादृशानामपि बृहस्पतिसवसौत्रामण्यादीनां वाजपेयाग्निचयनाङ्गत्वदर्शनात् ।

वस्तुतस्त्वन्यार्थद्रव्यसंस्कारत्वेऽपि नाङ्गत्वम् आधानवत् अनङ्गत्वोपपत्तेः । नन्वाधान-संस्कृतस्याग्नेः उत्तरक्रतुविधिषूद्देश्यत्वात्तत्र तथास्त्विति चेत् । न । प्रकृतेऽपि नित्यकर्म-संस्कृतस्य आत्मनः उद्दिश्यमानत्वात्तदनुवादेन श्रवणाद्यन्तरङ्गज्ञानसाधनविधानोपपत्तेः । ननु तथाप्येकस्य कर्मणः फलद्वयसाधनत्वं कथमिति चेन्न । कर्मानुष्ठाने श्रवणादिसहकारिसंपत्तौ ज्ञानोपयोगित्वम् । अन्यथा स्वस्ववाक्योक्तफलसाधनत्वमित्यविरोधात् । ननु यस्यैते चत्वा-रिंशत्संस्कारा इत्यत्र ब्रह्मणः सायुज्यं सालोक्यं गच्छतीति सालोक्यलिङ्गाद्धिरण्यगर्भावाप्तिः फलमवगम्यते, न तत्वज्ञानद्वारा ब्रह्मावाप्तिरिति चेन्न; संस्कारशब्दश्रवणात् अन्याङ्गत्वेऽवगते सर्वकर्मणां संस्कारत्वावगमात्परिशेषाज्ज्ञानमेव तस्य साध्यं अवगम्यते । सालोक्यलिङ्गं तु श्रवणादिपौष्कल्याभावे हैरण्यगर्भप्राप्तिरुपपद्यते । तत्सत्वे तु सायुज्यप्राप्तिरिति न विरोधः ।

यद्वा विविदिषावाक्येन ज्ञानोद्देशेन कर्माणि विधीयन्ते। न च फलान्तरसाधनतयाऽवगतानां फलान्तरसाधनतया विधानानुपपत्तिः। खादिरो यूपो भवति। खादिरं वीर्यकामस्येत्यादाविव विधिद्वयरूपसंयोगभेदेनोभयार्थत्वोपपत्तेः। न च प्रकरणान्तरत्वादग्निहोत्रवत्कर्मान्तरत्वम्, कुण्डपायिनां अयने हि न प्रसिद्धाग्निहोत्रमग्निहोत्रमिति नाम्नाऽनूद्य मासगुणो विधीयते। अग्निहोत्रनाम्नो अलौकिकाभिधानत्वेन आख्यातपारतन्त्र्यात् स्वातन्त्र्येण व्यवहितपरामर्शित्वानुपपत्तेः। नाप्याख्यातेन, जुहोतीत्यस्य होमसामान्याभिधायिनः सन्निहितकारकविशिष्टहोमाभिधायित्वेन अव्यवहितपरामर्शित्वानुपपत्तेः। तस्मादनन्यगत्या कर्मान्तरविधिः इत्यङ्गीकृतम्। नैवमत्र, यज्ञदानतपोऽनाशकशब्दानां लौकिकाभिधानत्वेन व्यवहितपरामर्शित्वसंभवात्। अत एव "नान्यः पन्था विद्यत" इत्यादिप्रतिषेधान्न तस्य मोक्षसाधनत्वम्। किं तु ज्ञानमात्रसाधनत्वम्। न चाश्वदृष्टान्तात् तत्रापि साधनत्वम्। मूलप्रमाणाभावेऽपि न्यायमात्रात्तत्कल्पने अश्वस्य पुनरावृत्तिसाधनत्वमपि क्वचिद्दृष्टमिति कर्मणां पुनरावृत्तिसाधनत्वमपि प्रसज्येतेति मुक्तस्यापि संसारप्रसङ्गः। न च यज्ञादीनां ज्ञाने केवलव्यतिरेकाभावः। श्रुतिगम्येऽर्थे अन्वयव्यतिरेकयोः अनपेक्षितत्वात्। न च द्वाराभावः। पापनिवृत्तेरेव द्वारत्वात्। न च संस्कारविविदिषापक्षयोः भेदाभावः। संस्कारो हि श्रवणादिपौष्कल्ये सति ज्ञानं साधयति। ज्ञानार्थतया विधाने हि नैय्योगिकफलस्याऽवश्यंभावितया श्रवणादिकं संपाद्यापि ज्ञानं साधयतीत्यस्ति महान्भेदः इति। तथा च संस्कारत्वेन वा विविदिषावाक्यसामर्थ्यान्मोक्षहेतुत्वेन वा कर्मानुष्ठानस्यावश्यापेक्षितत्वात्तदानन्तर्यार्थोऽथशब्द इति चेत्।

स्यादेवं यदि संस्कारपक्षे वा विविदिषापक्षे वा समानजन्मानुष्ठितमेव कर्मोपकरोतीति किञ्चित्प्रमाणं स्यात्। न च तदस्ति। एवं च जन्मान्तरानुष्ठितकर्मभिराहितप्रत्यक्प्रावण्यादेरात्मन्यपरोक्षतया ज्ञानाद्ब्रह्मविचारप्रवृत्तिसिद्धेः न तथाऽऽनन्तर्यार्थोऽथशब्दः।

ननु 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति श्रुत्या, ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।' इति स्मृत्या चैतज्जन्मनि ब्रह्मचर्ययज्ञप्रजाः संपादनीयाः एकतज्जन्मसंबन्धित्वात् ऋणसंबन्धस्य। तथा च तदानन्तर्यार्थः अथशब्द इति चेत्; न, यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इति ब्रह्मचारिणः प्रव्रज्याविधायकश्रुतिविरोधे ऋणानि त्रीणीत्यस्य अपस्मृतित्वात्। न च तन्मूलभूता श्रुतिरप्यस्तीति वाच्यम्। तस्या दुर्निरूपार्थत्वेन हृदयाद्यवदानस्तुतिमात्रत्वात्। ब्रह्मचर्यात् सन्न्यासविधिश्रुतिविरोधे वर्तमानापदेशश्रुतेरन्यपरत्वाच्च। न च दुर्निरूपार्थत्वमसिद्धम्। किं

उच्यते। नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमादि-साधनसम्पत, मुमुक्षुत्वं चेति। तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया

---

**पुष्कलकारणं किमपि वक्तव्यमित्यर्थः। तत्किमित्याकाङ्क्षायामाह**—उच्यत इति। **अन्वयव्यतिरेकाभ्यां विवेकादिचतुष्टयस्य पुष्कलकारणत्वमुपपादयति**—तेषु हीति। **धर्मजिज्ञासां विनैव ब्रह्म जिज्ञासयितुं साक्षात्कर्तुं च शक्यम्। तैर्विना तु न शक्यत इत्यर्थः। अथशब्दस्याऽऽनन्तर्यार्थकत्वविवक्षायां स्वाभिमतसिद्धिरिति मत्वोपसंहरति**

---

जायमानो ब्राह्मण ऋषिदेवपितृभ्यः ऋणवान्भवति। कुत इत्यपेक्षायां–त्रिभिरिति। के ते त्रय इत्यपेक्षायां ब्रह्मचर्येणेत्यादि। तथा च जायमानस्य ब्राह्मणस्य ब्रह्मचर्यादिसम्बन्धाद्देवादिभ्य ऋणवत्त्वमित्यर्थः, उत तद्विधिसम्बन्धात्? नाद्यः, जायमानस्य ब्राह्मणस्य ब्रह्मचर्ययज्ञप्रजासम्बन्धस्य योग्यानुपलब्धिपराहतत्वात्। न च गृहस्थो जायमान इति कल्प्यते। तथा कल्पनायां प्रमाणाभावात। गार्हस्थ्यप्राप्तयवस्थायां तेषां योग्यानुपलब्धिपराहतत्वाच्च। न द्वितीयः। जायमानस्य विधिप्रतिपत्तिसामर्थ्याभावेन तत्संबन्धानुपपत्तेः। न च जननादारभ्य ब्रह्मचर्ययज्ञ-प्रजानिर्वृत्तिपर्यन्तं तद्विरोधिसन्न्यासविधिसंबन्धाभावः प्रतिपाद्यते। तत्रापि ब्रह्मचर्यादेव प्रव्रजे-दिति श्रुतिविरोधात्। देवादिभ्यः दत्तस्यार्थस्य सद्भावे प्रमाणाभावाच्च। अस्य च सन्दिग्ध-त्वादर्थवादरूपा श्रुतिः कथञ्चिल्लक्षणयाऽध्याहारेण स्तावकतां प्रतिपद्यत इति **युक्तमुत्पश्यामः**।

ननु 'ब्रह्मचर्यं समाप्य गृही भवेत्। गृही भूत्वा वनी भवेत। वनी भूत्वा प्रव्रजेत्' इति क्रमवचने जाग्रति कथं ब्रह्मचर्यादेव प्रव्रजेदिति विधिः। अतः कर्मानधिकृतान्धपङ्ग्वादि-विषयः सः। एवं च "वीरहा वा" इत्यादिकर्मत्यागनिन्दावचनमुपपद्यते इति चेत; न, ब्रह्मचर्याद्गृहाद्वा वनाद्वा प्रव्रजेदित्यविशेषश्रवणात्क्रमविधेः अविरक्तविषयत्वात। अन्धादी-नामपि अविरक्तत्वे तन्मात्रस्यैव प्रयोजकत्वात्। त्यागनिन्दाश्रुतेरप्यविरक्तविषयत्वात्। अथ पुनरेव व्रती वा अव्रती वा स्नातको वा अस्नातको वा इत्यादिना कर्मानधिकारिणामाश्रमिभ्यः पृथगेव सन्न्यासविधानाच्चाधिकृतविषयमेव ब्रह्मचर्यादेव प्रव्रजेदिति वचनम्।

किञ्च अन्धपङ्ग्वादीनां सन्न्यासेऽपि नाधिकारः। ज्ञानाङ्गतया शरीरेन्द्रियादि-पाटवस्य शरीरं मे विचर्षणं इत्यादिना प्रार्थ्यमानत्वात। दृष्टिपूतं न्यसेत् पादमित्यादिस्मृतेश्च। सन्न्यासात् ब्रह्मणः स्थानमित्येतदानुषङ्गिकफलाभिप्रायम्। ननु कर्मणां तत्त्यागस्य च

ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये। तस्मादथशब्देन यथोक्तसाधनसंपत्त्यानन्तर्यमुपदिश्यते।

---

—तस्मादिति। नन्वथशब्देन ब्रह्मजिज्ञासाया आनन्तर्यार्थकत्वे अन्वयव्यतिरेकाभ्यां पूर्वप्रकृतं विवेकादिचतुष्टयं अधिकारिविशेषणमिति भाषितं भाष्यकारैः। तन्न संभवति। तथाहि-आदौ नित्यानित्यवस्तुविवेको न सम्भवति। यत्कृतकं तदनित्यं इति

---

कथं ज्ञाने उपयोगः विरोधादिति चेत्। न। कर्मतत्त्यागयोः प्रतिबन्धफलककल्मषनिवृत्तिद्वारोपयोगः। कल्मषञ्च द्विविधम्। किञ्चिच्छ्रवणप्रतिबन्धकम्। किञ्चिज्ज्ञानप्रतिबन्धकम्। तत्र श्रवणप्रतिबन्धकस्य कर्मभिः निवृत्तिः। ज्ञानप्रतिबन्धकस्य तत्त्यागेनेति फलभेदात् कालभेदाच्च न विरोधः।

ननु तथाऽपि न सर्वकर्मपरित्यागः सम्भवति। 'अयज्ञोपवीती कथं ब्राह्मणस्स्यात्' इत्यादिवाक्याच्छिखायज्ञोपवीतादित्यागस्यायुक्तत्वात्। 'काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः' इति श्रीगीतावाक्यात्काम्यकर्मत्यागस्यैव ज्ञानाङ्गतावगमाच्च। यदि वा प्रव्रजेदिति अविशेषश्रुत्या सर्वत्यागः तथाऽपि कौपीनकन्थादिवद्यज्ञोपवीतादेः पुनरुपादानं किं न स्यात्। न चाग्निहोत्रादेरप्युपादानप्रसङ्गः। तस्य दारसङ्ग्रहाधीनत्वात्। परिव्राजश्च दारसङ्ग्रहस्य निषिद्धत्वादिति चेत; न, उत्तरवाक्ये एतदेवास्य तद्यज्ञोपवीतं य आत्मेति बाह्ययज्ञोपवीतं व्यावर्त्यात्मन एव यज्ञोपवीतत्वप्रतिपादनात् श्रीगीतावचनस्य च मुमुक्षोः ज्ञानार्थकर्मानुष्ठानकालेऽपि काम्यानां वर्जनीयत्वप्रतिपादनपरत्वात्। अत एव मैत्रायणीयश्रुतिः आश्रमधर्मसमये यज्ञोपवीताद्यभावं दर्शयति "परिव्राडेकशाटीपरिहितो मुण्डोदरपाणिरण्यनित्यो भिक्षार्थी ग्रामं प्रविशेदासायं प्रदक्षिणेनाऽविचिकित्सन्सार्ववर्णिकं भैक्षचरणं अभिशस्तपतितवर्जं अयज्ञोपवीती शौचनिष्ठः काममेकं वैणवदण्डमाददीत" इति। तथा बौधायनस्मृतिरपि—अत ऊर्ध्वं यज्ञोपवीतमासनं शिखा यष्टयः शिक्यं जलपवित्रं कमण्डलुमित्येतानि वर्जयित्वाऽथ दण्डमादत्ते सखा मा गोपायेति पारमहंस्यप्राप्तयनन्तरं एतेषां वर्जनीयत्वं दर्शयति।

नन्वानन्तर्याभिधानमुखेन धर्मब्रह्मजिज्ञासयोः क्रमप्रतिपत्त्यर्थोऽथशब्दः किन्न स्यादिति चेत्; न, शेषशेषिणोर्वा शेषाणां वा एकापूर्वप्रयुक्तानां अधिकृताधिकाराणां गोदोहनादीनां वैकपुरुषेणानुष्ठेयत्वप्रसक्तौ क्रमापेक्षायां ब्रूयादपि क्रममथशब्दः। यथा "हृदयस्याग्रेऽवद्यत्यथ

व्याप्तेः ध्वंसे व्यभिचारदर्शनात्। यदकृतकं तत् नित्यमिति व्याप्तेः प्रागभावे व्यभिचारदर्शनात्। भावत्वेन सङ्कोचे मानाभावात्। तथात्वे वा मायायां व्यभिचारदर्शनात्। अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति। अपाम सोमममृता अमूमेत्यादिश्रुतिभ्यो

---

जिह्वायाः अथ वक्षस" इति। न तथात्र धर्मब्रह्मजिज्ञासयोः एकपुरुषानुष्ठेयत्वे प्रमाणं अस्ति। शेषशेषित्वे अधिकृताधिकारत्वे वा प्रमाणाभावात्।

ननु षण्णां आग्नेयादीनां परस्परशेषशेषित्वाभावेऽपि एकफलसाधनत्वात् यथा क्रमः तद्वत्क्रमः किन्न स्यादिति चेत्; न, धर्मब्रह्मजिज्ञासयोः एकफलत्वाभावात्।

नु ज्ञानकर्मणोः मोक्षे समुच्चित्य साधनत्वात्तज्जिज्ञासयोरपि एकफलत्वमिति चेत्; न, ज्ञानकर्मसमुच्चये प्रमाणाभावात्। किं विविदिषावाक्यं प्रमाणम्, उत विद्यां च अविद्यां चेति, किं वा तेनैति ब्रह्मवित्पुण्यकृच्चेति वाक्यम्? अथवा तान्याचरथ नियतं सत्यकामाः इति, किं वा सत्येन लभ्यस्तपसा ह्येष आत्मेति? न तावदाद्यः पक्ष; संभवति। विविदिषावाक्यान्न्यायसहितात् कर्मणामिष्यमाणज्ञानार्थत्वमेव गम्यते, न मोक्षहेतुत्वमित्युक्तत्वात्। न द्वितीयः। अविद्यया मृत्युं पापं तीर्त्वा विद्ययाऽमृतं मोक्षमश्नुत इत्युत्तरार्धे फलभेदावगमात्। न तृतीयः। तत्र ब्रह्मविच्छब्दोक्ताहंग्रहोपासकानां पुण्यकृच्छब्दोक्तप्रतीकोपासकानां चार्चिरादिमार्गसम्बन्धमात्रमुच्यते, न मोक्षहेतुत्वं कर्मणाम्। नापि चतुर्थः। सत्यकामाः इत्यत्र सत्यशब्देन न ब्रह्मोच्यते। किन्तु सत्यलोकः एष वः पुण्यः सुकृतो ब्रह्मलोकः इति वाक्यशेषात्। तथा च ब्रह्मलोकप्राप्तिकामाः तानि कर्माणि नियतं नियमेनाचरथेत्यर्थः। "प्लवाः ह्येते अदृढा यज्ञरूपा नास्त्यकृतः कृतेन" इति कर्मनिन्दया तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति ज्ञानविधानात्। नापि पञ्चमः। तत्र हि सत्यशब्देन सत्यवचनं यद्यप्युच्यते। तपश्शब्देन न ज्ञानमुच्यते। 'मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तप' इति ध्यानस्यैव सत्यवचनसहितस्य ज्ञानार्थतया विधानात्। तस्मात्समुच्चये प्रमाणाभावात् न कर्मणा न प्रजयेत्यादिनिषेधाच्च न कर्मणां मोक्षः फलम्।

किञ्च कर्मसाध्यमर्थं मोक्षे न पश्यामः। किं ब्रह्मात्मैकत्वं साध्यम्। उताविद्यानिवृत्तिः। आहो भेदांशनिवृत्तिः। उताध्यासस्य, आहो कर्मणाम्, उत स्थूलसूक्ष्मोपाधिद्वयस्य। नाद्यः। तस्य नित्यत्वात्। नापीतरेषां, भिद्यते हृदयग्रन्थिरित्यादिशास्त्रात् ज्ञानैकसाध्यत्वावगमात्। अतो धर्मब्रह्मजिज्ञासयोः एकफलत्वाभावात् न तदानन्तर्यार्थोऽथशब्दः। सति वा समुच्चये ब्रह्मजिज्ञासानन्तर्यं

जन्यभावस्यापि स्वर्गसुखस्य नित्यत्वावगमात् किं नित्यं किमनित्यमिति विवेकालाभात्। अनित्यफलाद्वैराग्यस्यापि दुर्लभत्वात्। यद्यपि रोगादिदुःखफलाद्वैराग्यं भवति। तथाऽपि पुण्यफलादैहिकसुखाच्चातुर्मास्यादिफलादामुष्मिकसुखाद्वैराग्यासम्भवात्।

---

धर्मजिज्ञासायाः किन्न स्यात्। नित्याध्ययनविधिप्रयुक्तत्वात् नित्यधर्मविचारं प्रथमं कृत्वा पश्चात्काम्यं ब्रह्मविचारं अनुतिष्ठतीति चेत। तत्रापि वैपरीत्यं स्यात् काम्यस्याभ्यर्हितत्वात्। अध्ययनविधिर्वा धर्मविचारं प्रयुञ्जानो ब्रह्मविचारं किमिति न प्रयोजयेत्। तथाच तस्यापि नित्यत्वाद्वैपरीत्यं किन्न स्यात्। श्रोतव्य इति ब्रह्मविचारे विध्यन्तरश्रवणान्न प्रयोजयेच्चेत् कर्मविचारे कृत्स्नप्रवर्तकभावेनाध्ययनविधिनैव तस्यापि प्रवृत्तिसंभवे विधिचातूरूप्यकल्पनया प्रवर्तकत्वानुपपत्तेः। ननु ब्रह्मज्ञानस्य काम्यतया तद्विचारस्यापि काम्यत्वात् न नित्याध्ययनविधिप्रयुक्तत्वम्, नित्यानित्यसंयोगविरोधात् इति चेत्तर्हि स काम्यकर्मविचारस्यापि प्रयोजको न स्यात्। ननु ब्रह्मविचारस्य शमाद्यनेकाङ्गापेक्षत्वात् कर्मविचारस्य तदानपेक्षत्वादेकविधिप्रयुक्तत्वे विलक्षणेतिकर्तव्यताप्रयोजकत्वानुपपत्तेः श्रवणे विध्यन्तरमाश्रितमिति चेत्, स्वाध्यायाध्ययनविधिरेव मुण्डककारीर्याद्यध्ययनं शिरोव्रतभूभोजनाद्यङ्गयुक्तं विदधाति। वाक्यान्तराध्ययनं तु तदनपेक्षं विदधाति। तथा कर्मविचारं प्रयुञ्जानः स एव प्रतिवाक्यदृष्टहेतुनया न्यायभेदानाक्षिप्यैव प्रयोजयति। तथा दर्शपूर्णमासविधिः नित्याधिकारो यथाशक्त्यङ्गानुष्ठानं प्रयुङ्क्ते। काम्याधिकारस्तु सर्वाङ्गानुष्ठानम्। तथा स एव विधिरुपांशुयाजे उत्पवनाद्यङ्गं प्रयोजयति आग्नेयादौ तु अवहननादिकमिति सर्वत्र विलक्षणाङ्गप्रयोजकत्वदर्शनात् ब्रह्मविचारमपि प्रयुञ्जानोऽध्ययनविधिः शमादियुक्तं प्रयोजयतीति न कश्चिद्दोषः। तथा च ब्रह्मविचारस्याप्यध्ययनविधिप्रयुक्तत्वे तदानन्तर्यं वा धर्मविचारस्य कुतो न स्यादित्यलमतिप्रसङ्गेन।

ननु धर्ममीमांसायां धर्मस्यैकस्यैव जिज्ञास्यत्वेऽपि प्रत्यध्यायमवान्तरजिज्ञास्यभेदापेक्षया क्रमो दृष्टः। एवं धर्मब्रह्मजिज्ञासयोर्ब्रह्मण एव प्राधान्येन जिज्ञास्यत्वाद्धर्मरूपावान्तरजिज्ञास्यभेदापेक्षया क्रमप्राप्ततत्प्रतिपत्त्यर्थोऽथशब्दः—यथा अथातः शेषलक्षणम्, अथातः क्रत्वर्थपुरुषार्थयोः जिज्ञासेत्येवमादीति चेत्; न, जिज्ञास्ययोर्धर्मब्रह्मणोरत्यन्तविलक्षणत्वात्। पूर्वतन्त्रे हि प्रत्यध्यायं धर्मविशेषाणामेव शेषशेषित्वादीनां जिज्ञास्यत्वात् जिज्ञास्यैक्यनिबन्धनः क्रम उपपद्यते। इह तु सिद्धं ब्रह्म जिज्ञास्यम्। न पुरुषप्रयत्नाधीनम्। भव्यश्च धर्मः, पुरुषप्रयत्नाधीनो जिज्ञास्य इत्यत्यन्तविलक्षणत्वात न जिज्ञास्यैक्यनिबन्धनक्रमप्रतिपादनार्थोऽथशब्दः।

"अप्यब्धिपानान्महतस्सुमेरून्मूलनादपि ।
अपि वाताशनात् साधो विषमश्चित्तनिग्रहः" ॥

न केवलं सिद्धसाध्यत्वमात्रेण जिज्ञास्ययोः भेदः । बोधकप्रमाणव्यापारभेदादपि जिज्ञास्यभेदः । धर्मचोदना हि स्वविषये पुरुषं प्रवर्तयन्ती तदन्यथानुपपत्त्या विषयमप्यवबोधयति । ब्रह्मचोदना तु ब्रह्मावबोधयत्येव केवलं, नावबोधे वा ब्रह्मणि वा पुरुषं प्रवर्तयति । अवबोधस्य प्रमाणवस्तुपरतन्त्रत्वेन पुरुषप्रवृत्त्यसाध्यत्वात् । अन्यथाऽनिच्छतो दुर्गन्धादिज्ञानानुदयप्रसङ्गात् । ब्रह्मणस्तु नित्यत्वेन सुतरां पुरुषप्रवृत्यसाध्यत्वम् । तस्मात्केनाऽपि प्रकारेण कं प्रत्यप्यर्थवत्वाभावादानन्तर्यप्रतियोगिनो दुर्निरूपत्वेन विशिष्टाधिकार्यलाभात् ब्रह्मविचारो न कर्तव्य इति प्राप्ते ; उच्यते—

अस्त्येवाधिकारिविशेषणचतुष्टयमानन्तर्यप्रतियोगि । यस्मिन्सत्यनन्तरं नियमेन ब्रह्मजिज्ञासा भवति । यदभावे न भवति । तथा हि—नित्यानित्यवस्तुविवेकः परिदृश्यमानं सर्वं कार्यत्वात्परिच्छिन्नत्वाच्च कारणाधीनं कार्यत्वादेव । तदपि कारणं यदि कार्यं स्यात्तर्हि तस्याप्यन्यापेक्षायां अनवस्थाप्रसङ्गात्तन्नित्यं इतीदृशो नित्यानित्यवस्तुविवेकः कस्यचिन्नित्यनैमित्तिककर्मभिर्निर्मलीकृतस्वान्तस्य प्रथममुज्जृम्भते । तदन्वनित्यसुखस्य साधनपारतन्त्र्यक्षयितालक्षणदोषदुष्टत्वात्ततो वैराग्यं कुम्भीपाकादिव तीव्रतरमुपजायते । ततो ब्रह्मणो निरतिशयानन्दरूपत्वश्रवणात्तदवष्टम्भेन संसारान्मुमुक्षोपजायते । दृढतरायां च तस्यां शान्तो दान्तः इत्यादिवाक्याच्छमादिसाधनकलापमाश्रित्य श्रोतव्यादिवाक्यादिष्यमाणमोक्षसाधनब्रह्मज्ञानं वेदान्तविचारादेवेत्यवगम्य तत्र प्रवर्तते प्रदीप्तशिरा इव जलराशौ सुस्वादुफलमङ्गुल्यग्रेण स्पृशन्निव अग्रपादस्थाने ।

ननु मुमुक्षाया एवाऽधिकारनिमित्तत्वम् । इतरेषां तु तत्स्वरूपोपयोगमात्रम् । शान्त्यादिकं तु श्रवणाङ्गत्वान्नाधिकारिविशेषणमिति चेत् ; न, शास्त्रीयस्य विचारविधेश्शास्त्रीयमेवाधिकारिविशेषणं वक्तव्यम् । नान्वयव्यतिरेकसिद्धम् । गृहदाहवान् क्षामवत्या यजेतेत्यादौ गृहदाहादेरतथाभूतस्यापि अधिकारिविशेषणत्वात् । नित्यानित्यवस्तुविवेकादेश्च शास्त्रीयत्वं तत्र तत्र विधिप्रकरणे श्रवणात् ।

तथा हि—सोऽन्वेष्टव्य इति विधिप्रकरणे तद्यथेह कर्मचितो लोकः क्षीयत इत्यादिनित्यानित्यवस्तुविवेको दर्शितः । परीक्ष्य लोकान्कर्मचितान्, आत्मनस्तु कामाय सर्वं प्रियं भवतीति श्रवणविधिप्रकरणे इहामुत्रार्थभोगविरागो दर्शितः । शान्तो दान्त इति दर्शनविधिप्रकरणे शमादयो

इति सूक्ष्मदृशो वचनाच्चित्तसमाधानाभावे शमादेरप्यसम्भवात्। किञ्च उपरतिर्नाम विहितानां कर्मणां विधिना परित्याग इति व्याख्यातम्। तदपि न संभवति। नित्यसुखसाधनानां कर्मणां परित्यागायोगात्। तत्रैव श्रद्धासमाधानतितिक्षाणां सम्भवात्। विशिष्टाधिकार्यभावे सति शास्त्रमिदमनारब्धव्यमिति पूर्वपक्षनिषेधे सिद्धान्तव्यवस्थापने

---

दर्शिताः। विजिज्ञासस्वेति विचारविधिप्रकरणे उक्तविशेषणविशिष्टस्य वरुणं पितरं उपससारेति गुरूपसदनं दर्शितम्। वेदान्तेषु सर्वत्र फलश्रुतयः कामनोत्पादमुखेन मुमुक्षोः अधिकारप्रदर्शनार्थाः। अन्यथा साधनानुष्ठानादेव फलसिद्धेः तत्सङ्कीर्तनवैफल्यात्। उदाहृतवाक्येषु यत्र यत्र ज्ञानविधिः प्रतीयते। तत्र तत्र विचारविधिः उन्नेतव्यः। ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन विधेयत्वासम्भवात्। तथा च सर्वशाखाप्रत्ययन्यायेन सर्वतः श्रवणविधेः एकत्वात्तद्विशेषणान्यपि सर्वत्रोपसंहर्तव्यानीति सिद्धं सर्वेषां अधिकारिविशेषणत्वम्।

शान्त्यादेः अङ्गत्वेऽपि "शान्तो दान्त" इत्यधिकारिविशेषणत्वश्रवणात् दीक्षितो जुहोतीत्यादौ दीक्षादेरिवाधिकारिविशेषणत्वं न विरुध्यते।

ननु यद्यपि श्रवणविधिप्रकरणे साधनचतुष्टयं श्रुतं तथापि तस्य ब्रह्मविचारप्रवृत्तसूत्रकारबुद्धिस्थत्वे प्रमाणाभावात् न तदानन्तर्यमथशब्दार्थः। किन्तु वेदार्थविचारत्वसामान्यात् धर्मविचार एव बुद्धिस्थ इति तदानन्तर्यमथशब्दः वक्तीति चेन्न। साधिकारश्रवणविधिं प्रतिपद्य तदपेक्षितन्यायसूचनार्थं प्रवृत्तस्य पूर्वापरप्रतिसन्धानकुशलस्य भगवतः सूत्रकारस्य स्ववाक्य एव सन्निहिततरसाधनकलापाननुसन्धानवाचोऽतिसाहसत्वात्।

ननु तथाऽपि न नित्यानित्यवस्तुविवेकादिभिः नियमेन ब्रह्मविचारे प्रवृत्तिः सम्भवति। तथा हि—यत्तावदुक्तं कृतकत्वात् परिच्छिन्नत्वात् न ब्रह्मव्यतिरिक्तस्य नित्यतेति। तत्तावन्न मृष्यामहे। तादृशयोरपि परमाणुतद्गतपाकजरूपयोः नित्यतया व्यभिचारान्न ब्रह्मव्यतिरिक्तस्य कर्मफलस्यानित्यता ताभ्यां साधयितुं शक्यते, प्रत्युत अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति। अपामसोमममृता अभूम। हिरण्यदा अमृतत्वं भजन्त इत्यादिवाक्यात् कर्मफलानामपि केषांचिन्नित्यतावगमात्ततो वैराग्यानुपपत्तौ नित्यानित्यवस्तुविवेकः न कर्मफलवैराग्यद्वारा नियमेन ब्रह्मविचार प्रवृत्तिहेतुः। न च तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति वाक्यात्कर्मफलस्यैकान्ततो अनित्यत्वसिद्धिः। तस्य सामान्यविषयस्य चातुर्मास्यादिफलव्यतिरिक्तविषयत्वोपपत्तेः।

अतः शब्दो हेत्वर्थः। यस्माद्वेद एवाग्निहोत्रादीनां श्रेयस्साधनानामनित्यफलतां दर्शयति "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इत्यादिः। तथा ब्रह्मज्ञानादपि परं पुरुषार्थं दर्शयति "ब्रह्मविदाप्नोति परं" इत्यादिः। तस्माद्यथोक्तसाधनसंपत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या।

---

च सूत्रकृता प्रयुक्तं हेत्वर्थं अतश्शब्दं अवतारयति—अतश्शब्द इति। तदेव व्याचष्टे-यस्माद्वेद एवेति। कर्मफलस्यानित्यत्वप्रतिपादिकां श्रुतिं पठति—तद्यथेहेति। कर्मणामक्षय्यफलकत्वश्रुतिविरोधात् तत्फलस्यानित्यता कथं इति चेत्। उच्यते। यत्कृतकं तदनित्यं इति न्यायोपबृंहिता श्रुतिः प्रबला सती अक्षय्यफलकत्वश्रुतेः बाधिका। ननु यत्कृतकं तदनित्यं यदकृतकं तन्नित्यमिति व्याप्त्योः ध्वंसप्रागभावयोः व्यभिचारः उक्त इति चेन्न। अधिकरणातिरिक्ताभावसद्भावे प्रमाणाभावात्। कारणात्मना सत एव कार्यस्याभिव्यक्तिमात्रेण कार्यकारणभावाभ्युपगमाद्व्याप्तिसंभव इत्यास्तां विस्तरः। अनादित्वेऽप्यविद्याया भावाभावाभ्यां अनिर्वचनीयत्वेन विद्यानिवर्त्यत्वसम्भवात्। तथा चाविद्या नित्या अनादिभावत्वात् आत्मवदित्यत्र ज्ञानाबाध्यत्वं उपाधिरिति। अनादिभावत्वं नित्यत्वव्याप्यमेव न भवति। तस्मादनुवृत्तिव्यावृत्तिभ्यां आत्मानात्मनोर्नित्यत्वावगमात् कस्यचित् कृतपुण्यपुञ्जस्य अनित्यफलाद्वैराग्यादिसम्भावादुक्तविशेषणविशिष्टाधिकारिणः सुलभत्वात् नोक्तः पूर्वपक्षोऽत्रावतरेदिति पूर्वपक्षप्रतिषेधार्थत्वेनातश्शब्दो व्याख्यातः। सिद्धान्तव्यवस्थाहेतुत्वेनाप्यतः शब्दं व्याचष्टे—तथेति। ब्रह्म वेद ब्रह्मैव भवति। तरति शोकमात्मवित् इत्यादिश्रुतयः आदिपदेन गृह्यन्ते। अतश्शब्दव्याख्यामुपसंहरति—तस्मादिति। यथोक्तसाधनवतेति शेषः। यस्मात्कर्म

---

ननु तथापि ब्रह्मण्यपि चातुर्मास्यादिफल इव विकल्पेन प्रवृत्तिः स्यादिति चेन्न। किं ब्रह्माभेदार्था प्रवृत्तिः। उत तत्सम्बन्धार्था। नाद्यः। विरुद्धयोः तादात्म्यासम्भवात्। न द्वितीयः। तत्र सुखभोगाभावेन दृष्टसुखविमुखतया तत्र प्रवृत्त्यनुपपत्तेः। ननु ब्रह्मानन्दोपभोगो विद्यत इति चेन्न; तस्य स्वाश्रयत्वाभावेन तदुपभोगस्यापुरुषार्थत्वात्। ननु सुखोपभोगमात्रं पुरुषार्थः, न स्वाश्रयसुखोपभोगः। गौरवात्। सुखोपभोगे सति स्वाश्रयत्वाभावा-

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं "जन्माद्यस्य यत" इति। अत एव न ब्रह्मशब्दस्य जात्या-

---

फलस्यानित्यत्वं ज्ञानफलस्य नित्यत्वं च श्रुतिः आह, तस्मादनित्यफलसाधनं कर्म परित्यज्य नित्यफलकज्ञानाय ब्रह्मजिज्ञासा कर्तव्येति तात्पर्यार्थः। तत्तत्कर्तव्यपदाध्याहारस्य क्रियाकाङ्क्षानिवर्तकत्वेनावश्यकतया तत्रापि प्रकृत्यर्थस्य ज्ञानस्य प्रमाणवस्तुपरतन्त्रतया पुरुषकृतिसाध्यत्वाभावात् प्रत्ययार्थस्येच्छायाश्च विषयसौन्दर्यलभ्यत्वेन तथात्वात्। प्रकृतिप्रत्ययाभ्यां ज्ञानेच्छावाचकाभ्यां स्ववाच्यार्थपरिग्रहे कृतिसंबन्धानुपपत्त्या तथाविधपुरुषकृत्यन्वययोग्ये विचारे इच्छाजन्यत्वेनेच्छासंबन्धिनि ज्ञानजनकत्वेन ज्ञानसंबन्धिनि च कल्पितलक्षणया उपस्थापितो विचारः कर्तव्यः इत्यन्वयो बोद्धव्य इति भावः। अथातः पदे व्याख्याय ब्रह्मजिज्ञासापदं व्याचिकीर्षुः भगवान्भाष्यकारो विवक्षितं समासमाह—ब्रह्मणो जिज्ञासेति। ब्रह्मणे जिज्ञासेति तादर्थ्ये चतुर्थी आश्रिता वृत्तिकारैः। तस्मिन्नपि मते जीवब्रह्मभावाय फलाय ब्रह्मजिज्ञासा कर्तव्येत्यन्वयो भवति। ब्रह्मणो विषयत्वं च ब्रह्म वेद ब्रह्मैव भवति। तरति शोकमात्मविदित्यादिश्रुत्याऽवगम्यते। ब्रह्मविषयकज्ञानाद्धि ब्रह्मभावापत्तिः मोक्षफलं श्रूयते। ब्रह्मात्मज्ञानं हि जिज्ञासाफलम्। करणफलयोरेकविषयत्वादर्थाद्ब्रह्मात्मैकत्वस्य विचारविषयस्य लाभ इति यद्यपि, तथाऽपि फलार्थिनः तत्साधनविचारे प्रवर्तमानस्य प्रवृत्त्यङ्गभूतानुबन्धचतुष्टयप्रविष्टस्यैव ज्ञेयतयाऽऽवश्यकत्वात्कर्मणि षष्ठ्येवाऽऽश्रयणीयेति भाष्यकाराभिप्रायो द्रष्टव्यः। ब्रह्मपदार्थमाह—ब्रह्म चेति। चशब्दोऽर्थान्तरशङ्कानिरासार्थः। वक्ष्यमाणलक्षणलक्ष्यं ब्रह्मैवेह जिज्ञास्यं इत्यर्थः। व्यावर्त्यमाह—अत एवेति। यत एवाज्ञातं जगत्कारणं ब्रह्मैव ज्ञातुं इष्टम्।

---

पराधेन पुरुषार्थत्वापराधाभावादिति चेन्न। अन्यदीयसुखसाक्षात्कारस्यानुपपत्तेः। न हि पुरुषान्तरीये सुखे साक्षात्कारो दृष्टः। न चात्मस्वरूपमेव सुखमनुभूयते। तस्य योग्यानुपलब्धिपराहतत्वात्। अतो न दृष्टसुखविमुखतया ब्रह्मविचारे प्रवृत्तिरिति शङ्कानिरासार्थं अतश्शब्दं प्रायुङ्क्त सूत्रकारः। तस्यायमर्थः। यस्मात्तद्यथेह कर्मचित इत्यादिवेद एवाग्निहोत्रादीनां अनित्यफलतां दर्शयति। अतः ततो विरज्य ब्रह्मविचारप्रवृत्तिः उपपद्यत इति।

नन्विदं वाक्यं सामान्यविषयत्वाच्चातुर्मास्यादिव्यतिरिक्तविषयमस्तु। चातुर्मास्यादेश्च स्वस्ववाक्ये नित्यफलत्वश्रवणादिति चेत्; न तावदक्षय्यं ह वा इति वाक्यं फलस्य नित्यतां प्रतिपाद-

द्यर्थान्तरमाशङ्कितव्यम्। ब्रह्मण इति कर्मणि षष्ठी न शेषे। जिज्ञास्यापेक्षत्वाज्जिज्ञासाया: जिज्ञास्यान्तरानिर्देशाच्च। ननु शेषषष्ठी-परिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते सम्बन्धसामान्यस्य विशेषानिष्ठत्वात्। एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कल्पयतो व्यर्थः प्रयासः स्यात्। ननु न व्यर्थः ब्रह्माश्रिताशेष विचारप्रतिज्ञानार्थत्वात् इति चेत्। न प्रधानपरिग्रहे तदपेक्षिता-नामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानं। तस्मिन् प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न

---

अत एवेत्यर्थः। एकशतं षष्ठ्यर्थाः इति षष्ठ्यर्थानां बहुत्वादभिमतं षष्ठ्यर्थमाह—कर्मणीति। अनभिमतं प्रतिषेधति—नेति। तत्र हेतुमाह—जिज्ञास्येति। ब्रह्माश्रित-लक्षणादिविचारप्रतिज्ञानार्थं सम्बन्धसामान्यं विवक्षणीयमित्यत आह—जिज्ञास्यान्तरेति। शेषवादी शङ्कते—नन्विति। परिहरति—एवमपीति। प्रत्यक्षमपीति। कर्तृकर्मणोः कृतीति ब्रह्मणः इति पदस्यात्र प्रत्यक्षेण कृदन्तजिज्ञासापदयोगे श्रितां ब्रह्मणः कर्मत्वावेदिकां षष्ठीं त्यक्त्वा सम्बन्धसामान्यावेदिकां षष्ठीं स्वीकृत्य ब्रह्मणः कःसम्बन्ध इत्याकाङ्क्षायां क्रिया-कर्मभावसंबन्धाश्रयत्वं कल्पयतः तव व्यर्थः प्रयासः स्यादित्यर्थः। शेषवादी वैयर्थ्यं परिहरन् शङ्कते—ननु न व्यर्थ इति। शेषषष्ठीपरिग्रहे यत्प्रयोजनं तव सिध्यति तत्प्रयासं विनापि कर्मणि षष्ठीपरिग्रहेऽपि सिध्यतीति परिहरति—नेति। तत्र हेतुः प्रधानपरिग्रह इति। राज्ञः प्रधानत्वम्, तद्भृत्यादेः तदङ्गत्वं च प्रत्यक्षम्। नैवं ब्रह्मण इत्यत आह —ब्रह्म हीति। तत्र हेतुमाह—ज्ञानेन हीति। तदेवोपपादयति—तस्मिन्निति। तत्र

---

यति किन्तु सुकृतपदवाच्यापूर्वस्य। तस्य च नित्यत्वेऽपि फलस्य नित्यता न सिध्यति। अनुत्पादितफलस्य सुकृतस्यावस्थानवन्नष्टफलस्यापि तस्यावस्थानोपपत्तेः। अपाम सोममममृता अभूमेति सोमपानादनन्तरमेव अमृतत्वप्राप्तिः योग्यानुपलब्धिविरुद्धा। हिरण्यदा अमृतत्वं भजन्त इत्यत्रापि तथा। सुकृतपदेन तत्फललक्षणायां अमृता अभूम, अमृतत्वं भजन्त इत्यनयोः भविष्यत्काललक्षणायां च व्याप्तिसहकृततद्यथेह कर्मचित इति श्रुतिविरोधः। "स य

भवति तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि। यथा "राजासौ गच्छति" इत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत्। श्रुत्यनुगमाच्च। "यतो वा इमानि भूतानि जायन्ते" इत्याद्याः श्रुतयः "तद्विजिज्ञासस्व तद्ब्रह्म" इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति। तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्मात् ब्रह्मण इति कर्मणि षष्ठी।

---

दृष्टान्तमाह—यथा राजेति। कर्मणि षष्ठीपक्षे युक्त्यन्तरं आह—श्रुत्यनुगमाच्चेति। श्रुतिमुदाहरति—यतो वेति। तद्विजिज्ञासस्व। तद्ब्रह्मेति ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयतीत्यर्थः। आदिपदेन सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः इत्यादि गृह्यते। तथा च श्रुतिसूत्रयोः मूलमूलिनोरैकरूप्यं सिध्यतीत्याह—सूत्रेणेति। कर्मणि षष्ठीप्रकरणमुपसंहरति—तस्मादिति। अवान्तरवाक्यार्थज्ञानाभावे महावाक्यार्थज्ञानं न संभवतीति जिज्ञासापदं

---

आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयत" इति श्रुतिरपि कर्मणो नित्यत्वमाह न फलस्य। कल्पनायां च पूर्ववत् प्रमाणान्तरविरोधः। अविरोधे हि कल्पना प्रसरति। नान्यथा।

किञ्च "यदि ह वा अप्यनेविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत" इत्युपक्रम्य "आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयत" इति वचनादात्मोपासनकर्मण एवापरोक्षानुभवद्वारेणाविद्यानिवृत्तिफलत्वात्तत्प्रशंसार्थमिदं वचनम्। न च सुखानुभवाभावादपुरुषार्थत्वम्। ब्रह्मानन्दानुभवभावात्। ननु तादात्म्ये सति सः स्यात, स एव न सम्भवति, विरुद्धयोः तादात्म्यासम्भवादिति चेत्; न, विरुद्धयोः तादात्म्यं न सम्भवतीत्यनुमानस्य 'ब्रह्म वेद ब्रह्मैव भवति' इत्यागमविरोधे अप्रमाणत्वात्।

ननु स्वरूपसुखानुभवो न पुरुषार्थः। अहं सुखीति स्वाश्रयसुखानुभवस्यैव पुरुषार्थत्वदर्शनादिति चेत; न, स्वाश्रयत्वस्य साधनपारतन्त्र्यादिवदानुषङ्गिकतया प्रतीतिः। न पुरुषार्थानुप्रवेशितया। अतो ब्रह्मानन्दोऽप्यपरोक्षावभासः पुरुषार्थ इति तदर्थं ब्रह्मविचार उपपद्यते। ब्रह्मशब्देन च ब्राह्मणजातिजीवकमलासनशब्दराशीनामिह ग्रहणं न संभवति।

ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्यन्तं ज्ञातं सन्वाच्याया इच्छायाः कर्म। फलविषयत्वादिच्छायाः ज्ञानेन हि प्रमाणेन अव–

---

व्याचष्टे—ज्ञातुमिच्छेति। धातोः कर्मणः समानकर्तृकादिच्छायां वेति धात्वर्थसमानकर्तृकेच्छायां सन्प्रत्ययस्य विधानात् धात्वर्थो ज्ञानम्। अतः तत्कर्तृकेच्छा जिज्ञासापदार्थो वक्तव्यः। यस्य यद्विषयकं ज्ञानं तस्य तद्विषयकज्ञाने इच्छा न संभवति। ज्ञानस्य वृत्तत्वादेव। यदि ज्ञानं न वृत्तम् सुतरां तदिच्छा न संभवति। लोके अप्रसिद्धवस्तुविषयेच्छाया अदर्शनादिति चेत्। उच्यते। कस्यचित्कृतपुण्यपुञ्जस्य हीत्थमालोचना जायते। तथाहि—इदं वियदादिसमस्तं जगत् कार्यं परिच्छिन्नत्वात् घटादिवदिति कार्यत्वमनुमायाऽऽकाशस्य परिच्छिन्नत्वं शब्दसमवायिकारणत्वेनावगम्याऽऽकाशादिसमस्तं जगत् सोपादानकं कार्यत्वाद्घटवत्। आकाशादिकं साधिष्ठानकं दृश्यत्वात्, शुक्तिरजतादिवत्। अहङ्कारादिदेहान्तं साधिष्ठानकं दृश्यत्वात् शुक्तिरजतादिवदेवेति सर्वाधिष्ठानं सर्वव्यापकं सर्वदृश्यविलक्षणमेकं सिद्धं इत्यालोचना भवति। किञ्च "ब्रह्मविदाप्नोति परं" "तरति शोकमात्मवित्" अयमात्मा ब्रह्म" इति वेदान्तवाक्यैर्विदितपदार्थसङ्गतिकस्येत्थं परामर्शो जायते। जानाम्यहं ब्रह्मपदात्तदर्थं अहमित्यात्मानं च तस्य शोकनिवृत्तिः न दृश्यते। ज्ञानाच्छोकनिवृत्तिः श्रूयते। किमत्र तत्वं? यज्ज्ञानाच्छोकनिवृत्तिः भवति, तज्ज्ञानं मे भूयादिति ज्ञानविशेषविषयकेच्छा जायत एवेत्याशयवानाह—ज्ञातुमिच्छेति। इच्छाजनकं सामान्यज्ञानं वस्तुमात्रविषयकं न मोक्षपर्यवसायि विचारफलभूतं ज्ञानं इच्छाया विषयः। तस्याधुनाप्यप्राप्तत्वात् ज्ञानसाधनविचारारम्भकेच्छा जायते। तत्कीदृशं ज्ञानं इत्यत आह —अवगतिपर्यन्तमिति। पुरुषार्थपर्यवसायि ज्ञानं इच्छाविषयः इत्यर्थः। तत्र हेतुमाह–फलेति। तदेवोपपादयति। ज्ञानेन हीति। ज्ञायते अभिव्यज्यते ब्रह्म आत्मभावेन इति ज्ञानं

---

यदि तत्कर्मिका जिज्ञासा ब्रह्मजिज्ञासा, अथवा तत्कर्तृका? नाद्यः ब्राह्मणत्वजातेर्जीवस्य च प्रत्यक्षसिद्धत्वेन तत्र जिज्ञासानुपपत्तेः। कमलासनकर्मिका ब्रह्मजिज्ञासेत्यपि न, तत्पदादपि विरक्तस्य ब्रह्मजिज्ञासाधिकारात्। नापि शब्दराशेः कर्मत्वं, धर्मजिज्ञासायां विदितपदपदार्थस्यैव ब्रह्मजिज्ञासाधिकारात। न द्वितीयः। ब्रह्मविचारस्य त्रैवर्णिकाधिकारत्वेन ब्राह्मणमात्रकर्तृत्वाभावात्। जीवपक्षे च व्यर्थविशेषणत्वप्रसङ्गः। कमलासनपक्षे च तस्य ज्ञानवैराग्ययोः सहसिद्धत्वेन जिज्ञासानुपपत्तिः। शब्दराशेः अचेतनत्वादेव न तत्कर्तृका जिज्ञासा।

गन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि पुरुषार्थः। निश्शेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्। तस्मात् ब्रह्मजिज्ञासितव्यम्।

---

विचारोपकृतं वेदान्तजन्यवृत्तिविशेषः। तदेव प्रमाणमभिव्यञ्जकम्। तेन अवगन्तुमहमस्मीत्यनुभवितुं इष्टं ब्रह्मेत्यर्थः। तस्य पुरुषार्थपर्यवसायित्वमाह—ब्रह्मावगतिरिति। अवगम्यत अखण्डाकारधीवृत्त्याभिव्यज्यत इत्यवगतिः ब्रह्मैव अवगतिः ब्रह्मावगतिः। सैव पुरुषार्थः इत्यर्थः। तत्र हिशब्दसूचितं हेतुमाह—निश्शेषेति। ब्रह्मणः स्वरूपेणाविद्यादिसाधकत्वेऽपि विचारजन्याखण्डाकारवृत्त्यभिव्यक्तस्वरूपेणाविद्यानिवर्तकत्वमस्तीति सिद्धवत्कृत्य हेतुः प्रयुक्तः आचार्यचरणैः। प्रकरणार्थमुपसंहरति—तस्मादिति। ब्रह्मज्ञानफलाय विचारयितव्यं ब्रह्मेत्यर्थः।

इति तृतीयं वर्णकम्॥

---

तस्माद्ब्रह्मशब्देन जगज्जन्मादिकारणतया वक्ष्यमाणमेव परिगृह्यते। ब्रह्मणः जिज्ञासा ब्रह्मजिज्ञासेति षष्ठीसमास एव युक्तः। न धर्माय जिज्ञासेतिवच्चतुर्थीसमासः।

तत्र हि जिज्ञासाशब्दस्य विचारार्थतया प्रयुक्तत्वाद्विचारस्य च सन्निधानादधीतवेदवाक्यं विषयः सिद्ध इति प्रयोजनाकाङ्क्षायां तत्प्रतिपादनाय चतुर्थीसमासो युक्तः। इह तु जिज्ञासाशब्दस्येच्छाप्रतिपादकत्वादिच्छायाश्चैष्यमाणं ज्ञानं प्रयोजनं सिद्धं इति विषयापेक्षायां तत्प्रतिपादनार्थं षष्ठीसमास एव युक्तः। षष्ठ्यपि कर्मण्येव न शेषे।

ननु कर्मणि षष्ठीपरिग्रहे ब्रह्मविचारमात्रस्य प्रतिज्ञा स्यात्। न तत्प्रमाणसाधनयुक्तिफलविचाराणां, शेषषष्ठीपरिग्रहे कारकपञ्चकव्यतिरिक्तस्वस्वामिसम्बन्धस्य शेषत्वात्तस्मिन्नभिहिते सामान्यद्वारा विषयत्वमपि अर्थात्सिध्यति इति ब्रह्मणः कर्मत्वमपि न विरुध्यत इति चेत्; न, साक्षात्कर्मत्वाभिधानसम्भवे प्रणाड्या तत्कल्पनस्यायुक्तत्वात्। न चाङ्गविचाराणां अप्रतिज्ञातत्वं, प्रधाने जिज्ञासाकर्मणि निर्दिष्टेऽर्थात् तदङ्गानामपि जिज्ञास्यत्वसिद्धेः। यथा राजासौ गच्छतीत्युक्ते यावता परिवारेण विना राज्ञो गमनं न सम्भवति तस्यापि गमनमर्थात्प्रतीयते तद्वत्।

ज्ञातुमिच्छा जिज्ञासा अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म, न ज्ञानमात्रम्। तस्य पूर्वमज्ञातत्वे इच्छानुपपत्तेः। ज्ञातत्वे च विषयेण सह ज्ञातत्वात् न ज्ञानमात्रेच्छा सम्भ-

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्; यदि प्रसिद्धं न जिज्ञासितव्यम्। अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति। उच्यते। अस्ति तावत् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमान्वितम्, ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते।

---

अथ चतुर्थवर्णकम्

ब्रह्मणो जिज्ञासेति कर्मणि षष्ठ्याश्रयणेन जिज्ञास्यत्वं ब्रह्मणो व्याख्यातम्। स्थूणानिखननन्यायेन तदेव द्रढयितुं प्रसिध्यप्रसिद्धिभ्यां ब्रह्मणोऽजिज्ञास्यत्वं इति पूर्वपक्षं उपक्षिपति —तत्पुनरिति। सिद्धे इच्छाविरहादत्यन्तासिद्धौ बुध्यनारूढस्य जिज्ञास्यत्वं न संभवत्येवेत्यर्थः। सिद्धान्तं वक्तुं प्रतिजानीते—उच्यत इति। तावच्छब्दः पूर्वपक्षप्रतिक्षेपार्थः साकल्येन ज्ञाते अत्यन्तं अज्ञाते वा जिज्ञासा न भवतीति सामान्यतः प्रसिद्धे तद्विशेषज्ञानात्फलं श्रुतवतः तद्विशेषविषयकजिज्ञासोपपद्यते इति मत्वा सामान्यतो ब्रह्मप्रसिद्धमस्तीत्याह —अस्तीति। उक्तविशेषणविशिष्टं ब्रह्म कस्य केन प्रमाणेन प्रसिद्धमस्तीत्यत आह—ब्रह्मशब्दस्य हीति। ब्रह्मवित् आप्नोति परं इति परमपुरुषार्थसाधनब्रह्मविद्याविषयत्वेनाभिहितं आदौ ब्रह्मपदेन। ब्रह्मपदात्तदर्थं तद्विद्याफलं च श्रुतवतः पुरुषस्य "सत्यं ज्ञानं अनन्तं ब्रह्म। विज्ञानं आनन्दं ब्रह्म" "अस्थूलमनणु" "न तदश्नाति किञ्चन न तदश्नाति कश्चन इत्यादिलक्षणतो व्युत्पादकवाक्यप्रमाणेन प्रसिद्धमस्तीति भावः। नित्यत्वशुद्धत्वादयो धर्मा इत्यर्थः। अत्र च ब्रह्मेति लक्ष्यं निर्दिश्यते। सत्यादिपदैः तल्लक्षणं सत्यत्वादि

---

वति। अतः सामान्यतः ज्ञाते विशेषज्ञानं, विशेषतोऽपि सन्दिग्धे निश्चयफलं ज्ञानमिष्यते। तच्च विचारं विना नोपपद्यत इति उक्तपदार्थप्रतिपत्तिपूर्वकं निरर्थकानुवादत्वपरिहाराय कर्तव्यपदमध्याहृत्याधिकारिविशेषणं मोक्षं फलत्वेन विपरिणमय्य साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्यो नवेति वाक्यार्थलाभात् विशिष्टाधिकारिसिद्धेर्ब्रह्मविचार उपपद्यत इति तृतीयवर्णकं सिद्धम्॥

॥अथ चतुर्थवर्णकम्॥

पुनरपि ब्रह्मविचारः कर्तव्यो नवेति ब्रह्मणः प्रसिद्ध्यप्रसिद्धिनिबन्धनविषयप्रयोजनसम्बन्धसम्भवासम्भवाभ्यां सन्देहे नेति तावत्प्राप्तम्। विषयप्रयोजनसंबन्धानामसंभवात्। तथा

हि—यज्जिज्ञास्यं ब्रह्म तत्किं प्रसिद्धमुताप्रसिद्धम्। नाद्यः। प्रसिद्धत्वे येन प्रमाणेन प्रसिद्धं तस्यैव विषयस्स्यात्। नास्य शास्त्रस्य। अन्याप्रतिपाद्यत्वे सत्येतत्प्रतिपाद्यत्वलक्षणानन्यसाधारणत्वस्यैव विषयत्वात् तस्यैव नियतप्रवृत्त्यङ्गत्वात्। न च यत्र प्रवृत्तिः तत्प्रतिपाद्यत्वमात्रज्ञानं तत्र नियतप्रवृत्तावङ्गम्। तथात्वे चिकित्साज्ञानस्य चरकसुश्रुतात्रेयप्रभृत्यनेकग्रन्थसाध्यत्वावगमेऽपि तदर्थिनः एकत्रैव नियमेन प्रवृत्तिप्रसङ्गात्। न तथा दृश्यते। तथा च नास्य शास्त्रस्य प्रयोजनमपि। ब्रह्मज्ञानं येन प्रसिद्धम् तेनैव तत्प्रयोजनसिद्धेः। तथा च प्रसिद्धिपक्षे विषयप्रयोजनयोः असंभवादिदं शास्त्रमनारम्भणीयम्। न द्वितीयः। अप्रसिद्धस्य न्यायसञ्चारपुरस्सरमनेनापि प्रतिपादयितुं अशक्यत्वात्। शक्यप्रतिपाद्यत्वरूपसंबन्धाभावात् तदधीनप्रयोजनासम्भवाच्च सुतरामनारम्भणीयम्।

ननु प्रेक्षावता भगवता व्यासेन प्रणीतत्वाद्विषयादिकं उन्नेयम्। न हीदृशोऽप्रयोजनविषयमसंबन्धं च निर्मिमीत इति युक्तमिति चेत्; न, प्रणेतृगौरवात् सामान्यतो विषयादिमत्वज्ञानेऽपि स्वाभिमतविषयप्रयोजनापरिज्ञाने प्रवृत्त्यनुपपत्तेः। नन्वेवमपि प्रयोजनविशेष एव निर्दिश्यताम्। तेनैव विषयसंबन्धयोरपि सिद्धेः। ननु विषयप्रयोजनयोः परस्परं भिन्नत्वेनैकेन निर्दिष्टेनेतरस्य कथं सिद्धिरिति चेन्न। तयोरेकत्वात् छिदिक्रियाविषय एव हि वृक्षः-छिन्नः प्रयोजनमित्युच्यते। न ततो भिन्नः। दण्डादेरपि मृद्विषयस्य मृदेव घटावस्था प्रयोजनमिति चेत्। उच्यते। प्रयोजनं नाम पुरुषार्थमात्रम्। विषयो नाम अनन्यसाधारणः। यथार्जुनस्य विषयो निवातकवचवधादिः। सम्बन्धो नाम शक्यप्रतिपाद्यत्वम्। धर्म्यैक्येऽपि धर्मत्रयं परस्परं भिन्नम्, प्रवृत्त्यङ्गं च, एकेन विनाऽपि प्रवृत्त्यनुपपत्तेः।

तथा हि—चिकित्साज्ञाने पुरुषार्थरूपे चरकसिद्धे सुश्रुतादौ न नियमेन प्रवृत्तिः। तथा व्याकरणस्यानन्यसाधारणेऽपि साधुशब्दपरिज्ञाने पुरुषार्थरूपे शक्यप्रतिपाद्यत्वाज्ञाने व्याकरणे न प्रवृत्तिः। तथा अनन्यसाधारणत्वे शक्यप्रतिपाद्यत्वे वा काकदन्तपरीक्षायां न प्रवृत्तिः। अतः त्रितयमपि प्रवृत्त्यङ्गत्वेन प्रथमं सिद्धं वक्तव्यम्। तदभावात् नेदं शास्त्रमारम्भणीयमिति प्राप्ते।

उच्यते। न तावदेकान्ततोऽप्रसिद्धिर्ब्रह्मणः विप्रतिपत्तिदर्शनात्। असिद्धे विप्रतिपत्त्यनुपपत्तेः। तथा च शक्यप्रतिपाद्यत्वं संबन्धः संभवति। नाप्येकान्ततोऽन्यतः प्रसिद्धिः। ततः एव। अतोऽनन्यसाधारणत्वलक्षणविषयः संभवति। अत एव तद्रूपताप्राप्तिः प्रयोजनमिति कुतः शास्त्रानारम्भः।

ननु यद्यपि वेदान्तानां ब्रह्म विषयः, तथापि न विचारशास्त्रस्य विषयः शास्त्रं पुनः ब्रह्मप्रतिपादनोपयोगिन्यायविषयम्। तत् कथं शास्त्रस्य विषयसम्बन्धसिद्धिः। ननु आग्नेयाद्यङ्गभूतप्रयाजादीनां यथा प्रधानफलेनैव फलवत्त्वम्, यथा च बीजस्याङ्कुरं जनयतः अङ्गभूतमृज्जलादीनां तत्फलेनैव फलवत्त्वम्। तद्वद्वेदान्तानां अर्थमवगमयतां अङ्गभूतविचारशास्त्रस्यापि तद्विषय एव विषयः। छेत्तुरुद्यमननिपातनव्यापारस्य कुठारविषयस्यापि उद्देश्यतया वृक्षविषयत्वदर्शनादिति चेत् न। विचारशास्त्रस्येतिकर्तव्यत्वासिद्धेः। तेन विनापि पदपदार्थानुसन्धानयोग्यतादिज्ञानादेव वेदान्तार्थप्रतीत्युपपत्तेः। ननु वेदान्तात् प्रथममुत्पन्नस्यापि ज्ञानस्य संशयादिरूपत्वेन तन्निरसनपुरस्सरं निर्णयजनने शास्त्रस्य व्यापारः। तथा च निर्णेयं वस्तु तस्य विषय इति चेत्, न; वाक्यादुत्पन्नस्य संशयरूपत्वासिद्धेः इत्युक्तमन्यत्र। वेदान्तार्थविपरीतज्ञानं तु सामान्यतो दृष्टानुमानेन जायते। तस्य विचारान्निवृत्तौ प्रागुत्पन्नमेव ज्ञानं निश्चलं अवतिष्ठत इति विचारस्य कथं निर्णयद्वारा तद्विषयत्वमिति।

उच्यते यद्यपि शास्त्रानुग्रहात्प्रागेव वाक्यार्थज्ञानमुत्पन्नम्। तथाऽपि तन्न कार्यक्षमम्। सामान्यतो दृष्टप्रभवयैकाद्वितीयादिशब्दानामन्यार्थत्वकल्पनया प्रतिबन्धात्। विचारशास्त्रात्तत्प्रतीतिप्रयोजनकत्वरूपतात्पर्यावगमे विरोधिज्ञाननिवृत्तावविद्यानिवृत्तिसमर्थमिति कार्यक्षमज्ञानस्य विचारं विना अनुपपत्तेः तद्विषयस्य विचारविषयत्वं युज्यते।

ननु तात्पर्यज्ञानस्य विरोधिज्ञाननिवृत्तावुपयोग इति कुतः? प्रकृतवाक्यार्थज्ञानहेतुतैव किन्न स्यादिति चेत्; किं तत्तात्पर्यं यस्य ज्ञानं शाब्दबोधोपयोगि। न तावत् पुरुषाभिप्रायः। किं स स्वरूपेण शाब्दबोधज्ञानोपयोगि। उत ज्ञायमानतया। नाद्यः, तात्पर्यज्ञानफलविचारशास्त्रस्यानारम्भप्रसङ्गात्। तात्पर्याविषये शाब्दबोधानुपपत्तिप्रसङ्गाच्च। नचेष्टापत्तिः। दृश्यते हि तात्पर्याविषयेऽप्यन्वयबोधः। यथा कश्चित्कश्चित् प्रति वदति स्थानजिघृक्षया "पित्रा त्वमाहूत" इति। इतरस्तद्वचनादुत्तिष्ठति। तदुत्थानसमनन्तरमेवाऽन्यः तत्रोपविशति। तदनन्तरमेव बालः स्थानजिघृक्षयेदमुक्तमिति प्रतिपद्यते। तात्पर्याविषयेऽप्यन्वयबोधदर्शनात्।

न तृतीयः। किं पदार्थतात्पर्यज्ञानं हेतुः। उत वाक्यार्थतात्पर्यज्ञानम्? नाद्यः। तस्य वाक्यार्थप्रतिपत्तावनुपयोगात्। न द्वितीयः। वाक्यार्थस्य प्रागज्ञातत्वेन तद्विशेषिततात्पर्यज्ञानानुत्पत्तेः। ननु चोत्प्रेक्षारूपसंसर्गज्ञानं प्रथममपि संभवतीति चेत्। न। तत्किं प्रमारूपम्। उताप्रमारूपम्। नाद्यः। प्रत्यक्षादीनां अन्यतमप्रमाणस्याभावेन शब्दस्यैव तज्जनकत्वात्। तस्य च तात्पर्यज्ञानसापेक्षत्वात् परस्पराश्रयः। नापि द्वितीयः।

किन्तत्स्मृतिरूपम्। उत संशयरूपम्? नाद्यः। प्रागज्ञातत्वात्। न द्वितीयः। द्व्याकारत्वाभावात्। न तृतीयः। बाधानुपलब्धेः। अतो न पुरुषाभिप्रायरूपतात्पर्यज्ञानं हेतुः। किन्तु यथार्थतत्प्रतीत्युद्देश्यकत्वज्ञानमेव। तदपि प्रथमं शब्दात् ज्ञाने जाते सामान्यतो दृष्टादिवशेन विपरीतज्ञाने समुत्पन्ने तन्निवृत्तावेव हेतुः न वाक्यार्थज्ञाने। संसर्गगर्भतात्पर्यज्ञानस्य संसर्गापरिज्ञाने अनुपपत्तेः इत्यलं अतिप्रसङ्गेन।

ननु सामान्यप्रसिद्धिविशेषविप्रतिपत्तिभ्यां न विषयादिसमर्थनम्। सामान्यप्रसिद्धेरेवानुपपत्तेः। किं प्रत्यक्षादिना सामान्यतः प्रसिद्धं ब्रह्म, उताऽऽगमात्? नाद्यः, तेषां तदगोचरत्वात्। न द्वितीयः। विशेषप्रसिद्धिसङ्केतग्रहाद्यभावे तस्याबोधकत्वादिति चेत्।

न, "तद्विजिज्ञासस्व तत् ब्रह्मेति" इति श्रुतौ अथातो ब्रह्मजिज्ञासेति सूत्रे च ब्रह्मशब्दार्थस्य जिज्ञास्यत्वनिर्देशाज्जातिजीवकमलासनशब्दराशीनां तदनुपपत्त्या निरस्तत्वात्। परिशेषादतिरिक्तं ब्रह्मास्तीत्यवगम्यते। निर्दुष्टशब्दस्यार्थवत्त्वनियमात्।

ननु किं पदमात्रं तत् प्रतिपादयति। उत वाक्यम्? नाद्यः। तस्य स्मारकत्वात्। न द्वितीयः। अप्रसिद्धपदार्थान्वयबोधानुपपत्तेः, पदपदार्थसंसर्गस्य वाक्यार्थत्वात्। न च स्वर्गापूर्वादिवत् तत्प्रतीतिः। तेषां यन्न दुःखेन संभिन्नमित्यादिवाक्यान्तरप्रमेयत्वादिति चेत्।

न। एकवाक्यार्थप्रतीतिप्रयोजनतया प्रयुक्तप्रसिद्धार्थपदसामानाधिकरण्यानुपपत्तिरेव कञ्चिदर्थं कल्पयतीति ब्रूमः। न चाप्रसिद्धार्थपदसामानाधिकरण्यात् प्रसिद्धस्य त्याग एव कस्मान्न भवतीति वाच्यम्। असिद्धेः प्रागभावरूपत्वात्। कादाचित्कप्रसिद्धिरेव तत् बाधत इति वदामः।

ननु विशेषतः प्रसिध्यभावेऽर्थे विशेषस्य वाक्यार्थान्वयः कथमिति चेत्। निगमनिरुक्तव्याकरणादिवशेन विशेषतोऽपि सिद्धिसंभवात्। तत्र निगमो नाम स्वार्थतदवयवौ परित्यज्य प्रकृत्यर्थमात्रानुमत्या पदार्थान्तरे वृत्तिः। यथा देहशब्दस्य 'दिह उपचय' इति धात्वनुरोधादुपचितपदार्थान्तरे वृत्तिः। निरुक्तं नाम एकत्र रूढस्याऽन्यत्र योगेन वृत्तिः। यथा सोमशब्दस्य चन्द्रे प्रसिद्धस्य उमासहिते महेश्वरे वृत्तिः। व्याकरणे ताच्छील्यादौ णिनिप्रत्ययादिवशाद्वादीत्यादौ वदनार्थविशेषप्रतिपत्तिः प्रसिद्धैव।

ननु निगमादिवशेनाऽर्थप्रतिपत्त्यङ्गीकारे सर्वत्र कथञ्चिदवयवार्थानुस्यूतेः वक्तुं शक्यत्वाद्वाक्यार्थबोधे पदार्थविशेषान्वयनियमो न स्यात्। अतः प्रयोगानुरोधात् अर्थविशेषरूढिरेवा-

ऽस्त्विति चेत् । तर्हि लोकप्रसिद्धनिगमनिरुक्तादिवैय्यर्थ्यं स्यात् । सर्वत्र रूढित एवार्थ-प्रत्ययोपपत्तेः । अतोऽन्तरेणैव रूढिं निगमादिवशादेवार्थप्रतीतौ यस्याऽऽकाङ्क्षायोग्यतादिकं इतर-पदैः सः सहसाऽन्वेति नापर इति नियतवाक्यार्थप्रतीतिरिति नाव्यवस्थाप्रसङ्गः । एतदभिप्रेत्यैवाह भगवान् भाष्यकारः—**अस्ति तावत् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्ति-समन्वितं ब्रह्मशब्दस्य व्युत्पाद्यमानस्य नित्यत्वादयोऽर्थाः प्रतीयन्ते । बृहतेर्धातोः अर्थानुगमानादिति ।**

ननु जातिजीवकमलासनादिषु ब्रह्मशब्दप्रयोगेऽपि नेदृशार्थप्रतिपत्तिः दृश्यते । अत्र कथं तत्प्रतिपत्तिः इति । नैष दोषः । बृह बृहि वृद्धाविति धातोः वृद्धिकर्मणो महत्त्वाभि-धायित्वात् । ब्रह्मशब्दस्य च तत्र व्युत्पन्नत्वात् । प्रमाणान्तरसिद्धार्थे तस्य प्रयोगे यथाप्राप्तमेव महत्वं वदति । न निरवग्रहत्वम् । प्रकृते च जिज्ञास्यब्रह्मणः प्रमाणान्तरा-गोचरत्वात् सङ्कोचकाभावे निरवग्रहमहत्वप्रतिपत्तिः । महत्वं च परिच्छेदाभावः उत्कर्षश्च । परिच्छेदोऽपि त्रेधा । कालतो देशतो वस्तुतश्च । घटादिकं तु कालतः परिच्छिन्नम् । अस्मिन्कालेऽस्ति, अस्मिन्काले नास्तीति व्यावृत्तत्वप्रतीतेः । तथा देशतोऽपि परिच्छिन्नम् । अस्मिन्देशे नास्तीति प्रतीतेः । तथा वस्तुतोऽपि परिच्छिन्नं, इदं अस्माद्भिन्नमिति वस्त्वन्तरात् व्यावृत्तत्वप्रतीतेः । एतत्त्रयाभावो निरवधिकमहत्वमिति जिज्ञास्यब्रह्मणः प्रतीयत इत्याह— नित्येति ।

शुद्धेत्यविद्यादिदोषराहित्यमुच्यते । मुक्तेत्यनेनापि तदेवोच्यते इति न पौनरुक्त्यं शङ्क्यम् । मुक्तेत्यनेन मुक्तिकाले अविद्याराहित्यमुच्यते । तदस्मदादेः अप्यविशिष्टमिति सर्वदा अविद्याराहित्यं शुद्धशब्देनोच्यत इत्यपौनरुक्त्यात् । एतद्द्वयमपि ब्रह्मशब्दादेव प्रतीयते । अविद्यायुक्तस्य निकृष्टत्वेनोत्कर्षवाचिब्रह्मशब्दात्तदभावावगमात् । बुद्धेत्यपि ब्रह्मत्यर्थान्वयादेवाऽवगम्यते । अबोधात्मकस्य भोग्यकोटिप्रविष्टत्वेन भोक्तारं प्रति शेषत्वेन निकृष्टत्वप्रसङ्गात् । तत एव सर्वज्ञं सर्वशक्तिसमन्वितमित्यपि सिध्यति । यदि कुतश्चि-द्विषयादस्य ज्ञानं व्यावृत्तम् , यदि वा कुतश्चित्कार्यादस्य शक्तिर्व्यावर्तते । तदाऽस्मदादि-तुल्यतया निकृष्टत्वप्रङ्ग इति निरवग्रहोत्कर्षवाचिब्रह्मशब्दादेव तद्द्वयमपि प्रतीयत इति नाप्रसिद्धपक्षोक्तदोषावकाशः ।

ननु किं लौकस्य ब्रह्मशब्दस्य बृहत्यर्थान्वयादर्थो वर्णितः , उत श्रौतस्य ? नाद्यः । पौरुषेयप्रयोगस्य प्रमाणान्तरापेक्षत्वात् तदभावात् । न द्वितीयः । "सत्यं ज्ञानं अनन्तं",

"यतो वा इमानि भूतानि जायन्त" इत्यादिशास्त्रान्निर्णीयमानार्थत्वादनुगमानपेक्षत्वादिति चेत्। न, श्रुतिप्रमाणावगतविषयतया तन्मूलस्यैव सौत्रस्य ब्रह्मशब्दस्यार्थोपपादनात्।

ननु तस्य यतो वा इत्यादिमूलभूतश्रुत्यन्तरसूत्रन्यायसहिततया निर्णीतार्थत्वात् नानुगमापेक्षेति चेत्। शास्त्रप्रवृत्तिसमये तन्न्यायापरिज्ञानेन तदनादृत्यैव बृहत्यर्थानुगमादर्थवर्णनोपपत्तेः। श्रौतस्य वायं ब्रह्मशब्दस्यार्थानुगमो वर्ण्यते। न च श्रुतिवशादेव निर्णयः। वाक्यार्थबोधात् पूर्वं ब्रह्मपदार्थोपस्थित्यभावे ब्रह्मपदवद्वाक्यार्थबोधानुपपत्तेः। तदर्थं प्राग्ब्रह्मशब्दार्थप्रसिद्धेर्वक्तव्यत्वेनाऽनुगमापेक्षणात्। ननु बृहत्यर्थानुगमादीदृशवस्तुज्ञानं संभावनारूपमेव भवति। न निर्णयरूपम्। निर्णयज्ञानं च वाक्यार्थबोधोपयोगीति चेन्न। समभिव्याहृतपदान्तरान्वययोग्यपदार्थोपस्थितिमात्रं वक्ष्यते। न निर्णयरूपमेव। प्रकृते च जिज्ञासापदस्य समभिव्याहृतत्वात् तदन्वययोग्यं मम निर्णीतमेव बृहत्यर्थानुगमादुपस्थितमिति न काप्यनुपपत्तिः।

किञ्चाहमस्मीत्यात्मास्तित्वं सर्वेषां प्रसिद्धम्। आत्मा च ब्रह्म अयमात्मेति श्रुतेः। ननु यः प्रसिद्धः स न जिज्ञास्यः। यो जिज्ञास्योऽशनायाद्यतीतः सोऽप्रसिद्ध इति कथं तस्य प्रतिपाद्यतेति चेत्। न। प्रसिद्धात्मानुवादेन तस्यैवापरिच्छिन्नत्वादिप्रतिपादनोपपत्तेः। ननु ब्रह्मणि सामान्यविशेषाद्यभावात् प्रसिद्धं चेत् सर्वात्मना तत्प्रसिद्धमिति नास्य शास्त्रस्य विषयः स्यादिति चेत्; न, किं परमार्थस्यः सामान्यविशेषाभावः। उत कल्पितत्वेनापि? नाद्यः। तदभावेऽपि कल्पितविशेषे विप्रतिपत्त्युपपत्तेः। तथा हि—ब्रह्म तावद्देहेन्द्रियादिव्यावृत्तप्रत्यग्रूपम्। तदेव च देहेन्द्रियादिष्वनुस्यूतप्रत्यक्त्वसामान्यरूपेण प्रथते। अहं मनुष्योऽहं काणः अहं कर्तेति सर्वत्र प्रत्यक्त्वावभासदर्शनात्। तथा च प्रत्यक्त्वाक्रान्तविशेषान्तरैः देहादिभिः सह विप्रतिपत्तिर्ब्रह्मणस्संभवति। किं देहः प्रत्यक् उत इन्द्रियम्, उत मन इत्यादि। अतः सामान्यतः प्रसिद्धेऽपि ब्रह्मणि विप्रतिपत्तिसंभवात् अनन्यसाधारणतया विषयत्वमुपपद्यते।

ननु कथं विप्रतिपत्तिः यन्निरासाय शास्त्रं आरभ्यते। उच्यते। देहमात्रं चैतन्यविशिष्टं आत्मेति प्राकृतजना लोकायतिकाश्च प्रतिपन्नाः। न च तत्र प्रमाणाभावः। ज्ञानाश्रयस्य भोक्तुः आत्मत्वान्मनुष्योऽहं जानामि भुञ्ज इति ज्ञानादेः देहाश्रयत्वप्रतीतेः अहमित्युल्लेखाच्चेति। इन्द्रियाण्येवात्मेति केचित्। कुतः? ज्ञानोत्पत्तौ इन्द्रियान्वयव्यतिरेकौ अनुभूयेते। तौ चेन्द्रियाणां ज्ञानाश्रयत्वं कल्पयतः। न च ज्ञानकरणतामात्रेण तयोरन्यथासिद्धिः। आश्रयत्वस्याभ्यर्हितत्वात्। काणोऽहं मूकोऽहं इत्यनुभावाच्च।

न चेन्द्रियाणां अनेकत्वात् योऽहं अद्राक्षं सोऽहं स्पृशामीति प्रतीत्यनुपपत्तिः। एकशरीराश्रयत्वेन प्रत्यभिज्ञोपपत्तेरिति।

केचित्तु स्वप्नावस्थायां इन्द्रियाभावेऽपि रूपादिविज्ञानदर्शनात्। न च मनसा रूपादिस्मरणमात्रं नानुभव इति वाच्यम्। चक्षुरादिदृष्टस्य मनसा स्मरणानुपपत्तेः। अन्यदृष्टे अन्यस्य स्मरणाभावात्। एकशरीराश्रयत्वेन प्रत्यभिज्ञाङ्गीकारे एकप्रासादाश्रयचैत्रमैत्रादीनामपि प्रत्यभिज्ञाप्रसङ्गात्। मन एव सर्वदोषरहितमात्मेति मन्यन्ते। **विज्ञानवादिनस्तु** देहेन्द्रियमनसामनात्मत्वं अविज्ञानत्वात् विज्ञेयत्वाच्च घटवत्। मनसः समनन्तरप्रत्ययरूपत्वेन विज्ञानमात्रत्वाच्च। अतः क्षणिकविज्ञानमेव सन्तानरूपेणैहिकामुष्मिकसर्वव्यवहारास्पदमिति। **शून्यवादिनस्तु** अव्यभिचारि स्वरूपं तत्वम्। ज्ञानं तु न तथा। सुषुप्तावभावेन व्यभिचारात्। न चासिद्धिः। सुषुप्तौ विद्यमानं ज्ञानं किं सविषयं उत निर्विषयम्? नाऽद्यः। अननुभवात्। सुषुप्तिव्याघाताच्च। न द्वितीयः, निर्विषयज्ञानानुपपत्तेः। किं च सविकल्पकस्य स्वविषयविपरीतनिर्विकल्पकजन्यत्ववत् निर्विकल्पकस्यापि सत्प्रत्ययत्वात् स्वविषयविपरीतशून्यजन्यत्वानुमानात्तदधीनसत्ताकानां सर्वविज्ञानानामपि शून्यतापत्तिरिति शून्यमेवाऽऽत्मेति मन्यन्ते। **प्राभाकरास्तु** देहादिभ्यः शून्यान्तेभ्यः व्यतिरिक्तः कर्ता भोक्ताऽस्तीति वर्णयन्ति।

ननु कथं विज्ञानशून्यव्यतिरिक्तस्याऽऽत्मनः सिद्धिः? उच्यते। विषयसंविदाश्रयत्वेनाहमिति प्रतीयमानो भोक्ता न कदाचिदपि ममप्रत्यालम्बनो भवति। स च योऽहं पूर्वेद्युरश्रौषं स एवेदानीं पश्यामीति प्रत्यभिज्ञया स्थिरत्वेनावगतो न सुषुप्ते अभावमनुभवितुमर्हति। ततः शून्यविज्ञानव्यतिरिक्तः भोक्ता! किञ्च प्रवृत्तिनिमित्तभूतमिष्टसाधनत्वज्ञानं इत्थमुत्पद्यते। प्रथममभिमतवस्तुदर्शनेन तदुपभोगे सति द्वितीयक्षणे सुखज्ञानं जायते। ततः षष्ठक्षणे तादृशवस्त्वन्तरदर्शनाद्रागद्वेषौ भवतः। ततः सप्तमक्षणे हानोपादाने भवतः। ततोऽष्टमक्षणे सुखादिप्राप्तिरित्यष्टमक्षणवर्तिनां अमीषां पदार्थानां एकस्मिन्पुरुषे पूर्वपूर्वाभावे उत्तरोत्तरासम्भवात् आत्मनो अष्टमक्षणावस्थानसिद्धिः। क्षणिकविज्ञानपक्षेषु तु नैतत्संभवति।

नन्वष्टमक्षणावस्थानसिद्धावपि न नित्यत्वसिद्धिः, पश्चान्नाशसंभवादिति चेत्; न, किं परतो नाशः, उत स्वतः? नाऽद्यः। सावयवस्य घटादेः हेतूपरागाद्विनाशदर्शनान्निरवयवस्याऽऽत्मनः तदनुपपत्तेः। न स्वतः, क्षणिकत्वे हि स्वसत्ता-

प्रयुक्तविनाशः स्यात् । स्थायित्वे तु तदनुपपत्तिः । अतो नाशानुत्पत्तेः नित्यत्वसिद्धिः । अतोऽपि न विज्ञानरूप आत्मा । किञ्च विज्ञानस्य मम ज्ञातमिति ममप्रत्ययालम्बनत्वम् । तत्राऽऽत्मशब्देन बाधादेव ममप्रत्ययस्य गौणत्वात् । न च प्रकृते बाधकं अस्ति । तस्मादहमुल्लेखप्रत्यभिज्ञानाभ्यां विज्ञानशून्यव्यतिरिक्त आत्मा । ताभ्यामेव हेतुभ्यां मनोऽपि नात्मा । सुषुप्ते मनसो भावेऽप्येतावन्तं कालं न किञ्चिन्मया चेतितं इति प्रत्यभिज्ञानात् । अहं मन इत्यनवगमात्, मे मन इति च प्रतिभासात् । ज्ञानायौगपद्यलिङ्गेन करणतया कल्पितस्य मनसः आत्मत्वानुपपत्तेश्च ।

अत एव नेन्द्रियाण्यप्यात्मानः । य एवाहं रूपमद्राक्षं स इदानीं स्पृशामीति प्रत्यभिज्ञानात् । ममेन्द्रियाणीति चावगमात् । तथा शरीरमपि नाऽऽत्मा । मानुषशरीरस्याऽऽत्मत्वे स्वप्ने देवादिशरीरं प्राप्तस्याहमित्यात्मव्यवहाराभावप्रसङ्गात् । देवशरीरस्यात्मत्वे मानुष्ये तदभावप्रसङ्गात् । उभयोः तथात्वे योऽहं स्वप्ने व्याघ्रोऽभूवं सोऽहं इदानीं मानुषः संवृत्तः इत्युत्थितस्य प्रत्यभिज्ञानानुदयप्रसङ्गः । ननु इन्द्रियशरीरयोः काणोऽहं बधिरोऽहं मनुष्योऽहमिति प्रतीतिदर्शनादात्मत्वं किन्न स्यादिति चेत्; न, अनन्यथासिद्धममप्रत्ययानुरोधात् अहंप्रत्ययस्याध्यासत्वकल्पनात् ; तथा जातमात्रस्य जन्तोर्भयहर्षशोकादिः उत्पद्यमानो दृष्टनिमित्ताभावमस्मदादिवत्पूर्वानुभूतनिमित्तानुस्मृतिं कल्पयति । ततश्चास्यैव आत्मनो भयादिनिमित्तदर्शनवत्तया पूर्वजन्मसंबन्धसिद्धिः प्रत्यभिज्ञानात् ।

ननु तथापि तस्य कर्तृत्वभोक्तृत्वे कुत इति चेत्; न, भोक्तृत्वस्य सुखदुःखाद्यनुभवकृतत्वस्यानुभवसिद्धत्वात्तस्य निर्विकारे असंभवात् क्रियावेशात्मकं कर्तृत्वम् । अत एव संसारित्वम् । देहेन्द्रियादीनां तु भोक्तृत्वानुपपत्तेरपि नात्मत्वम् । कथं देहस्य भोक्तृत्वानुपपत्तिः । उच्यते । भूतसंपातो हि भवन्मते शरीरम् । तत्र सङ्घातस्य भूतेभ्योऽतिरिक्तत्वे तत्त्वसङ्ख्यातिरेकादवस्तुत्वप्रसङ्गात् भोक्तृत्वानुपपत्तिः । पृथिव्यप्तेजोवयवास्तत्त्वानीत्यभ्युपगमात् । अतो भूतानामेव भोक्तृत्वं वक्तव्यम् । तत्रापि किं सर्वेषां भूतानां भोक्तृत्वम् , उतैकस्य ? आद्येऽपि किं व्यस्तानां भोक्तृत्वम् , उत समस्तानाम् ? व्यस्तानामिति पक्षेऽपि किं युगपत् भोक्तृत्वम् , उत क्रमेण ? तत्र व्यस्तानां युगपद्भोक्तृत्वमिति पक्षे सर्वेषां भोगे प्राधान्यात् सङ्घातानुपपत्तिः । गुणप्रधानभावे हि सङ्घातो भवति । न समप्राधान्ये ! वैमत्यप्रसङ्गात् ।

अस्तु तर्हि क्रमेण भोक्तृत्वम् वरगोष्ठीवत्। गुणप्रधानभावात् संघातोपपत्तेः इति चेत्। किं चतुर्णामपि भूतानां रूपरसादि भोग्यं साधारणम्। उतासाधारणम्? नाद्यः। साधारणे विषये बहूनां सन्निधौ क्रमभोगानुपपत्तेः। वरगोष्ठ्यान्तु भोग्यस्यासाधारणत्वात्क्रम उपपद्यते। न द्वितीयः। युगपत्सर्वविषयसन्निधाने क्रमानुपपत्तेः। अस्तु तर्हि समूहस्य भोक्तृत्वम्। न च प्रत्येकं विद्यमानं चैतन्यं कथं समूहस्य स्यात् इति वाच्यम्। प्रत्येकं तिलेषु ज्वालाया अभावेऽपि समुदिते ज्वालाजन्मवदुपपत्तेरिति चेत्; न, किन्निमित्तः समूह इति वक्तव्यम्। आगामिभोगनिमित्त इति चेत्; न, भोगस्य भोक्तारं प्रति गुणभूतत्वात् गुणानुरोधेन प्रधानानां भोक्तॄणां समूहानुपपत्तेः। ननु मा भूद्व्यस्तानां समस्तानां वा युगपत्क्रमेण वा भोगः। किन्त्वेकस्येति चेन्न; कस्यैकस्येत्यत्र निर्णयकारणाभावात् न कस्यापि भोगः स्यात्। अतो न भूतसङ्घातस्य देहस्य भोक्तृत्वम्। अत एव नेन्द्रियसङ्घातस्यापि भोक्तृत्वम्। इन्द्रियस्वरूपतदुपादानप्राप्यप्रकाशकत्वादिनिरूपणं मनस्स्वरूपतत्परिमाणादिनिरूपणं आत्मस्वरूपतत्स्वयंप्रकाशत्वादिनिरूपणं च प्रासङ्गिकत्वाद्विस्तरभयान्न लिख्यते।

पूर्वोक्तस्यैव कर्तृत्वं तत्स्वभावं मन्वाना भोक्तैव केवलं न कर्तेत्यपरे। तथा हि —कर्तृत्वं हि क्रियावेशः। क्रिया च द्विविधा परिस्पन्दलक्षणा परिमाणलक्षणा च। न तावत्परिस्पन्द आत्मनः सम्भवति। सर्वगतत्वात्। नापि परिमाणः। निरवयवत्वात्। किञ्च यदि कर्तृत्वं आत्मस्वभावः स्यात् तर्हि आत्मनः सर्वदा भानात् तत्प्रतिभासोऽपि स्यात्। न तथा दृश्यते। ननु तर्हि भोक्तृत्वमपि न स्यात्। सर्वदा भानाभावादिति चेत्। न, दृश्यावभासो हि भोक्तृत्वम्। न सुखदुःखानुभव एव। तच्च सुषुप्तावपि न किञ्चिदवेदिषमिति अज्ञानादिद्रष्टृत्वादुपपद्यते। अस्ति तस्मादपि भोक्तृस्वरूपादतिरिक्तः सर्वस्येशिता। अत एव सर्वज्ञः सर्वशक्तिरिति केचित्। न च तत्र प्रमाणाभावः। विवादगोचरापन्नं भुवनविरचनं स्वरूपोपादानसंप्रदानप्रयोजनोपकरणादिविषयविज्ञानवत्कर्तृकं विविधविन्यासरूपकार्यत्वात् प्रासादादिवदित्यनुमानात् लाघवानुगृहीतत्वात सर्वज्ञः सर्वशक्तिः एक ईश्वरः सिध्यतीति वैशेषिकाः कल्पयन्ति। तत्र जीवकर्तृकत्वप्रसङ्गं व्यावर्तयितुं स्वरूपोपादानेत्यादिसाध्यविशेषणम्। उन्मत्तकार्ये व्यभिचारवारणार्थं विविधेति हेतुविशेषणम्।

सांख्ययोगास्तु विवादगोचरापन्ना ज्ञानैश्वर्यशक्तयः क्वचित्सर्वविषयज्ञानैश्वर्यशक्त्यविनाभूताः तरतमभावेनोत्कृष्यमाणविषयव्याप्तधर्मत्वात् परिमाणवदित्यनुमिमते। ईश्वर-

गतज्ञानादिशक्तीनां सर्वविषयज्ञानादिशक्त्यविनाभावसाधने बाधः, तदर्थं **विवादेति**। धर्मत्वादित्युक्ते संयोगे व्यभिचारः। तदर्थं—**विषयव्याप्तेति**। शौक्ल्यादिकं वारयितुं **तरतमभावेनेति**। तावत्युक्ते एकाभावो द्व्यभाव इत्येवं तरतमभावेनोत्कृष्यमाणाभावे व्यभिचारः तदर्थं **विषयव्याप्तेति**। अभावस्य न प्रतियोगिलक्षणविषयाश्रितत्वमिति न व्यभिचारः।

नन्वेतदनुपपन्नम्। किं सर्वविषयज्ञानैश्वर्यशक्तीनामन्यत्र प्रसिद्धत्वमुत न? प्रसिद्धत्वे अनुमानवैयर्थ्यम्। अप्रसिद्धत्वे अप्रसिद्धविशेषणत्वम्। दृष्टान्ते साध्यवैकल्यं च। विषयव्याप्तेत्यत्र किं विषयशब्दः कर्मपरः उताश्रयपरः। आद्ये साधनवैकल्यम्। द्वितीये असिद्धिरिति। **तत्रेदमभिधीयते**। ज्ञानत्वं निरतिशयवृत्ति सातिशयवृत्तित्वात् परिमाणत्ववदित्यत्र तात्पर्यम्।

**नैय्यायिकास्तु** विवादगोचरापन्नानि धर्माधर्मफलानि कर्मतत्फलसंप्रदानोपकरणादिविज्ञानवता प्रदीयमानानि व्यवहितक्रियाफलत्वात् सेवादिफलवदित्यनुमिमते। जीवेनार्थान्तरवारणार्थं साध्यविशेषणम्। मर्दनभोजनादिक्रियाफले व्यभिचारवारणार्थं हेतुविशेषणम्। अतो मानवत्वादस्ति सर्वज्ञः सर्वशक्तिरिति पक्षोत्थितिः सम्भवति।

नन्वहमिति प्रतीयमानस्य प्रत्यगात्मनोऽपि प्रतिपत्तिस्कन्धभेदः प्रदर्शयितुमारब्धो देहमात्रं चैतन्यविशिष्टमित्यादिना। तत्र कथं अहंप्रत्ययाविषयेश्वरपक्षोत्थनं अनुपयोगात् इति चेन्न। प्रत्यक्त्वाक्रान्तस्य विशेषान्तरैः देहादिभिः यथा विप्रतिपत्तिः देहः प्रत्यगिन्द्रियं प्रत्यगिति। तथा किमीश्वरव्यतिरिक्तः प्रत्यक्, उत तदव्यतिरिक्त इति प्रदर्शनार्थत्वेनोपयोगसम्भवात्।

अत्र कश्चिदाह——प्रत्यगात्मा न असाधारणस्वभावविवक्षया ब्रह्मशब्देन जिज्ञास्यत्वेनोद्दिश्यते अथातः ब्रह्मजिज्ञासेति, किन्त्वीश्वर एव ब्रह्मशब्देन उद्दिश्य विचार्यते जन्मादिसूत्रे जगत्कारणत्वलक्षणाभिधानात्। नहि प्रत्यगात्मन्येतल्लक्षणमुपपद्यते। तस्मादात्मनि विप्रतिपत्तिप्रदर्शनमसमञ्जसं इत्युच्यते। **यदि** ब्रह्मशब्देनेश्वरोऽभिधीयते तर्हि प्रधानं एके, परमाणूनपरे इत्यादिना जगत्कारणे विप्रतिपत्तिप्रदर्शनं तवानुपपन्नं स्यात। कुतः अनुपपन्नमिति चेत्। तत्र वक्तव्यम्। किं जगत्कारणादन्यत्वं ब्रह्मण उतानन्यत्वम्। नाऽद्यः। अन्यस्मिन् जिज्ञास्यमाने अन्यत्र विप्रतिपत्तिप्रदर्शनस्यायुक्तत्वात्। न द्वितीयः। ईश्वरः किं प्रधानम्, उत परमाणुरिति संशयप्रसङ्गात्। न तथा दृश्यते। प्रत्युत ईश्वरः कारणम्, उत प्रधानादिरिति संशयो न स्यात्। जगत्कारणस्येश्वरेऽन्तर्भूतत्वात्। **मत्पक्षे** यथा तथा अस्तु त्वत्पक्षे उक्तदोषस्य कथं उद्धारः इति चेत्। अस्मत्पक्षे तु

बृहतेर्धातोरर्थानुगमात्। सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्वो ह्यात्माऽस्तित्वं प्रत्येति न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्

---

धर्मजातं निर्दिश्यते। एवं विशिष्टब्रह्मप्रसिद्धिः न जिज्ञासाप्रतिबन्धिका, तस्या निर्विशेषब्रह्मविषयकत्वाभावात्। ब्रह्मपदावयवव्युत्पत्त्यापि उक्तविशिष्टं ब्रह्म प्रसिद्धमित्याह—बृहतेरिति। बृहि बृंहि वृद्धाविति धात्वर्थपर्यालोचनयापि निरतिशयं महद्वस्तु प्रसिद्धमस्तीत्यन्वयः। प्रकारान्तरेणापि ब्रह्म प्रसिद्धमस्तीत्याह—सर्वस्येति।

"यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य संततो भावस्तस्मादात्मेति कथ्यते॥"

इति भावः। विवेकिनां प्रसिद्धत्वेऽपि न सर्वेषां इत्यत आह-सर्वो हीति। अयमहमस्मीत्यात्मास्तित्वं प्रत्येत्येवेत्यर्थः। एवकारव्यावर्त्यमाह—न नाहमस्मीति। अस्मीति न प्रत्येति इति न। किन्तु प्रत्येत्येवेत्यर्थः। विपक्षे बाधकमाह—यदि हीति। सर्वस्यात्मास्तित्वप्रतीतिः यदि

---

युज्यते प्रत्यगात्मनः ब्रह्मशब्दाभिधेयविशेषस्वरूपस्य शरीरेन्द्रियादिषु संशयः। तेषां आत्मनि तादात्म्यावभासदर्शनात्।

किञ्च द्वितीयसूत्रमप्यस्मत्पक्ष एवोपपन्नतरं भवति। प्रत्यगात्मानमुद्दिश्य विशेषस्वरूपे ब्रह्मणि जिज्ञास्यमाने जगज्जन्मादिकारणं तद्ब्रह्मेत्युक्ते विधूतशरीरादिभेदः प्रत्यगात्मा जगत्कारणतया सर्वात्मभूतः प्रतिपादितो भवति। तव तु पक्षे जगत्कारणे विप्रतिपद्यमाने किं तज्जगत्कारणमिति वीक्षायां यद्ब्रह्म तज्जगत्कारणमिति ब्रह्मोद्देशेन जगत्कारणत्वं विधेयं स्यात्। न जगत्कारणमुद्दिश्य ब्रह्मविधानमिति वैपरीत्यमापद्येत। ब्रह्मशब्देन जगत्कारणमभिधीयत इति चेत्; न, अस्य जगतः जन्मादि यतो भवति तद्ब्रह्मेत्युक्ते जगत्कारणं जगत्कारणमिति लक्ष्यलक्षणयोरभेदप्रसङ्गात्। किञ्च तटस्थेश्वरे जगत्कारणत्वेन प्रतिपादिते पुरुषस्य किमायातम्। तदुपासनं फलमिति चेत्; आरोपितरूपेणाप्युपासनसम्भवात्। तस्मात्प्रत्यगात्मानमुद्दिश्य तस्य वेदान्तविहितब्रह्मशब्दाभिधेयबुभुत्सायां यज्जन्मादिकारणं सत्यज्ञानादिलक्षणं तत्प्रत्यगात्मभूतं ब्रह्मेति प्रतिपादयितुमात्मनि विप्रतिपत्तिप्रदर्शनं युक्तमिति शास्त्रार्थापरिज्ञानात् सर्वसङ्करवादिना यत्किञ्चिज्जल्पितमिति न किञ्चिदेतत्।

सर्वो लोको नाहमस्मीति प्रतीयात्। आत्मा च ब्रह्म। यदि तर्हि लोके ब्रह्माऽऽत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम्। न, तद्विशेषं प्रति विप्रतिपत्तेः। देहमात्रं चैतन्यविशिष्ट-

---

न स्यात् सर्वो लोकः नाहमस्मीति प्रतीयात्। आत्मनः प्रसिद्धत्वे ब्रह्मणः किमायातमित्यत आह—आत्मा चेति। ब्रह्मपदप्रवृत्तिनिमित्तस्य व्यापकत्वादिरूपधर्मस्य लक्षणस्य एकरूपत्वाल्लक्ष्यैकत्वादिति भावः। नित्यत्वादिधर्मकं ब्रह्म आत्मत्वेन प्रसिद्धमस्तीत्युक्तमनूद्य शङ्कते—यदि तर्हीति। विशिष्टप्रसिद्धेः जिज्ञासाप्रतिबन्धकत्वादिति भावः। षड्विधतात्पर्यलिङ्गैः तात्पर्यनिर्णयपूर्वकं शाब्दसाक्षात्कारस्यैव जिज्ञासाप्रतिबन्धकत्वात् ततः प्राक्तनप्रसिद्धेर्विप्रतिपत्तिग्रस्तत्वेन विषयतया जिज्ञासोत्पादकज्ञानात्मकत्वमेवेत्यभिप्रेत्य पूर्वपक्षं निषेधति—नेति। उक्तयुक्त्या यदजिज्ञास्यत्वमुक्तं तन्नेति संबन्धः। तत्र हेतुः तद्विशेषमिति। विप्रतिपन्नानां मतानि क्रमेण दर्शयति—देहमात्रमित्यादिना। मृतदेहवारणाय चैतन्येति। स वा एष पुरुषोऽन्नरसमयः इत्यादिश्रुतेः। गृहदाहे सति

---

स्वपक्षं आह। आत्मा स भोक्तुरित्यपरे इति। कथं भोक्तुः सर्वज्ञः सर्वशक्तिरीश्वरः आत्मा विरुद्धस्वभावत्वादिति चेत्; न, यथा सत्यज्ञानानन्दं निरवयवं ब्रह्म श्रुत्यवगतम् तथा प्रत्यगात्मापि सत्यज्ञानानन्दस्वरूपः निरवयवोऽवगतः। असत्वे बाधप्रसङ्गात्। अनानन्दत्वे परमप्रेमास्पदत्वाभावप्रसङ्गात्। सावयवत्वे अनित्यत्वकृतहानादिप्रसङ्गात्। तथा च जीवः ब्रह्माभिन्नः ब्रह्मणा समानस्वभावत्वे सति निरवयवत्वात् यत् यत्समानस्वभावत्वे सति निरवयवं तत्तदभिन्नं यथा घटाकाशं महाकाशाभिन्नमित्यनुमानादभेदसिद्धेः। निरवयवत्वस्य रूपादौ व्यभिचारः, तदर्थं विशेषणम्। न चाऽभेदे विरुद्धधर्मानुपपत्तिः उपाधिवशादेव प्रतिबिम्बश्यामत्वादिव्यवस्थोपपत्तेः। कर्तृत्वभोक्तृत्वादेः अविद्याविलसितत्वात् परमार्थतो ब्रह्माभेदो न विरुध्यते। अत एव तस्य ब्रह्मशब्दाभिधेयत्वम्। अन्यथा जीवस्य ब्रह्मणोऽन्यत्वे तद्रूपविकल्पस्य ब्रह्मत्वं न स्यात्। एवं विप्रतिपत्तिदर्शनादन्त्यपक्षादन्येषां पक्षाणां युक्त्याभासवाक्याभासमूलत्वात्तत्पुरस्कारेणेतरपक्षप्रतिक्षेपाय वेदान्तविचार उपपद्यते।

नन्वस्यापि पक्षस्य युक्तिमूलत्वानुपपत्तिः। तथा हि—बृहत्यर्थान्वयाद्यदि जीवाभिन्नं ब्रह्म तर्हि तत एव सर्वसंसार्यभिन्नमिति तदीयसर्वदुःखानुसन्धानप्रसङ्गः। तथा सुखदुःखतत्साधनप्रपञ्चोऽपि बृहत्यर्थान्वयादेव ब्रह्मेति पुरुषाणां न जिज्ञास्यं ब्रह्म स्यात्। न हि कतिपयसुखदुःख-

मात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मन इत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्तेत्येके। अस्ति तद्व्यतिरिक्तः ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्। आत्मा स भोक्तुरित्यपरे। एवं बहवो विप्रतिपन्ना

---

**पुत्रादिकमपि परित्यज्य स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहं इत्यनुभवाच्च देहमात्रमात्मेत्याहुः इत्यर्थः। एवं सर्वपक्षेषु यथासंभवं श्रुतियुक्त्यनुभवा द्रष्टव्याः। बौद्धैकदेशिनो मतमाह**—विज्ञानमात्रमिति। **माध्यमिकमतमाह**—शून्यमिति। **नैय्यायिकवैशेषिकादिमतं आह**—अस्ति देहादिति। **साङ्ख्ययोगयोः मतमाह**—भोक्तैवेति। **सेश्वरसाङ्ख्यमतं उपन्यस्यति।** अस्ति तद्व्यतिरिक्त इति। **एवमेव नैय्यायिकवैशेषिकमतेऽपि जीवातिरिक्तेश्वरास्तित्वं द्रष्टव्यम्। वेदान्तिनां मतमाह**—आत्मा स भोक्तुरिति। **सः नित्यशुद्धबुद्धमुक्तस्वभावः परमेश्वरः भोक्तुः जीवस्याऽहङ्कारोपाधिकस्य आत्मा स्वरूपमित्यर्थः। ननु सर्वेऽपि प्रेक्षावन्तः शास्त्रकृतः श्रुतियुक्त्यनुभवपूर्वकमेव शास्त्राणि कुर्वते। तथा च शास्त्रकृत्सु को विशेष इत्यतो विशेषमाह**—एवमिति। विप्रतिपन्ना इति।

---

तत्साधनसंसर्गमसहमानतया संसारात्विरक्तो निखिलदुःखादिमत्तामङ्गीकुर्यात्। ननु निरतिशयज्ञानानन्दस्वरूपतया जिज्ञास्यमेव किं न स्यादिति चेत्, क्षुन्निवृत्तिसाधनतया पुरुषार्थेऽपि विषमिश्रितान्नभोजने अनर्थहेतुत्वेन प्रेक्षापूर्वकारिणामुपेक्षादर्शनात्।

ननु ब्रह्मणः सर्वोपादानतया दुःखाद्यात्मत्वेऽपि दुःखादिभोक्तृत्वं न भवतीति चेत्। किं श्रुतिवशान्नास्तीत्युच्यते। उताऽज्ञानमिथ्याज्ञानाद्यभावात्। उत कर्माभावात्। आहो स्वित्तत्वज्ञानेन बाधितत्वादिति? नाद्यः। आत्मैवेदं इत्यादिसर्वतादात्म्यश्रुतेः, उपादानत्वाच्च। सर्वदुःखापरोक्ष्यात् तद्भोक्तृत्वस्याऽपि प्रसङ्गात्। न द्वितीयः। तत्वत एव दुःखादितादात्म्यादज्ञानाद्यनपेक्षणात्। न तृतीयः। कर्मव्यतिरेकेणापि स्वभावादेवाखिलसुखदुःखतत्साधनानां स्वान्वयितया ब्रह्मणोऽपरोक्षत्वात्! न हि दुःखाद्यापरोक्ष्यव्यतिरेकेण संसारोऽन्यो दृश्यते। किञ्च कर्माविद्यादीनामपि बृहत्यर्थान्वयादेव ब्रह्मणि तादात्म्यान्वयात् तन्निमित्तोऽपि संसारः

युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत्किञ्चित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येत, अनर्थं चेयात्। तस्मात् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते।

---

विरुद्धार्थं प्रतिपन्नाः। कथं इत्यत आह—युक्तिवाक्यतदाभासेति। सिद्धान्तिनो युक्तिवाक्याश्रिताः अन्ये तदाभासाश्रिताः दृश्यन्त इत्यतो विचार आरम्भणीय इत्यर्थः। विचाराभावे को दोष इत्यत आह—तत्रेति। निश्श्रेयसादिति।

"योऽन्यथासन्तमात्मानं अन्यथा प्रतिपद्यते।
किन्तेन न कृतं पापं चोरेणाऽऽत्मापहारिणा"॥

इति स्मृतेः। "इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः" इत्यादिश्रुतेश्च। निश्श्रेयसं न प्राप्नुयादित्यर्थः। अनर्थं चेति। "अन्धं तमः प्रविशन्ति"।

"असुर्या नाम ते लोकाः अन्धेन तमसाऽऽवृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः॥"

इत्यादि श्रुतिभ्यः अनर्थं च प्राप्नुयादित्यर्थः। प्रथमसूत्रतात्पर्यमुपसंहरति—तस्मादिति। प्रस्तूयते आरभ्यते सूत्रकारेणेति शेषः। केत्याकाङ्क्षायामाह—वेदान्तवाक्येति। वेदान्तवाक्यविषयकमीमांसा सूक्ष्मार्थनिर्णयहेतुविचार इत्यर्थः। तदविरोधीति। वेदान्ताविरोधितर्केणोपकृता। निश्श्रेयसेति। ज्ञानोत्पादनद्वारा मोक्षफलकेत्यर्थः। ब्रह्मजिज्ञासोपन्यासमुखेनेति। ब्रह्मणः अकर्तव्यत्वाज्जिज्ञासायाः अपि प्रकृत्यर्थस्य प्रत्ययार्थस्य वा कर्तव्यत्वासंभवेन ब्रह्मजिज्ञासोक्तिद्वारा ताभ्यां लक्षिता मीमांसाऽऽरभ्यत इत्यर्थः। इदं च सूत्रं अध्ययनविधिवच्छास्त्रान्तर्गतमेव शास्त्रारम्भकं द्रष्टव्यम्।

चतुर्थवर्णकम्॥

---

सुतरामुपपन्न इति। नाऽपि चतुर्थः। प्रपञ्चात्मभावस्यापि तात्विकत्वात्। तत्वज्ञानेन बाधानुपपत्तेः। न च तात्विकत्वमसिद्धम्। सर्वकर्मा सर्वकाम इत्यादिवाक्यात् तत्सिद्धेः। अतो न ब्रह्मत्यर्थान्वयात् सर्वात्मकं ब्रह्म जिज्ञास्यम्, अपुरुषार्थत्वप्रसङ्गादिति। उच्यते। सत्यपि

सर्वस्यापरोक्षतया ब्रह्मसम्बन्धे मायानिमित्तनिकृष्टधर्मत्वात्सुखदुःखादीनां प्रतिबिम्बगतश्यामत्वादिवत् प्रतिबिम्बभूतजीवसम्बन्ध एव। न बिम्बभूतब्रह्मसम्बन्धः इति न कश्चिद्दोषः। न च मायानिमित्तत्वं असिद्धम्। सृष्टिवाक्यावगतसार्वात्म्यस्य श्रुतिगम्यत्वेन पारमार्थिकत्वादिति चेत्; सृष्टिवाक्यानां निष्प्रपञ्चश्रुतिविरोधेनाऽतत्परत्वात्। न च वैपरीत्यं शङ्क्यम्। निर्विशेषवाक्यानां अनन्यपरत्वस्य तत्र तत्र प्रतिपादितत्वादिति।

ननु चार्वाकाद्यभिमतार्थप्रतिपादकान्यपि वाक्यानि त्वदभिमतवेदान्तेषु दृश्यन्ते। तेषां का गतिः? तथा हि—स वा एष पुरुषोऽन्नरसमयः स वा अयमात्मा ब्रह्म पृथिवीमयः आपोमयस्तेजमयो वायुमय इति देहात्मवादे वाक्यम्। तेह वाचमूचुः, तेभ्यो वागुदगायदितीन्द्रियात्मवादे, मन उदागायत् इति मनोवादे, कतम आत्मेति योयं विज्ञानमय इत्यादि विज्ञानवादे, असदेवेदमग्र आसीदिति शून्यवादे, अनुमन्ता बोद्धेति विज्ञानात्मेति कर्त्रात्मवादे, तयोरन्यः पिप्पलं कर्मफलं स्वाद्वत्तीत्यस्य पुरुषविषयत्वात्। अनश्नन्नन्यो अभिचाकशीतीति चिद्रूपत्वलक्षणभोक्त्रात्मवादे, आत्मनि तिष्ठन् आत्मानमन्तरो यमयतीति व्यतिरिक्तेश्वरवादे। एवं सर्वपक्षेष्युपष्टम्भकवाक्यानां विद्यमानत्वात् त्वत्पक्षस्य कथं निर्णय इति चेत्।

न, सवा इत्यादिवाक्यस्य स्थूलारुन्धतीन्यायेन सर्वान्तरब्रह्मप्रतिपत्तिपरत्वेन अतत्परत्वात्। वागुदगायन्मन उदगायदित्यादेरभिमानिदेवतापरत्वात्। विज्ञानमय इत्यस्य करणव्युत्पत्त्याऽन्तःकरणावच्छिन्नानुवादेन तन्निर्विशेषब्रह्मप्रतिपत्तिपरत्वात् क्षणिकविज्ञानपरत्वाभावात्। अन्यथा नहि द्रष्टुर्दृष्टेरिति वाक्यविरोधात्। असदेवेदं अग्रआसीदित्यस्याऽनभिव्यक्तनामरूपपरत्वात् न निरुपाख्यपरत्वम्। तत् सदासीदित्युत्तरवाक्यविरोधात्। अनुमन्तेत्यत्र किं पारमार्थिकं कर्तृत्वमुच्यते। उत काल्पनिकम्? नाऽद्यः, मुक्त्यभावप्रसङ्गात्। द्वितीयस्त्वङ्गीक्रियत एव। अनश्नन्निति किं परमार्थः कर्तृत्वाभावः उच्यते, तदा सिद्धसाध्यता। आरोपितकर्तृत्वाभावे अन्यस्य बन्धो अन्यस्य मुक्तिः इति वैय्यधिकरण्यं स्यात्। न च बुद्धिगतावेव बन्धमोक्षौ। आत्मनि बन्धादिप्रतिपादकश्रुतिविरोधात्। य आत्मनि तिष्ठन्नित्यस्य औपाधिकभेदविषयत्वेनोपपत्तिरिति सर्ववाक्यानां अस्मत्पक्षानुगुण्यमेवेति न किंचिदेतत्। एवं विषयप्रयोजनसंबन्धसिद्धिमभिप्रेत्य ब्रह्मजिज्ञासोपन्यासमुखेनाऽन्तर्णीतविचारकर्तव्यतापरं सूत्रं—**अथातोब्रह्मजिज्ञासेति**। अथवा जिज्ञासापदात् ज्ञानस्येष्यमाणतया साध्यत्वात् कर्तव्यत्वावगमे तदुपायतया विचारस्य कर्तव्यत्वं प्राप्तमेवेति दर्शयति। न च विचारस्य प्रयोजनाभावः। निश्श्रेयसप्रयोजनोपपत्तेः। ननु किं विचारस्य साक्षात् प्रयोजनं निश्श्रेयसम्, उत परंपरया?

नाऽद्यः। ब्रह्मज्ञानस्यैव तत्साध्यत्वात्। न च ज्ञानजन्यत्वान्निश्रेयसस्य परंपरया तत्फलत्वमिति वाच्यम्। निश्श्रेयसस्वरूपानिरुक्तेः। कर्तृत्वभोक्तृत्वदोषसंयोगाध्यासोपादानाज्ञाननिवृत्तिः निश्श्रेयसमिति चेत्; न, निवृत्तेऽप्यज्ञाने द्वन्द्वदर्शनापातात्। न हि पृथिव्यादिप्रपञ्चः कर्त्रादिनिवृत्तिमात्रान्निवर्तते। तथात्वे एकमुक्तौ सर्वमुक्तिप्रसङ्गात् इति चेन्न। सत्स्वपि पृथिव्यादिष्वन्तः करणाध्यासनिवृत्तौ प्रमातृत्वाभावादात्मचैतन्यस्य स्वतो विषयोपरागाभावात् द्वैतदर्शनं न प्राप्नोति। निरिन्द्रियस्यैव रूपादिदर्शनमित्येकः पक्षः समन्वयसूत्रे वक्ष्यते। तस्मान्निरस्तसकलकर्तृत्वाद्यध्यासं अपाकृतद्वैतदर्शनं निरतिशयानन्दप्रकाशमानब्रह्मस्वरूपावस्थानं निश्श्रेयसं वेदान्तविचारस्य प्रयोजनमिति तदर्थिना स कर्तव्यः इति **प्रथमसूत्रार्थवर्णनं** सिद्धम्।

---

# २ जन्माद्यधिकरणम्

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान्सूत्रकारः

---

॥ अथ चतुर्थवर्णकम् ॥

वृत्तवर्तिष्यमाणयोः सङ्गतिं वक्तुं वृत्तं कीर्तयति—ब्रह्मेति। साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय विचारः कर्तव्यःइत्युक्तमित्यभिप्रायः। ब्रह्मणः विचार्यत्वोक्त्या अर्थाद्ब्रह्माश्रितलक्षणादेरपि विचार्यत्वं प्रतिज्ञातम्। तत्र तावद्ब्रह्मणो लक्षणमादौ सूत्रयितव्यं लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायात्। तत्र लक्षणाद्विविक्ततया लक्ष्यस्वरूपं ज्ञातं चेल्लक्षणनिर्वचनप्रयासोऽत्यन्तव्यर्थः स्यात्। अथाज्ञातमिति चेत् सुतरां लक्षणनिर्वचनानुपपत्तिः। न च लक्षणेनैव लक्ष्यस्वरूपं ज्ञातव्यमिति वाच्यम्। ज्ञाते लक्ष्ये लक्षणनिरुक्तिः लक्षणनिरुक्तौ लक्ष्यज्ञानमित्यन्योन्याश्रयात्। तस्मादार्थिकलक्षणविचारस्यासंभवात् प्रधानब्रह्मविचारोऽपि न सम्भवतीत्याक्षिपति—किं लक्षणमिति। किमपि लक्षणं ब्रह्मणो निर्वक्तुमशक्यम। अतो ब्रह्म न जिज्ञास्यं इत्याक्षेपाभिप्रायः आक्षेपमनूद्य सूत्रमुत्तरत्वेनादत्ते—इत्यत इति। अथवा ब्रह्मणः जिज्ञास्यत्वं श्रुत्वा शिष्यः तल्लक्षणजिज्ञासामन्तरेण ब्रह्मजिज्ञासानुपपत्तेः तल्लक्षणजिज्ञासुः पृच्छति—किं लक्षणमिति। आक्षेपपक्षे पूर्वाधिकरणसिद्धान्ते आक्षिप्ते तत्परिहारायोत्तराधिकरणप्रवृत्तेः आक्षेपिकी सङ्गतिः। प्रश्नपक्षे तु शिष्यजिज्ञासायां सत्यां लक्षणनिरूपणस्य प्रसक्तत्वात्प्रसङ्ग एव सङ्गतिरिति द्रष्टव्यम्। आक्षेपपक्षे पुनश्शब्दः लक्षणनिरूपणस्य असम्भवद्योतनार्थः। प्रश्नपक्षे तु लक्ष्यविशेषज्ञानाय लक्षणनिरूपणस्य आवश्यकत्वद्योतनार्थः। श्रुत्यादिसङ्गतयस्तु श्रुतिप्रतिपाद्यब्रह्मैकविषयकत्वाद्यथासम्भवमूह्यम्। पक्षद्वयेऽपि श्रुतिसूत्रस्थब्रह्मपदेनाऽऽपाततो लक्ष्यस्वरूपं ज्ञातमेव। तज्ज्ञानं च न पुरुषार्थपर्यवसायीति लक्षणेन निष्प्रपञ्चनित्यशुद्धबुद्धपरमानन्दस्वरूपं विजिज्ञापयिषुर्भगवान् सूत्रकार इति सूत्रकारं पूजयन्सूत्रमवतारयति भगवान्भाष्यकारः——इत्यत इति। जन्माद्यस्य यत इति। लक्षणनिर्णायकमितीदं सूत्रम्। अत्र

विषयो विशयश्चैव पूर्वपक्षः तथोत्तरः।
प्रयोजनं च पञ्चैते प्राञ्चोऽधिकरणं विदुः॥

# जन्माद्यस्य यतः ॥ २ ॥

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्मस्थिति-

---

इत्युक्त्यास्य सूत्रस्य यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत्प्रयन्त्य भिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति वाक्यं विषयः। किमिदं वाक्यं ब्रह्म लक्षयति किं वा ततोऽर्थान्तरं यत्किञ्चिदिति। यतः तदिति सामान्यवाचिभ्यां यत्तच्छब्दाभ्यां सामान्यं एकं कारणं लक्ष्यते। तत्प्रधानं अन्यद्वा भविष्यतीति पूर्वपक्षे प्राप्ते इदं वाक्यं ब्रह्मैव लक्षयति उपक्रमादिलिङ्गैः। तथाहि—

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥"

इति वचनादस्य ब्रह्मलक्षणत्वे उपक्रमादिलिङ्गानि सन्ति। उपक्रमे अधीहि भगवो ब्रह्मेति। उपसंहारे आनन्दो ब्रह्मेति उपक्रमोपसंहारयोः ऐकरूप्यमेकं लिङ्गम्। अभ्यासश्च ब्रह्म-शब्दस्यैव दृश्यते अन्नं ब्रह्मेति प्राणो ब्रह्मेत्यादिषु। प्रमाणान्तरागम्यत्वेनाऽपूर्वता। फलं य एवं वेद प्रतितिष्ठति इति। महान्भवति इत्यादिरर्थवादः। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इत्याद्युपपत्तिश्च। एवं षड्विधलिङ्गैः वाक्यस्य ब्रह्मलक्षणत्वमवगम्यते। नार्था-न्तरलक्षकत्वमिति अभिप्रेत्य सूत्रं व्याचष्टे—जन्मोत्पत्तिरिति। जन्मादि अस्य यत इति पदच्छेद-मभिप्रेत्य जन्मादिशब्दस्य विवक्षितं समासमाह—जन्मोत्पत्तिरादिः इति। जन्म आद्यस्य यत इति पदच्छेदं कृत्वा आद्यस्य हिरण्यगर्भस्य यतः जन्म भवति तद्ब्रह्मेति केचिद्व्याच-क्षते। तन्मते हिरण्यगर्भद्वारा जगन्निमित्तकारणत्वमेव ब्रह्मणः सिध्यति। नाऽभिन्न-निमित्तोपादानत्वमिति तन्मतमुपेक्ष्य जन्मादीति पदच्छेदं कृत्वा भाष्यकारो व्याचष्टे इति द्रष्टव्यम्। अत्र चित्रगुः इत्यादिवत् अतद्गुणसंविज्ञानाश्रयणे स्थितिभङ्गस्यैवाऽन्यपदार्थ-तया प्राधान्याज्जगत्स्थितिभङ्गकारणत्वमेव ब्रह्मणः लक्षणमुक्तं स्यात्। न जन्मकारणत्व-मिति ब्रह्मणो जगदुपादानत्वं न सिद्ध्येदित्यत आह—तद्गुणेति। तस्य बहुव्रीह्यर्थस्य प्रधानस्य गुणत्वेन संविज्ञानं यस्मिन् समासे तथा। एवं विवक्षायां फलितमाह—जन्मस्थितिभङ्गमिति। नन्वस्यपदार्थस्य प्रधानस्य गुणत्वेन संविज्ञाने अन्यस्य प्रधा-नस्याऽभावे असंबन्धप्रलपितमेव वाक्यं स्यादिति चेत्। उच्यते। उक्तसमासाश्रयणे जन्मस्थितिभङ्गस्य विशेष्यस्य एकदेशो जन्म तदेव विशेषणम्। तथाचाऽजहल्लक्षणया

भङ्गं समासार्थः। जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत्, 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति. ३।१) इत्यस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि, जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसम्भवात्। अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादिधर्मसंबन्धार्था। यत इति कारणनिर्देशः। अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्व-

---

त्रित्वावच्छिन्नत्वेन विशेष्यं एकदेशत्वेन विशेषणं कृत्वा लम्बकर्णमानयेत्यादाविव समासाश्रयणे न कोऽपि दोष इत्यनवद्यम्। नन्वनादौ संसारे जन्मन एवादित्वं कुतो लभ्यते। तत्राह—जन्मनश्चेति। श्रुतिमुदाहरति—श्रुतिनिर्देश इति। तावच्छब्दः क्रमार्थः। द्वितीयमुदाहरति—वस्तुवृत्तमपीति। तदुपपादयति—जन्मनेति। अस्येत्यत्र विवक्षितं प्रकृत्यर्थमाह—प्रत्यक्षादिति। अनुमानादिकं आदिपदार्थः। धर्मिणः जगत इत्यर्थः। प्रत्ययार्थमाह—षष्ठीति। यत इत्यस्याऽनेकार्थसम्भवादभिमतमर्थमाह—यत इतीति। वाक्यार्थमाह—अस्येति। जगत इति। जगत्कारणस्य सर्वज्ञत्वादिलाभाय विशेषणान्याह—नामरूपाभ्यामित्यादिना। नामरूपाभ्यां इति इत्थंभावे तृतीया। नामरूपाद्यात्मना व्याकृतस्येत्यर्थः अनेन सर्वकरणकर्तुः सर्वज्ञत्वं सिद्धम्। अनेकजीवकर्तृकत्वव्युदासायाह—अनेकेति। परिदृश्यमानं इदं जगद्विचित्रवदनेककर्तृकं विचित्रकार्यत्वाद्विचित्रप्रासादादिवत् इत्यनुमाने दृष्टकर्तृकत्वं उपाधिरित्येककर्तृकत्वं सिध्यतीति भावः। जीवानान्तु कार्योपाधिकृतभेदानां कार्यकोटिप्रविष्टत्वात् न कारणत्वमिति भावः। स्वभाववादनिरासायाह—प्रतिनियतेति। नियतदेशो मेरुपृष्ठादिः। नियतकालः शरीरपतनाद्यूर्ध्वकालादिः। नियतनिमित्तमुत्तरायणमरणादि। प्रतिनियतानि प्रतिविषयं व्यवस्थितानि। येषां क्रियाफलानां तानि तथा। तेषां आश्रयस्य सर्वशक्तित्वसंभवनायाह–मनसेति। एवं विशिष्टस्य जगतो यतो जन्मस्थितिभङ्गं भवति। तत्सर्वज्ञमेकं सर्वशक्तिसमन्वितम्। ब्रह्मेति वाक्यशेषं पूरयित्वा सूत्रतात्पर्यमाह

शक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः। अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम्। यास्कपरिपठितानां तु जायते अस्ति इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले संभाव्यमानत्वान्मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत, तन्मा शङ्कीति योत्पत्तिर्ब्रह्मणस्तत्रैव स्थितिः प्रलयश्च त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वान्यतः प्रधानादचेतनादणुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्। नच स्वभावतः, विशिष्टदेशकालनिमित्तानामिहोपादानात्।

एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते

---

—तद्ब्रह्मेति। अनेन जगज्जन्मादिकारणत्वं लक्षणमुक्तं भवति। ननु जिज्ञास्यस्य ब्रह्मणो निर्विशेषत्वात् कथं इत्थं लक्षणनिर्वचनमिति चेदुच्यते। नहि वयं लक्ष्येतरासमवेतत्वे सति लक्ष्यमात्रसमवेतो धर्मो लक्षणमित्यभिप्रायेण ब्रह्मणो लक्षणं ब्रूमः। किन्तु उक्तविशेषणविशिष्टस्य जगतोऽन्यतः जन्मादेरसंभवात् जगज्जन्मादिना अधिष्ठानमेकं सकलजगदवभासकवस्तु तात्स्थ्येन लक्ष्यत इति न कोऽपि दोषः। षड्भावविकारवादमाशङ्क्य परिहरति—अन्येषामिति। जायते अस्ति वर्धते परिणमते अपक्षीयते नश्यति इति षड्भावविकाराः प्रसिद्धाः। तेषां जन्मस्थितिलयेष्वन्तर्भाव इति पृथक् न गृहीतमिति भावः। ननु यास्काचार्यपठितवाक्यमेवाऽस्य सूत्रस्य विषयोऽस्तु। तथाच जन्मादीत्यादिपदेन षड्भावविकाराणां ग्रहणं स्यादिति शङ्कामनूद्य परिहरति—यास्केति। फलितमाह—योत्पत्तिरिति। अस्येत्यादिनोक्तं अर्थं व्यतिरेकमुखेन द्रढयति—न च यथोक्तेति। स्वभाववादं निरस्यति—न च स्वभावतः इति। तत्र हेतुमाह—विशिष्टेति। उक्तविशेषणविशिष्टमिदं जगन्नित्यम्। सर्वज्ञसर्वशक्तिमज्जन्यं संसार्यजन्यत्वे सति जन्यत्वाद्व्यतिरेकेण घटादिवत् इत्यनुमानेनेश्वरास्तित्वं साधयतां मतमनुवदति—एतदेवेति। वेदेन उक्तलक्षणमेव मन्यन्त इत्यभिमानमात्रं कुर्वन्ति। नाऽनुमानेनेष्टसिद्धिरिति भावः।

ईश्वरकारणिनः। ननु इहापि तदेवोपन्यस्तं जन्मादिसूत्रे। न। वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम्। वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः नानुमानादिप्रमाणान्तरनिर्वृत्ता। सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्या-

---

मदुक्तं अनुमानमेव सूत्रकारेणाप्युक्तमिति शङ्कते—नन्विहाऽपीति। इहाऽपि जन्मादिसूत्रे। तदेव मदुक्तमनुमानमेव तात्पर्येणोपन्यस्तमित्यर्थः। पूर्वपक्षं निरस्यति—नेति। तत्र हेतुः—वेदान्तेति। तदुपपादयति—वेदान्तवाक्यानि हीति। विचारफलमाह—वाक्यार्थेति। वाक्यार्थस्य विचारणं तात्पर्यपरीक्षा तया अध्यवसानं तात्पर्यनिर्णयः। तेन निर्वृत्ता सम्यक्संपन्ना ब्रह्मावगतिः ब्रह्मसाक्षात्कारः। अतो ब्रह्मसाक्षात्काराय वेदान्तवाक्यान्येव विचार्यन्त इत्यन्वयः। पक्षान्तरं प्रतिक्षिपति—नानुमानादीति। अनुमानादेः परोक्षज्ञानफलकत्वादिति भावः। न च शब्दमानस्यापि परोक्षज्ञानजनकत्वं नियतमिति वाच्यम्। दशमस्त्वमसीत्यादौ शब्दादपरोक्षज्ञानस्य दृष्टत्वात् परोक्षत्वापरोक्षत्वयोः विषयतन्त्रत्वात् "यत् साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तर" इति श्रुतेः। अवस्थात्रयसाक्षित्वेन च ब्रह्मणो नित्यापरोक्षत्वात्। आत्मत्वाच्च शोधिततत्त्वंपदार्थतत्वमादिवाक्याज्जायमानं अपरोक्षज्ञानमेव वस्तुस्वाभाव्यात्। एवं सति शब्दत्वेन परोक्षज्ञानत्वेन करणफलभावं कल्पयित्वा दशमस्त्वं तत्वमित्यादिवाक्यादपि जायमानं ज्ञानमादौ परोक्षमेव जायते। पश्चाद्भावनादार्ढ्यादपरोक्षमिति वदन्ति। ते प्रष्टव्याः किन्तत्र कारणमिति। भावनाया श्चित्तैकाग्रतारूपायाः कारणत्वानुपपत्तेः कस्यचित्करणस्याऽनुग्राहकतयाऽपेक्षितत्वेऽपि वाक्यादन्यस्य करणस्याभावात् भावनानुगृहीतं वाक्यमेव करणं अङ्गीकर्तव्यम्। किञ्च भावना नाम विजातीयप्रत्ययतिरस्कारेण सजातीयप्रवाहरूपनिदिध्यासनमिति वर्णयन्ति। सा च केनचित्कारणेन साक्षात्कृते विषये न संभवतीत्यन्यथानुपपत्त्या वाक्यमेव करणं स्वीकर्तव्यम्। यद्यपि दशमस्त्वमसीत्यत्र वाक्यसहकृतमिन्द्रियमेव करणमिति शक्यं वक्तुम्। तथाऽपि निमीलिताक्षस्य अन्धस्य वापि वाक्यादेव दशमोऽहं दशमं साक्षात्करोमीत्यनुभवदर्शनात्। तस्माद्विषयापरोक्ष्ये सति शब्दादप्यपरोक्षज्ञानमेव सिध्यतीति दिक्। तर्हि अनुमानं मानमेव न भवति, किन्तेनेत्याह—सत्सु त्विति। ननु प्रमाण-

विरोधि प्रमाणं भवन्न निवार्यते, श्रुत्यैव च साह्यत्वेन तर्कस्याभ्युपेतत्वात्। तथाहि—'श्रोतव्यो मन्तव्यः' (बृह० २।४।५) इति श्रुतिः 'पण्डितो

---

भूतवेदान्तेभ्य एव साक्षात्कारसम्भवात् किमनुमानेनेत्यत आह—श्रुत्यैव चेति। श्रुतिमुदाहरति—श्रोतव्य इत्यादिना। आत्मनः स्वस्याः श्रुतेरित्यर्थः। अत्र 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः निदिध्यासितव्य इति वाक्ये द्रष्टव्य' इत्यर्हार्थे तव्यप्रत्ययः। तस्य प्रमाणवस्तुपरतन्त्रस्याऽविधेयत्वात् दर्शनं साध्यं तत्साधनं विधीयते—श्रोतव्य इति। आत्मेति विषयत्वमात्मनो दर्शयति। तथा चात्मनि विषये वेदान्तानां तात्पर्यनिर्णयहेतुः विचारः विधीयते। तत्र केचिन्मनननिदिध्यासनोपकृतं श्रवणं अङ्गं विधीयत इति वदन्ति। मननेनाऽसम्भावनानिवृत्तिर्निदिध्यासनेन विपरीतभावनानिवृत्तिः प्रयोजनं भवति। तथा च मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सहकृतं श्रवणं अङ्गी विधीयते इत्याहुः। पूर्वत्र विचारसमकालमेव प्रयाजादिवदङ्गत्वम्, इदानीं तु श्रवणस्य प्रधानस्याऽनुष्ठानानन्तरं फलप्राप्तिप्रतिबन्धकासम्भावनाविपरीतभावनानिवर्तकतया मनननिदिध्यासनयोरुपकार्यत्वमिति विशेषो द्रष्टव्यः। वस्तुतस्तु यस्य श्रवणेनैव साधनपौष्कल्यात्साक्षात्कारः तस्य प्रतिबन्धाभावात् मनननिदिध्यासनयोः आनर्थक्यम्। यस्य तु श्रवणानन्तरं असंभावनादिना साक्षात्कारप्रतिबन्धो भवति तस्य मननेनासंभावनाप्रतिबन्धनिवृत्तिः प्रयोजनं श्रूयते। निदिध्यासनेन विपरितभावनानिवृत्तिः।

केचित्तु असम्भावनाविपरीतभावनयोः निवृत्तिः मननेनैव क्रियते। निदिध्यासनशब्देन पूर्वोक्तदर्शनरूपं फलीभूतं ज्ञानं पुनरनूद्यते श्रवणस्य फलायोगव्यवच्छेदायेत्याहुः। सर्वेष्वपि पक्षेषु विचारितवेदान्तवाक्येभ्य एव साक्षात्कारसिद्धिः इत्यनवद्यम्।

ननु यथा धर्मजिज्ञासया धर्मनिर्णये कर्तव्ये श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यादिषट्प्रमाणानि लिङ्लोट्तव्यप्रत्ययान्तानि वाक्यानि स्वतः प्रमाणानि। तेषां निर्णये सत्येव लिङ्गादीनां उपकारकतयाऽपेक्षितत्वात् प्रमाणा[न्युच्यन्ते]? यन्ते। श्रुत्या बोधितेऽर्थे संशये सति विशिष्य निर्णायकासाधारणधर्मो लिङ्गं श्रौतमेव। तद्यथा दर्शपूर्णमासयोराग्नेयादीनां षण्णां यागानां प्रधानत्वाङ्गत्वसंशये स्वर्गादिफलश्रवणं प्रधानत्वे लिङ्गम्। उपक्रमे वाक्यार्थसन्देहे येन वाक्यशेषेणार्थनिर्णयः जायते तद्वाक्यं—यथा 'शर्करा अक्ताः उपदधाति' इत्यत्र वाक्ये सेचनसाधनं किमिति सन्देहे 'तेजो वै घृतं' इति वाक्यं निर्णायकम्। प्रधानवाक्यमुपक्रम्य तत्र यत्पठितं तत्प्रकरणमुच्यते। यथा दर्शपूर्णमास-

मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषो वेद' (छान्दो० ६।१४।२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति। न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं, ब्रह्मजिज्ञासायाम्। किंतु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणं अनुभावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य। कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य। कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म, यथाश्वेन गच्छति, पद्भ्या मन्यथा वा, न वा गच्छतीति। तथा 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति', 'उदिते जुहोति, अनुदिते जुहोति, इति। विधिप्रतिषेधा-

---

प्रकरणपठितानि प्रयाजादीनि समिधो यजतीत्यादीनि। तदेव प्रयाजादीनां दर्शपूर्णमासाङ्गत्वे प्रमाणम्। क्रमपठितानां क्रमपठितैः अङ्गिभिः यथाक्रमं सम्बन्धः स्थानम्। यथा ऐन्द्राग्नादयः क्रमेण पठिता दश यागाः। तथा इन्द्राग्नी रोचनेत्यादयो दश मन्त्राः क्रमेण पठिताः तेषां मन्त्राणां दशसु यागेषु क्रमेण विनियोगः। स्थानं नामैकत्वम्। समाख्या यथा आध्वर्यवनामकानां मन्त्राणां आध्वर्यवनामके कर्मणि विनियोगः। एवं च लिङ्गाद्युपकृतश्रुत्यैव धर्मवत् ब्रह्मणोऽपि वेदार्थत्वाविशेषान्निर्णयसंभवे किं मननाद्यपेक्षयेत्यत आह—न चेति। ब्रह्मनिर्णये तु श्रुत्यादय एव प्रमाणम्। किन्तु ततोऽन्यदधिकं अपेक्ष्यत इत्याह—किन्त्विति। अनुभवोऽपि विद्वदनुभवः। आदिपदान्मननं निदिध्यासनं च। यत्किञ्चित्साक्षात्कारप्रतिबन्धनिवर्तकं सम्भावितं तत्सर्वमपेक्षितमित्यर्थः। इह ब्रह्मजिज्ञासायामित्यर्थः। तत्र हेतुमाह—अनुभवेति। विचारस्येति शेषः। वेदार्थविषयकत्वाद्ब्रह्मविचारस्यापि नानुभावावसानत्वमित्यतो विशेषमाह—भूतवस्त्विति। ब्रह्मविचाराद्धर्मविचारस्य वैलक्षण्यं स्वपक्षदार्ढ्याय सयुक्तिकं उपपादयति—कर्तव्ये हीति। तत्रैव युक्त्यन्तरमाह—पुरुषाधीनेति। उक्तमेवार्थं विशिष्योपपादयति—कर्तुमिति। लौकिकस्य कर्मणः पुरुषतन्त्रत्वं उदाहरणमुखेन स्पष्टयति—यथा अश्वेनेति। वैदिकस्यापि पुरुषतन्त्रत्वमुपपादयति—अतिरात्रेति। एतत्कर्तुं च शक्यमित्यस्य उदाहरणम्। अन्यथा कर्तुमित्यस्योदाहरणमाह—उदित इति। कर्मणः पुरुषतन्त्रत्वे हेतुमाह—विधि-

श्चात्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च। नतु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम्। किं तर्हि, वस्तुतन्त्रमेव तत्। नहि स्थाणावेकस्मिन्स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानं, वस्तुतन्त्रत्वात्। एवंभूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव, भूतवस्तुविषयत्वात्।

ननु भूतवस्तुत्वे ब्रह्मण प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणानर्थिकैव प्राप्ता। न। इन्द्रियाविषयत्वेन संबन्धाग्रहणात्।

---

प्रतिषेधाश्चेति। अन्यथा विध्यादिशास्त्रमनर्थकं स्यादिति भावः। व्रीहिभिः यवैः जुहुयादित्यादिविकल्पः। उत्सर्गः सामान्यतः प्राप्तिः यथा 'न हिंस्यात् सर्वा भूतानि' इति। सामान्यतः प्राप्तस्य विशेषेण बाधः अपवादः। यथा अग्नीषोमीयं पशुमालभेतेति। नैवं वेदान्तप्रतिपाद्यस्य कर्मवैलक्षण्यमाह—नत्विति। एवं नैवमिति प्रकारविकल्पः। अस्तिनास्तीति स्वरूपतदभावविषयको विकल्पः। ननु वस्तुन्यपि विकल्पो दृश्यते स्थाणुर्वा पुरुषो वेति तत्राह—विकल्पनास्त्विति। पुरुषबुद्धिव्यामोहकृता इत्यर्थः। अधिष्ठानयाथात्म्यज्ञानं न तथेत्याह—न वस्त्विति। यद्यपि पुरुषस्यैव वस्तुयाथात्म्यज्ञानं जायते। तथापि पुरुषेण कर्तुं अकर्तुं अशक्यत्वान्न पुरुषतन्त्रम्। पुनः यदधीनं जायत इति पृच्छति—किन्तर्हीति। उत्तरमाह—वस्त्विति। पुरुषतन्त्रं न तत्वज्ञानं, केवलप्रमाणवस्तुपरतन्त्रं इत्येतदुपपादयति—नहि स्थाणावेकस्मिन्निति। स्थाणुर्वा पुरुषो वेति ज्ञानमात्रस्य स्थाणुमात्रविषयत्वेन किमत्र मिथ्याज्ञानं किमत्र तत्वज्ञानमिति विशये तत्राह—तत्रेति। तत्वज्ञानांशमाह—स्थाणुरेवेति। तत्र हेतुः वस्त्विति। अनुभवसिद्धमर्थमन्यत्राप्युपदिशति—एवं भूतवस्त्विति। एवं सिद्धे फलितमाह—तत्रैवं सतीति। वेदान्तविषयस्य ब्रह्मणः सिद्धवस्तुत्वे शङ्कते—नन्विति। यत्सिद्धं वस्तु तत्प्रमाणान्तरगम्यमेवेति अपूर्वत्वाभावाद्वेदान्तवाक्यविचारो व्यर्थ एवेति भावः। अन्यत्र सिद्धवस्तुनः प्रमाणान्तरविषयत्वेऽपि वेदान्तवेद्यस्य ब्रह्मणो मानान्तरगम्यत्वमसिद्धमिति परिहरति—नेति। इन्द्रियासम्बन्धान्न

विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि। सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत। कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धं किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुम्। तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं, किं तर्हि वेदान्तवाक्यप्रदर्शनार्थम्। किं पुनस्तद्वेदान्तवाक्यं यत्सूत्रेणेह लिलक्षयिषितम्। 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति'

---

प्रत्यक्षविषयत्वम्। अत एव व्याप्तिग्रहाभावान्नानुमानविषयत्वमपीति भावः। इन्द्रियासम्बन्धमुपपादयति—स्वभावत इति। पराञ्चि खानि व्यतृणत्स्वयम्भूः तस्मात्पराङ् पश्यति नान्तरात्मन्नित्यादिश्रुतेरिति भावः। व्याप्तिग्रहाभावादनुमानगोचरमपि न सम्भवतीत्याह—सति हीति। ननु कार्येण लिङ्गेन सामान्यव्याप्त्या सर्वकारणं ब्रह्माऽवगन्तुं शक्यमित्यत आह—कार्यमात्रमेवेति। केनचिदिति। प्रधानादिना वेत्यर्थः। सामान्यव्याप्त्या कारणसामान्यमनिर्धारितविशेषं सिध्यति। विशेषसिद्धिस्तु श्रुत्यैवेति मन्वानस्सूत्रार्थमुपसंहरति। किमर्थं सूत्रमित्यत आह—किन्तर्हीति। सूत्रस्य विषयभूतं पृच्छति—किं पुनरिति। वाक्यमुदाहरति— भृगुर्वै इति। भृगुः वै वारुणिः इत्यारभ्य आनन्दं प्रयन्त्यभिसंविशन्तीत्येवमन्तमस्य सूत्रस्य विषयवाक्यमित्यर्थः। अन्यान्यप्येवंजातीयकानि एतत्समानार्थकानि जगत्कारणनित्यशुद्धबुद्धमुक्तस्वरूपप्रतिपादकानि वाक्यान्यस्य सूत्रस्य विषया इत्यर्थः।

ननु सूत्रेण लिलक्षयिषितं लक्षयितुमिष्टं इत्युक्तम्। तत्र सूत्रं लक्षणं वाक्यं लक्ष्यं तल्लक्ष्यं ब्रह्म। अथ सूत्रं लक्षणं ब्रह्मैव तल्लक्षणमिति यदि विवक्ष्येत तदा सूत्रेणैव ब्रह्मणो लक्षितत्वात् वेदान्तवाक्यं सूत्रेण लिलक्षयिषितमिति वाक्यमनुपपन्नं स्यात्। किञ्च ब्रह्मणो लक्षणं वदता लक्ष्येतरासमवेतलक्ष्यमात्रसमवेतो धर्मो लक्षणमिति वक्तव्यम्। तन्न संभवति। ब्रह्मणो निर्धर्मकत्वात्। 'अशब्दमस्पर्शमरूपमव्ययं' इत्यादिश्रुतेः। तस्माद्वाक्यं सूत्रं वा ब्रह्मलक्षणं भवितुं नाऽर्हतीति चेत्। अत्रोच्यते। यदुक्तं सूत्रस्यैव ब्रह्मलक्षकत्वमस्तु किमन्तर्भाविनेति। तत्र वदामः। वाक्यनिरपेक्षस्य सूत्रस्य लक्षकत्वे तस्य पौरुषेयत्वेनाऽप्रामाण्यशङ्काकलङ्कितत्वेनाऽबोधकत्वाल्लक्षणनिर्वचनप्रयासो व्यर्थः स्यात्। अतो वेदान्तवाक्यमेव लक्षणनिर्वचनरूपं वक्तव्यम्। तस्यापौरुषेयतयाऽप्रा-

इत्युपक्रम्याह—'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति' (तैत्ति० ३।१)। तस्य च निर्णयवाक्यम्—'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति' (तैत्ति० ३।६) अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि ॥ २ ॥

---

माण्यशङ्काकलङ्काभावात् ब्रह्म लक्षयितुं अर्हतीति सूत्रेण लिलक्षयिषितं वाक्यं इत्युक्तम्। ननु वाक्यस्यैव लक्षकत्वे तेनैव ब्रह्मणो लक्षितत्वेन सूत्रवैय्यर्थ्यं इति चेन्न। तस्य प्रमाणानुग्राहकत्वेन वाक्येन स्वार्थविबोधनेऽपेक्षितत्वान्न वैय्यर्थ्यम्। न च निर्धर्मकस्य ब्रह्मणो लक्षणं न सम्भवतीत्युक्तं इति वाच्यम्। लक्षणधर्मत्वाल्लक्षकत्वस्य, लक्ष्यं यदि स्वभावतो निर्धर्मकं तल्लक्षणं तदेव लक्षयति। यदि सधर्मकं लक्ष्यं तल्लक्षणं तदेव लक्षयति। सधर्मकत्वं लक्ष्यताप्रयोजकम्, निर्धर्मकत्वं अलक्ष्यताप्रयोजकमिति भ्रान्तिमात्रम्। यदि निर्धर्मकं वस्तु कल्पितधर्मवत्त्वेन लक्ष्यते तदा कल्पितधर्मांशे बाधितविषयत्वेन लक्षणवाक्यमप्रमाणं स्यात्। तस्माल्लक्ष्यतेऽनेनेति व्युत्पत्त्या येन यथावत्तया यत्स्वरूपं लक्ष्यते तत् तस्य लक्षणमिति परमार्थः। तथा च सूत्रानुगृहीतवाक्येनैवाध्यासिकसंबन्धेन लक्ष्यनिष्ठेनैव निर्विशेषं ब्रह्म लक्ष्यत इति उक्तवाक्यमेव लक्षणम्। अथ वा वाक्यावगतो लक्ष्यमात्रनिष्ठो धर्मः कश्चिल्लक्षणं वक्तव्यम्। स धर्मः क इति प्रश्ने निर्धर्मकत्वात् ब्रह्मणः जन्मस्थितिभङ्गधर्मकं जगदेव अनाद्यविद्यारोपितं यत्तदेव स्वाश्रयं लक्षयितुं अर्हति। तथा हि—यतो वा इमानि भूतानि जायन्त इति जगतो जायमानत्वम्। येन जातानि जीवन्तीति स्थितिमत्त्वं, यत्प्रयन्त्यभिसंविशन्तीति लयश्च। एवं विशिष्टं जगदन्यतो न सम्भवतीत्यतो जगदेव ब्रह्मणो लक्षणं वक्तुं युक्तम्। निर्विशेषं ब्रह्मैव लक्ष्यमिति वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदं असंसार्यात्मतत्वं हि जिज्ञास्यम्। तस्यैव लक्षणजिज्ञासया प्रवृत्तं लक्षणवाक्यं तदेव लक्षयति इति युक्ततमम्। अत एव जगदभिन्ननिमित्तोपादानत्वं लक्षणम्। न च चिद्रूपस्य ब्रह्मणः जडोपादानत्वमयुक्तमिति वाच्यम्। उपाधिप्राधान्येन तत्सम्भवादित्याहुः। तदप्यविद्याकल्पितं जगत्तुल्ययोगक्षेमतया जगन्मध्यपतितमेव। सर्वथाऽपि तु निर्विशेषं

ब्रह्मैव लक्ष्यमिति सिद्धम् । लक्ष्यस्वरूपलक्षणन्तु लक्ष्यस्वरूपमेव । तदाह श्रुतिः । आनन्दो ब्रह्मेति । तस्य जगदभिन्ननिमित्तोपादानत्वं साधयति श्रुतिः- आनन्दाद्ध्येव खल्विमानीति ।

इति पञ्चमवर्णकम् ।

---

जगज्जन्मस्थितिध्वंसा यतः सिद्ध्यन्ति कारणात् ।
तत्स्वरूपतटस्थाभ्यां लक्षणाभ्यां प्रदर्श्यते ॥

ब्रह्मज्ञानाय विचारः कर्तव्य इत्याद्यसूत्रे ब्रह्मस्वरूपतत्प्रमाणसाधनफलविचारः प्रतिज्ञातः । तत्रादौ किंलक्षणं तत् ब्रह्मेत्याकाङ्क्षायामाह भगवान् सूत्रकारः—

**जन्माद्यस्य यतः**

अत्र जन्म उत्पत्तिः आदिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । अतद्गुणसंविज्ञानत्वे जन्मनः ग्रहणं न स्यात् । तथा च तत्कारणं अन्यत्स्यादिति ब्रह्मणोऽद्वितीयत्वक्षतिः । जन्मस्थितिभङ्गं समासार्थः । तथा च समाहारस्यैकत्वान्नपुंसकलिङ्गैकवचनोपपत्तिः । अस्येत्यनेनाऽविशेषाद्बुद्धिस्थं सर्वं कार्यजातं गृह्यते । यत इति कारणनिर्देशः । तथा च यज्जगज्जन्मादिकारणं तद्ब्रह्मेति वाक्यशेषः । तेन न साकाङ्क्षत्वेनानर्थक्यम् ।

ननु जगज्जन्मादिकारणत्वं किं लक्षणत्वेनाऽभिमतं ? उपादानत्वम् , उत निमित्तत्वम् । आहो उभयम् ? न तावदुपादानत्वम् । निमित्तकारणस्य सर्वज्ञस्य भेदेनाऽवस्थानात् यतः सर्वज्ञात सर्वशक्तेः उत्पत्तिरिति भाष्यकारस्य व्यपदेशो न स्यात् । नाऽपि निमित्तत्वम् । जगदभिन्नस्योपादानकारणस्य भेदेनाऽवस्थानात ब्रह्मशब्दस्य वाक्यान्वयाभावप्रसङ्गात त्रिविधपरिच्छेदशून्यस्य तदर्थत्वात् । सत्यं ज्ञानमनन्तं इति स्वरूपलक्षणस्योभयत्रानुपपत्तिः । नाऽप्युभयकारणत्वम् । एकस्योभयकारणत्वे प्रमाणाभावात् । प्रत्युत लोके निमित्तोपादानयोः भेद एवोपलभ्यते । तद्दृष्टान्तेन जगन्निमित्तोपादानयोरपि भेद एव युक्तः । तथा च निमित्तोपादानत्वमेकस्याऽप्रसिद्धम् कथं ब्रह्मणो लक्षणम् । प्रसिद्धं हि लक्षणं लक्ष्यस्वरूपमवगमयति नाऽप्रसिद्धमिति ।

अत्रोच्यते । आनुमानिकमुभयकारणत्वं लक्षणम् । तथा हि—महाभूतानि सद्वस्तुप्रकृतिकानि । तत्स्वभावानुरक्तत्वे सति विकारत्वात् । मृदनुस्यूतघटादिवत् । न च द्रव्यत्वान्विते तत्प्रकृतिकत्वाभावाद्व्यभिचारः । तेषामपि प्रकृतिस्वभावत्वात् । ब्रह्मैव हि व्यक्तिविशेषानुस्यूतद्रव्यत्वादीत्युच्यते । अतः सर्वोपादानं एकं लाघवात् सिद्धम् । तस्यैव च निमित्तकारणत्वमनु-

मानादेव सिध्यति। तथा हि--इदं जगदभिन्ननिमित्तोपादानं प्रेक्षापूर्वजनितकार्यत्वात्। आत्मगत-सुखदुःखद्वेषादिवत्। न च घटादिष्वनैकान्तिकता। तत्राऽप्यभिन्ननिमित्तोपादानत्वकल्पनात्। न चादृष्टादिनिमित्तकारणभेदाद्व्यभिचारः। उपादानकर्त्रोरेवाभेदानुमानात्। तस्मादनुमानसिद्धं एकस्योभयकारणत्वम् तदैक्षत बहुस्यां प्रजायेयेति सृष्टिश्रुतिसिद्धं वा लक्षणम्।

ननु जगदुपादानत्वं जगदाकारेण परिणामः। स च तत्वतोऽन्यथाभावः। तथा च कार्यस्यापि सत्यत्वादद्वितीयत्वादिक्षतिरिति चेत्, न; शुक्तिरूप्यादिवज्जगतो ब्रह्मविवर्तत्वेनाप्युपपत्तेः। विवर्तो नामातत्वतोऽन्यथाभावः। स चाद्वैतादि न विहन्ति। किन्तु परिणामवादिना तत्र प्रमाणं वक्तव्यम्। ननु सृष्टिश्रुतयः प्रमाणं इति चेत्; न, ताः किं मुखतः प्रतिपादयन्ति उताऽर्थतः। नाऽद्यः। परिणामशब्दस्य सत्यशब्दस्य अश्रवणात्। स्वतः प्रामाण्यात् अर्थात्सत्यैव सृष्टिरिति चेन्न। मिथ्येदं रजतं इति मिथ्यात्वविशिष्टप्रमाणगम्येऽपि रजते सत्यत्वाभावात्।

ननु प्रमाणगम्यस्य स्वोपाधावभावव्यावृत्तिः वक्तव्या। अन्यथा बाधितार्थकत्वेनाप्रामाण्यादिति चेत्; न, प्रपञ्चो हि स्वोपाधौ न स्वरूपेण बाध्यते। अपि तु पारमार्थिकत्वेन। न च प्रपञ्चपारमार्थिकत्वं श्रुतेः विषयः। येनाप्रामाण्यं स्यात्। यथा घटः इत्युक्ते भावाभावयोः साधारणं प्रतीयते। तथा ब्रह्मणः प्रपञ्चापत्तिरपि स्वरूपेण प्रतीयते। न तु सत्यत्वेन मिथ्यात्वेन वा सृष्टिः। तद्भावशब्दमात्रादेव सत्यत्वे 'देवदत्तः व्याघ्रोऽभवत्' 'माया ह्येषा माया सृष्टा।' 'अथ रथान् रथयोगान् पथस्सृजत' इत्यादावपि स्वप्नरथादेः सत्यत्वप्रसङ्गात्। किञ्च फलस्याऽपि तात्पर्यलिङ्गत्वात् ब्रह्मणः प्रपञ्चापत्तेः निष्फलत्वात् दुःखतत्साधनादिरूपेण परिणामस्याऽनर्थहेतुत्वान्न तात्त्विकः परिणामः। न च कर्मकाण्डस्य प्रत्यक्षादेः वा सिद्धिः प्रपञ्चसत्यत्वे प्रयोजनम्। तेषां सृष्टिश्रुत्यवगमात् प्रागेवासिद्धत्वात्। न हि सृष्टिश्रुतेः प्रयोजनाभावादनुपयोग इति चेत्; न, प्रत्यक्षादिसिद्धस्य प्रपञ्चस्य ब्रह्मण्येवोत्पत्तिविनाशवत्तयाऽन्यत्राऽभाव उपवर्ण्यते। अत्राऽपि प्रतिषिद्धमिथ्यात्वापादनेन प्रमाणान्तराविरुद्धतया अद्वितीयब्रह्मसिद्धिः प्रयोजनं, तेनैकवाक्यत्वात्। अन्यथा शेषिविरोधात्।

तर्हि कारणस्य ब्रह्मणः सत्यत्वेऽपि कार्यमपि सत्यं स्यात्। न हि प्रयोजनक्षतिभयेन सामग्री कार्यं नार्जयतीति चेत्; नासदासीत्, तम आसीत्, आसीदिदं तमोभूतं, मायां तु प्रकृतिं विद्यादित्यादौ सदसद्विलक्षणानिर्वचनीयमायाप्रकृतित्वश्रवणात्। तदात्मकत्वाच्च विकारस्य

" तमो मोहो महामोहस्तामिस्रोऽप्यन्धसंज्ञितः।
अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः॥"

इति स्मृतौ तमोऽविद्यामायानां पर्यायत्वात् श्रुत्यवगतायां मिथ्यासृष्टौ सत्यत्वकल्पनायां श्रुतिबाधप्रसङ्गात् प्रपञ्चमिथ्यात्वसिद्धिः।

किं बहुना प्रत्यक्षमपि मिथ्यात्वे प्रमाणम्। तथा हि—इहेदानीं घटो नास्तीति प्रत्यक्षं अर्थे प्रतिपन्नस्य तत्रैव तन्निषेधमवगाहमानं मिथ्यात्वं गमयति। न चात्र देशकालयोः घटस्य निषेधः। अस्त्यर्थस्य वा घटे निषेध इति वाच्यम्। देशकालौ न स्त इत्यत्र देशकालान्तराभावादस्त्यर्थस्य सर्वत्राऽनुस्यूतत्वात्। तत्रैव देशाद्युपाधिभिः सहितघटादेः निषेध इति प्रतिपन्नोपाधावभावप्रतियोगित्वं मिथ्यात्वं प्रत्यक्षम्। अभावस्याऽनुपलब्धत्वात्तद्घटितं मिथ्यात्वं कथं प्रत्यक्षमिति चेत्; न, केवलाभावस्याऽनुपलब्धत्वेप्यभावविशिष्टाधिकरणज्ञानस्य सुरभि चन्दनमिति ज्ञानवत् साक्षिप्रत्यक्षत्वादिति न किञ्चिदेतत्।

अनुमानमपि मिथ्यात्वे प्रमाणम्। सर्वे विकाराः स्वानुस्यूते एकस्मिन्वस्तुनि परिकल्पिताः प्रत्येकमेकस्वभावानुरक्तत्वात्, विभक्तत्वात्, चन्द्रविशेषवत्। आद्यहेतौ वनस्वभावानुविद्धेष्वतत्प्रकृतिकेषु व्यभिचारः, तदर्थं प्रत्येकं इति। जडत्वात् कार्यत्वाद्भेदत्वात् रजतवच्चन्द्रभेदवच्च। प्रतिपन्नब्रह्मोपाधावस्थूलादिवाक्यैः प्रतिषिध्यमानत्वाद्देहात्मभाववत् विरोधकारणस्वभावानुपमर्देन विरोधिकार्योपपत्तिलक्षणत्वात् मायाविव्याघ्रवदित्यादि। प्रपञ्चस्य सत्वे असत्वे वा ब्रह्मवच्छून्यवच्च जन्मविनाशावनुपपन्नौ मिथ्यात्वं कल्पयतः इत्यर्थापत्तिरपि मिथ्यात्वे प्रमाणम्।

नन्वस्थूलादिवाक्यैः स्थूलादिभ्योऽन्यत्वमेवोच्यते। न स्थूलादिनिषेधः। तथा च कथं मिथ्यात्वसिद्धिरिति चेत्। कारणतादात्म्ये सति तादात्म्यनिषेधानुपपत्तेः। ननु शुक्लायां गवि शुक्लरूपान्यत्वविवक्षयाऽप्यशुक्लः गौरिति प्रतिषेधो दृश्यते। तथा प्रतिषेधे शुक्लतास्वरूपमात्रनिषेधदर्शनात्तर्काप्रतिष्ठानान्न मिथ्यात्वानुमानमिति चेत्; न, विचारशास्त्रानारम्भप्रसङ्गात्। तस्मात् प्रत्यक्षानुमानार्थापत्तिभिः प्रपञ्चस्य मिथ्यात्वावगमात् प्रशान्तत्वाच्च ब्रह्मणो निष्प्रयोजना सृष्टिश्रुतिः विवर्त एव। न च सद्बुध्यनुगमविरोधः। घटादिविशेषाणामेव मिथ्यात्वेनाऽधिष्ठानसत्तयैवाऽनुगतसद्बुद्ध्युपपत्तेः।

नन्विदं प्रपञ्चजन्मादिकारणत्वं किं ब्रह्मणो विशेषलक्षणम्। उतोपलक्षणम्? नाद्यः प्रपञ्चजन्मादिकारणत्वस्य प्रपञ्चोपाधित्वेन कादाचित्कत्वात् ब्रह्मविशेषणत्वानुपपत्तेः। निरुपाधिकब्रह्मस्वरूपलक्षणकथनमन्तरेण सोपाधिकधर्मप्रतिपत्त्ययोगाच्च। नाप्युपलक्षणम्, लक्ष्यब्रह्मशब्दार्थत्वायोगात् गृहे काकादिवदिति चेत्। न। उपलक्षणत्वात्। न च ब्रह्मशब्दार्थत्वानुपपत्तिः। अब्रह्मशब्दार्थस्यापि मिथ्याभूतस्य जगत्कारणत्वस्य 'यद्रजतमित्यभात् सा शुक्तिः' इति

मिथ्यारजतस्य शुक्तिलक्षकत्ववत् काकस्याग्रहशब्दार्थस्यापि ग्रहोपलक्षणवदुपपत्तेः। उक्त-लक्षणलक्ष्यं ब्रह्मैव न प्रधानादीति संभावयितुं युक्तिप्रदर्शनार्थं विशेषणचतुष्टयं प्रायुङ्क्त भाष्यकारः। अस्य जगतो नामरूपाभ्यां व्याकृतस्याऽनेककर्तृभोक्तृसंयुक्तस्य प्रतिनि-यतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जगतो ब्रह्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः भवति तद्ब्रह्मेति।

तत्र केचित् स्वप्रक्रियानुरोधेन पदार्थभेदान्वर्णयन्ति। तथाहि—द्रव्यगुणकर्मसामान्या-नीति भाट्टाः। कार्यकारणयोगविधिदुःखान्ताः पञ्चेति शैवाः। तत्र कार्यं प्रपञ्चः। कारणं शिवः। योगो यमादिर्विधिः त्रिषवणस्नानादिः। दुःखान्तो मोक्षः। द्रव्यगुणकर्मसामान्य-विशेषसमवायाष्षडिति वैशेषिकाः। जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षाः सप्तेति क्षपणकाः। तत्रास्रवशब्देनेन्द्रियप्रवृत्तिः। संवरशब्देन तन्निवृत्तिः। निर्जरशब्देन नितरां जरयति पापं इति तप्तशिलारोहणादिः। द्रव्यगुणकर्मसामान्यविशेषपारतन्त्र्यशक्तिनियोगा इत्यष्टौ प्रभाकराः। प्रमाणादयः षोडशेति नैय्यायिकाः। ज्ञानेन्द्रियकर्मेन्द्रियभूततन्मात्रमहाभूतमनोहङ्कारमहदव्यक्त-पुरुषा इति साङ्ख्याः। तन्निराकरणेन नामरूपे व्याकरवाणीति श्रुतिसिद्धपदार्थद्वैविध्यमेव युक्तमिति वक्तुं आद्यविशेषणम्। कर्तृभोक्त्रोः स्रज्यत्वान्न स्रष्टृत्वमिति दर्शयितुं द्वितीयम्। क्रियाफलस्य प्रतिनियतो देशो मेरुपृष्ठादिः। प्रतिनियतकालो देहपातानन्तरादिः। इदं च विशेषणचतुष्टयं सर्वज्ञस्यैव संभवतीति प्रधानादिनिवृत्तिः।

ननु किमत्रोपलक्षितस्य ब्रह्मणः स्वरूपलक्षणमुच्यते। न च स्वरूपलक्षणमन्तरेण कस्यचिद्वस्तुनः प्रतिपत्तिः अस्ति। न च यत्र शाखाग्रं स चन्द्र इत्येतावता प्रकृष्टप्रकाशात्म-प्रतिपत्तिमन्तरेण चन्द्रावगतिरस्ति। न तावत् सर्वशक्तित्वं ब्रह्मासाधारणलक्षणम्। प्रधाना-दीनामप्यविशेषात्। नाऽपि सर्वज्ञत्वम्। तस्य सर्वोपाधिधर्मत्वान्निरुपाधिकब्रह्मस्वरूप-प्रतिपत्तेः।

कथं चेदं सर्वज्ञत्वमिति वक्तव्यम्। किं प्रत्यक्षादिभिः, उत स्वरूपज्ञानेन? नाद्यः। तत्रापि किं युगपत्सर्वज्ञत्वं उत क्रमेण। नाद्यः, सर्वप्रमाणानां युगपत्प्रमाणाभावात्। भावे वाऽस्माकमपि प्रसङ्गात्। नापि क्रमेण। अस्मदादीनामपि तत्सत्वात्। प्रत्यक्षेणैव सर्वं जानातीश्वर इति चेत्। किं तदिन्द्रियजन्यं उत न? नाद्यः। तस्येन्द्रियाभावात्। भावे वा किं बाह्येन्द्रियैः सर्वं जानाति। उत मनसा। नाद्यः। तानि किमपरिच्छिन्नानि। उत परिच्छिन्नानि। नाद्यः। तत्र प्रमाणाभावात्। न द्वितीयः। व्यवहितपदार्थ-

ग्रहणानुपपत्तेः । न च सन्निकर्षाभावेऽपि तदिन्द्रियं व्यवहितं गृह्णाति । अस्मादादीनामपि तथा प्रसङ्गात् । नाऽपि मनसा । बहिरस्वातन्त्र्यात् । न च योगजधर्मवशात्तदिन्द्रियं मनश्च व्यवहितमपि गृह्णाति । इन्द्रियाणां अनादित्वाभावेन तत्सृष्टेः प्राक् सर्वज्ञत्वं न स्यात् । इन्द्रिसन्निकर्षाभावेऽपि धर्मवशात् सर्वज्ञत्वे इन्द्रियाभावेऽपि स्वतः एव सर्वज्ञत्वे इन्द्रियकल्पनावैय्यर्थ्यात् । नाऽपि स्वरूपज्ञानेन सर्वज्ञता । तस्य प्रदीपवत् स्वसृष्टमात्रप्रकाशकत्वेनाऽतीतादिज्ञानानुपपत्तेः इति ।

अत्रोच्यते । सर्वोपादानत्वात् सर्वेण तावदाध्यासिकसम्बन्धो वर्तते ब्रह्मणः ततः एव स्वाध्यस्तं सर्वं अनावृतज्ञानत्वादपरोक्षतया पश्यति । अस्मदादीनां त्वावृतस्वरूपत्वादनुपादानत्वाच्चेन्द्रियद्वारा चैतन्याभिव्यक्तावपरोक्षता । तत्र च योग्यायोग्यविभागः । तस्यैव च कर्तृत्वात् । सृष्टेः प्रागपि कुलालादिवन्मायापरिणामवशादागामिनं सर्वं जानाति । अतीतमपि असंप्रमोषस्मृतित्वान्मायापरिमाणवशादेव स्मरतीति यः सर्वज्ञ इत्यादि श्रुत्या ज्ञं सर्वस्मिन्काले सर्वस्मिन्ब्रह्मेति सर्वजगत्कर्तृत्वं ब्रह्मण उपपद्यते ।

नन्विदं सोपाधिकधर्मत्वान्न स्वरूपलक्षणमित्युक्तम् । न, अनेन सर्वज्ञशब्देन सर्वावभासक्षमं विज्ञप्तिमात्रं विषयोपाधिकं स्वरूपलक्षणमित्यविरोधः । ननु षड्भावविकारा इति यास्कवाक्यमूलमिदं सूत्रं किं न स्यात् । तथा चास्ति जायत इत्यादीनां षड्भावविकाराणां ग्रहेण जन्मस्थितिभङ्गं समासार्थ इत्यनुपपत्तिः इति चेत् । किं सर्वेषामेव सूत्राणां तन्मूलम् । उतास्यैव । नाद्यः । असिद्धेः, श्रुतिमूलत्वोपलम्भात् । न द्वितीयः, यास्कवाक्यस्य मूलं किं प्रत्यक्षम् । उतागमः । नाद्यः । प्रत्यक्षसिद्धानां ग्रहणे भौतिकानामेवोत्पत्यादि गृह्येत । भूतानां तेषां अतीन्द्रियत्वात् । तथा च तदुत्पत्त्यादिकर्ता अन्यः स्यात् । स च श्रुतिसिद्ध ईश्वरः इति वक्तव्यम् । तथा चावश्यकत्वाच्छ्रुतिरेव मूलम् । तत्प्रतिपादिता उत्पत्त्यादयः ग्राह्याः । तेष्वेवेतरेषां भावविकाराणां अन्तर्भाव इति श्लिष्यते । एतेन द्वितीयोऽपि निरस्तः ।

ननु जन्माद्युपादानत्वमेव लक्षणमस्तु । किं निमित्तत्वेन । अतिप्रसक्त्यभावात् । ननु मायायामतिव्याप्तिः । मायां तु प्रकृतिं विद्यादिति श्रुते; तस्या अप्युपादानत्वात् । इन्द्रो मायाभिः इति तृतीयानुरोधात् । प्रक्रियत इति व्युत्पत्या करणमेव मायेति चेत् ; न, रूढिः योगं अपहरतीति न्यायात् । मायाभिः पुरुरूपः ईयते इति बहुरूपतायामेव करणत्वात् ।

निरपेक्षप्रकृतिद्वयानुपपत्तेः। प्रकृतिशब्दस्य अन्यार्थपरत्वमिति चेत्। किं मायेति प्रज्ञाऽभिधीयते। मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः। मायाप्रज्ञेति स्मृतौ प्रज्ञासामानाधिकरण्यात्, उत बुद्धिः? अथवा मन्त्रादिरिति। नाद्यः। प्रतिपन्नोपाधिबाधित एव रथादौ मायाशब्दप्रयोगात् प्रज्ञायामप्रयोगात्। नहि प्रज्ञातिशयशालिनं मायाविनं वदन्ति। अपि च

भूयश्चान्ते विश्वमायानिवृत्तिः ॥
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥

इति निवर्त्यत्वगुणमयत्वज्ञानावरणत्वलिङ्गाच्च न ब्रह्मचैतन्यं माया। न द्वितीयः। प्रकृतिशब्दविरोधात्। न तृतीयः। मन्त्रौषधादिजन्यरथादावेव मायाशब्दप्रयोगेण तत्र प्रयोगाभावात्।

ननु मायाया अपि पारमार्थिकत्वान्निवर्त्यत्वाद्यनुपपत्तिः तुल्येति चेत्। न, नासदासीत् नोसदासीत् तम आसीत् इति जगत्प्रागवस्थायाः सदसद्विलक्षणानिर्वचनीयत्वश्रवणात्। लोके च हस्त्यश्वरथादिषु व्यभिचारिषु मिथ्यवस्तुमात्रे अनुयायिनि मायाशब्दप्रयोगात् "तरत्यविद्यां विततां" इति मायाविद्ययोः पर्यायत्वादिति।

अत्रोच्यते। मायोपादानत्वे पक्षत्रयं संभवति। रज्ज्वाः संयुक्तसूत्रद्वयवन्मायाविशिष्टं ब्रह्मोपादानमिति वा "देवात्मशक्तिं स्वगुणैः निगूढां" इति श्रुतेः मायाशक्तिमत् ब्रह्म कारणमिति वा जगदुपादानं माया तदाश्रयतया ब्रह्म कारणमिति वा। तत्र विशिष्टकारणत्वपक्षे मायायामतिव्याप्तिवारणार्थं कर्तृत्वविशेषणम्। स्वरूपलक्षणसहितं वा उपादानत्वं ब्रह्मलक्षणम्। मध्यमपक्षे उपादानत्वं कर्तृत्वं वा लक्षणम्। चरमे तु परिणाममानमायाधिष्ठानत्वं कर्तृत्वं वा लक्षणमिति नातिव्याप्तिः।

अत्र कश्चिदाह—सृष्टिश्रुतेः ब्रह्म परिणमते, न च निरवयवस्य परिणामानुपपत्तिः। आवश्यकत्वात्। तथाहि—हेम्नि रुचकाकारेण परिणममाने तदवयवा अपि परिणमेरन्नवेति वक्तव्यम्। यदि परिणमेरन। तर्हि तदवयवा अपि तथेति निरवयवपरमाणुपर्यन्तं परिणामः स्यात। अथ न परिणमेरन् न तर्हिअवयवी परिणमेत। आश्रयविकारं अन्तरेणाश्रितस्य

विकारायोगात्। तस्मात् यथा संयोगोऽवयव्येकदेशसमवेतः परंपरया निरवयवपरमाणुसंयोगपुरस्सरः। तथा निरवयवपरिणामपुरस्सरोऽवयविपरिणाम इति।

स वक्तव्यः। कोऽयं परिणामो नाम? स्वावयवानां पूर्वसंयोगात् संयोगान्तरापत्त्या ऽवयवान्तरसंयोगेन वा सम्मूर्च्छितावयवत्वम्, उत वस्त्वन्तरसंयोगः, परिस्पन्दो वा, गुणान्तरोदयो वा, द्रव्यान्तरोत्पत्तिर्वा। न तावदाद्यः। तर्हि निरवयवस्य स्वावयवाभावेन परिणामानुपपत्तेः। न द्वितीयादयस्त्रयः। ब्रह्मणि तेषां अभावेन परिणामानुपपत्तेः। आकाशे च वस्त्वन्तरसंयोगिनि परिस्पन्दमाने च भ्रमरे आदित्योदये च घटे द्रव्यपरिणामबुध्यभावात्। नाऽपि चतुर्थः। हेम्नि रुचकरूपेण परिणममाने तदवयवानामपि किं रुचकरूपेणैव परिणामः, उत द्रव्यान्तररूपेण। नाद्यः, तस्य हेमपरिणामत्वात्। न द्वितीयः, द्रव्यान्तरादर्शनात्। नचावयवव्यतिरेकेण हेम नास्त्येव। ते च रुचकाकारेणैव परिणमन्त इति वाच्यम्। आरम्भवादप्रसङ्गात्।

अथ दृश्यमानोऽवयवपरिणामोऽवयवविपरिणामानुपपत्त्या कल्प्यत इति चेत्; न, अवयविधर्मस्याऽवयवेष्वनावश्यकत्वात् अन्यथाऽवयविजन्मविनाशयोः अवयवानामपि तत्प्रसङ्गात्। किञ्चाऽवयविपरिणामोपाधावेवावयविपरिणामो दृष्टः इति न निरुपाधिनिरवयवात्मपरिणामसिद्धिः। यत्तूक्तं संयोगवत्परिणाम इति। तत्राऽपि किं अवयविसंयोग एव परिणामो वर्तत इत्युच्यते किं वा अवयविसंयोगानुपपत्त्या संयोगान्तरं कल्प्यते। नाद्यः। अप्रत्यक्षत्वप्रसङ्गात्। न द्वितीयः। जात्यादीनां अवयविसमवेतानां अवयवे अभावात्। अवयवानां संयोगानुगमस्यावयव्यनुगमेनान्यथासिद्धत्वात्। अवयवसमवाये संयोगस्य कृत्स्नवृत्तिता प्राप्नोतीति चेत्। तर्हि निरवयवसंयोगेऽपि कृत्स्नवृत्तेः प्रचयाभावप्रसङ्गात्। अस्तु तर्हि निरवयवपरिणामानुपपत्तेः ब्रह्मणोऽपि सावयवत्वं इति चेत्। किं अवयवावयविनोः स्वयंप्रकाशत्वम्, उतान्यतरस्य? नाऽद्यः। अवयवावयविनोः इतरेतराविषयत्वेन ब्रह्मणस्स्वस्मिन् सावयवत्वानुभवाभावेनाऽसर्वज्ञत्वप्रसङ्गात। न द्वितीयः। घटात्मनोरिवांशांशिभावानुपपत्तेः। श्रुतिश्च निष्कलं निष्क्रियं शान्तमिति क्रियावयवशून्यतामाह। नियन्तृत्वादिक्रियाऽपि श्रूयत इति चेत्। तर्हि परस्परविरोधे सति मायया तत्वव्यवस्था कल्पनीया। "मायाभिः पुरुरूपः ईयत" इति प्रवृत्तेरेव मायानिबन्धनत्वश्रवणात चेतनस्य निर्व्यापारस्य सुषुप्ते पुरुषार्थत्वावगमात, ब्रह्मणः प्रवृत्तिप्रयोजनाभावाच, विपरीतरूपपरित्यागेन विपरीतकार्यापत्तेश्च विवर्त एवेति सिद्धम्।

ननु जगदुत्पत्त्यादिकारणत्वं न ब्रह्मलक्षणम् । महाभूतानामुत्पत्त्यदर्शनेन तत्कारणत्वस्याऽप्रसिद्धस्य लक्षणत्वानुपपत्तेः इति चेन्न। भौतिकानां घटादीनां अप्रत्यक्षत उत्पत्त्याद्यवगमात्तद्दृष्टान्तेन तत्कारणानां महाभूतानामप्युत्पत्त्याद्यनुमानात्। ननु पृथिव्यादयो न जायन्ते महाभूतत्वात आकाशवत्। आकाशश्च न जायते। निरवयवद्रव्यत्वात् आत्मवदिति प्रत्यनुमानमस्तीति चेत्; न, सामान्यतो दृष्टस्य विशेषतो दृष्टाद्दुर्बलत्वात्। तदुक्तम्—

'प्रसिद्धावयवं यत्स्यात् विशेषे च व्यवस्थितम्।
तत्तद्बोध्याङ्गसामान्यदृष्टाच्च बलवत्तरम् ।'

इति । **न च यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वे**त्यादिभाष्येण युक्तिरपि स्वरूपनिर्णयाय सूत्रितेति दर्शितम्। तेनाऽनुमानैकगम्यकारणवादिनः **साङ्ख्यादयो निरस्ताः**। सर्वे बाह्याध्यात्मिका भावाः सुखदुःखमोहसामान्यप्रकृतिकाः सुखदुःखमोहसामान्येन नियमेनान्वितस्वभावत्वात्, ये यदन्वितस्वभावाः ते तत्प्रकृतिका दृष्टाः, यथा मृदन्विताः शरावादयः। सर्वे किल भावाः सुखदुःखमोहान्विताः स्वरञ्जकचित्तोपाधौ तदाकारप्रतिभासत्वात्। दर्पणे मुखाकारप्रतिभासहेतुबिम्बमुखप्रकृतिकप्रतिबिम्बमुखवदिति साङ्ख्याः प्रधानं कल्पयन्ति। विमतं कार्यद्रव्यं स्वन्यूनपरिमाणद्रव्यारब्धं कार्यद्रव्यत्वात्। घटवदित्यणुकारणवादिनः। सर्वं कार्यं अभावपुरस्सरं योग्यत्वे सत्यनुपलभ्यमानपूर्वावस्थत्वात्। यदभावपुरस्सरं न भवति न तद्योग्यत्वे सत्यनुपलभ्यमानपूर्वावस्थम्। यथा परकल्पित आत्मेति शून्यवादिनः। योगाः शैवाश्च हिरण्यगर्भं पशुपतिं चागमसामर्थ्याज्जगत्कारणं कल्पयन्ति। तत्र साङ्ख्यानुमाने भावानां सुखदुःखमोहानां चान्तर्बहिर्भावेनोपलब्धेरसिद्धिः। न च दर्पणे मुखाकारवदुपपत्तिः; बिम्बस्य प्रतिबिम्बारोपाधिष्ठानत्वात्। भावानां च सुखदुःखादौ निमित्तमात्रत्वात् एकं शब्दमुपलभमानानां प्रत्येकं सुखदुःखमोहत्रितयोपलम्भप्रसङ्गात्। अदृष्टेन वस्तुसामर्थ्यनियमायोगात्। न च सर्वे भावा अविभक्तैकप्रकृतिकाः परिमितत्वादित्यनेन प्रधानसिद्धिः। वस्तुतः परिमितत्वे हेतौ गुणपुरुषेष्वनैकान्तिकता देशकालपरिमितत्वेऽपि हिमकरकादिषु प्रत्यक्षदृष्टभिन्नप्रकृतिकेष्वनैकान्तिकता।

वैशेषिकानुमानेऽपि दीर्घविस्तृतदुकूलारब्धरज्जुद्रव्येऽनैकान्तः। विमतं न निरवयवारब्धं प्रचयात्मकत्वात् पटवत् इति। सत्प्रतिपक्षश्च कुलालादिदृष्टान्तेन अनुमीयमानस्येश्वरस्य शरीरेन्द्रियपरिच्छिन्नज्ञानादिनाऽपि व्याप्तिसत्त्वेनानभिमतसिद्धिप्रसङ्गाच्च। शून्यानुमानेऽपि घटस्य पूर्वावस्था प्रत्यक्षदृष्टा मृदित्यनुपलभ्यमानपूर्वावस्थत्वादित्यसिद्धो हेतुः। किञ्च

निरुपाख्यकारणत्वे पूर्वकल्पस्य निरन्वयनाशार्थं संस्काराभावात् कर्मतत्फलतत्प्रामाण्यव्यवहाराभावप्रसङ्गात् ।

अत्र **स्वभाववादी** जल्पति । सर्वं कार्यं निर्निमित्तमेवोत्पद्यते न च स्वयमेव स्वस्य कारणं विरोधात् । ननु तर्हि घटस्य भावाभावौ युगपत्स्याताम् । क्रमकारिनिमित्तनिरपेक्षत्वादिति चेत् ; निमित्तसापेक्षत्वे वा कारणस्य क्रमकारित्वं स्वाभाविकं चेत् स्वभाववादप्रसङ्गः । निमित्तान्तरसापेक्षं चेत् अनवस्थापातः । तस्मात्सर्वं कार्यं विचित्रं क्रमवर्ती च स्वभावेनैव जायत इति । तन्न । स्वतस्सिद्धसामर्थ्यानां अपि सहकार्यपेक्षानियमस्य दृष्टत्वात् । अन्यथा विशिष्टदेशकालनिमित्तानुपादानप्रसङ्गात् ।

ननु युक्तिश्चेत् जगत्कारणसिद्धावाश्रिता जितमनुमानकारणवादिभिः अनुमानस्यैव युक्तित्वादिति चेत् तयोर्भेदात् । उदाहरणमात्रदर्शनं युक्तिः । अव्यभिचारिणी व्याप्तिः अनुमानम् । जगत्कारणे च प्रत्यनुमानसंभावनान्नाव्यभिचारिणी व्याप्तिः किन्तु संभावनामात्रम् । तदज्ञानान्नैय्यायिकादिभिः अनुमानमित्युच्यते । नन्विह सूत्रे जन्मादिनिर्देशात् कार्यात्कारणानुमानमेव विवक्षितम् , न युक्तिः, प्रमाणम् विना युक्तिमात्रादर्थासिद्धेः । न च श्रुतिः प्रमाणं कार्यकीर्तनवैफल्यात् । तस्या एव शृङ्गग्राहिकया ब्रह्मप्रतिपादकत्वादिति चेत् ; न, किं सर्वमपि सूत्रं अनुमानग्रथनार्थं उतेदमेव । नाद्यः । तत्र तत्र श्रुतिग्रथनोपलम्भात् । नान्त्यः । अस्यापि तथात्वात् । अनुमानात्कारणमात्रसिद्धावपि श्रुतिं विना सत्यज्ञानानन्तानन्दसर्वज्ञप्रत्यगात्मभूतब्रह्मासिद्धेः । ननु तर्हि युक्तिरपि न अपेक्षितेति चेत् ; श्रुत्यैव मननात्मिकायाः युक्तेः उपकारकत्वस्य दर्शितत्वात् ।

ननु धर्मजिज्ञासायामिव श्रुतिलिङ्गादिभिरेवाऽर्थनिर्णये युक्तेः क्वोपयोग इति चेत् । ब्रह्मानुभवस्याऽविद्यानिवृत्तिहेतुत्वेन युक्तेः चित्तसमाधानद्वारा तत्रोपयोगात् । धर्मस्य च भव्यत्वेनाऽनुभावायोग्यत्वादनपेक्षितानुभवत्वाच्च तन्निर्णये श्रुत्यादिमात्रोपयोगः उपपद्यते । अत एव धर्मस्य पुरुषाधीनात्मलाभत्वात्तत्र विकल्पसमुच्चयोत्सर्गापवादा भवन्ति ; न वस्तुतत्त्वेन । **ननु युक्तेः** केन द्वारेण चित्तसमाधानहेतुत्वमिति चेत् ; न, शब्दावगतेऽद्वितीये ब्रह्मणि मृदादिदृष्टान्तैः उपादानव्यतिरेकेण कार्यस्याऽनिरूपणादद्वितीयता संभाव्यते । स्फटिकलौहित्यप्रतिबिम्बरज्जुसर्पघटाकाश आत्मनि कर्तृत्वादेरारोपितत्वजीवब्रह्मैक्यब्रह्मव्यतिरिक्तप्रपञ्चस्वातन्त्र्याभावासङ्गत्वादीनि संभाव्यन्ते । तप्तपरशुदृष्टान्तेन जीवब्रह्मैक्यसत्यता संभाव्यते ।

ननु लक्षणप्रतिपादकश्रुतिषु सर्वत्र ब्रह्मशब्दस्याऽप्रसिद्धत्वात् तद्घटितलक्षणाप्रतिपत्तिः इति चेन्न । बृहत्वमात्रस्य प्रसिद्धत्वात् तदनुवादेन सन्निहितपदार्थसंसर्गाद्विशिष्टब्रह्मप्रतिपत्तिसंभवात् । ननु यतो वा इमानि भूतानि इत्युदाहर्तव्ये भृगुर्वै वारुणिः इत्युदाहरन् भाष्यकारः सूत्रकारस्य स्वाध्यायपाठक्रमादर्थप्रतिपत्तिमसूसुचत् । तन्नोपपद्यते । व्युत्क्रमेणाऽपि प्रतीतेः, प्रसिद्धानुवादेनाऽप्रसिद्धं प्रतिपाद्यत इति न्यायात् । तथा च कारणस्य प्रसिद्धत्वात् यस्मादाकाशस्संभूतः स आत्मा, सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्यप्रवृत्तिः । तथा यस्मादेतद्ब्रह्म नामरूपन्नं च जायते स सर्वज्ञः सर्वविदिति । तथा यस्मात्प्राणादि जायन्ते स दिव्यो ह्यमूर्तः इत्यादि । तथा या भूतयोनिः तदेद्दश्यमित्यादि । तथा यस्मात्तेजोऽबन्नानि जायन्ते तत् सदद्वितीयमणिमा तत्त्वमसीत्यादिकारणमात्रानुवादेन तद्विशेषः प्रतिपाद्यते । तथाऽपि अविकारिज्ञानकर्तव्यताब्रह्मप्रतिपादकानां क्रमोऽस्तीति तत्क्रमेणाद्यद्वितीयसूत्रे प्रवृत्ते इत्यदोषः ।

ननु यतो वा इति वाक्यस्याऽनुमानसिद्धकारणानुवादित्वात् किं विधेयं? न च यतं इति प्रत्ययाभिहितं एकत्वं; तस्य सार्वविभक्तिकत्वेन बहुत्वेऽपि संभवात् । एकत्वस्योद्देश्यकारणगतस्य ग्रहैकत्ववदविधेयत्वाच्चेति चेन्न । येन जातानि जीवन्ति इत्येकवचनवाक्यशेषाद्यत इत्यत्राऽपि एकवचनतानिश्चयात् उद्देश्यविशेषणस्याऽपि अप्राप्तत्वेन विधानोपपत्तेः । नन्वेकत्वे ब्रह्मलक्षणे च प्रमीयमाणे वाक्यभेदस्स्यात् । एकत्वस्य ब्रह्मप्रतिपत्तिगुणभूतत्वात्प्रधानरूपार्थभेद एव वाक्यभेदात् ! अथवा एकत्वमपि लक्ष्यान्तर्गतं जगत्कारणमात्रानुवादेनैकं ब्रह्म विधीयत इति तस्य सर्वज्ञत्वसिद्धिः । यज्जगत्कारणं तदेकं सर्वज्ञं सर्वशक्ति सर्वतोऽनवच्छिन्नं ब्रह्मेति । ननु निरुपाधिकस्वरूपकथनमन्तरेण सोपाधिकानां सर्वज्ञत्वादीनां कस्यचिद्धर्मतया प्रतिपत्तिः न युक्ता । यत्सुषिरं तदाकाशं प्रकृष्टप्रकाशः चन्द्रः इतिवत्स्वरूपलक्षणमेव किञ्चिद्वक्तव्यम् । ब्रह्मत्वमेव स्वरूपलक्षणमिति चेत् तस्य बृहत्वमात्रधर्मिमात्रत्वात् । यथा महान् घट इत्युक्ते महत्वस्य निरुपाधिघटो धर्मितया प्रमीयते तथेहापि वक्तव्यम् । सदिति चेन्न । महासामान्यमात्रस्य सच्छब्दाभिधेयत्वेन तस्याऽपि व्यक्तिविशेषापेक्षत्वात् । विज्ञानमेव ब्रह्मत्वसर्वज्ञत्वादिधर्मवत्तया निरुपाधिकब्रह्मलक्षणमिति चेन्न । गुरुमते सुखादीनामपि ज्ञानविशेषत्वेन ज्ञानत्वस्यापि सुखदुःखरागद्वेषादिमहासामान्यत्वात । तस्याऽपि व्यक्तिविशेषे पर्यवसानं वक्तव्यं इति चेत । किमत्र वक्तव्यम् । श्रुतिरेव व्यक्तिविशेषं निर्द्धारयति । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इति । आनन्द एव हि ब्रह्मत्वसर्वज्ञत्वादिधर्मवत्तया श्रुत्यन्तरे निर्णीयते ।

तथा हि—यत्र नान्यत्पश्यतीत्यारभ्य यो वै भूमा तत्सुखमिति सुखस्यैव बृहत्वधर्मवत्तामाह। नन्वानन्दस्य ब्रह्मत्वे विज्ञानं तस्य गुणः एव स्यादिति चेत्; न, विज्ञानं ब्रह्मेति विज्ञानानन्दयोः सामानाधिकरण्यं किं नीलोत्पलादिवत् गुणगुणिभावनिबन्धनम्, उत द्रव्यं घट इतिवत् परापरसामान्यनिबन्धनं इति विवेक्तव्यम्। न तावद्गुणगुणिभावात्। साक्षीचेता केवलो निर्गुणश्चेति श्रुतेः। एकधैवानुद्रष्टव्यम्, नेह नानाऽस्ति किञ्चनेति गुणगुणिभावप्रतिषेधाच्च। गुणस्य गुणिनोऽन्यत्वानन्यत्वाभ्यां दुर्निरूपत्वाच्च। **अत्रसर्वसङ्करवादी न** निर्गुणद्रव्यमस्तीत्याह। स वक्तव्यः। किं समवायिकारणं द्रव्यं अभिप्रेतम्। उतोपादानकारणम्? नाद्यः, आरम्भवादानभ्युपगमात्। न द्वितीयः, गुणादीनामपि ग्रहणकर्मत्वादिधर्मोपादानत्वात्। ततो यत्किञ्चिदेतत्। तस्मात् द्रव्यं घटः सन्घटः इति परापरसामान्यनिबन्धनं विज्ञानमानन्दमिति सामानाधिकरण्यम्। तस्माद्विज्ञानसामान्यालम्बनं आनन्दविशेषो ब्रह्मेति। तत्र सर्वज्ञत्वाऽद्वितीयत्वादिधर्माणां प्रपञ्चोपाधिकतयाऽनिर्वचनीयत्वान्न तैः ब्रह्म सगुणं सद्वितीयं वा भवति। विज्ञानसामान्यमपि दुःखरागादिप्रपञ्चोपाधिकतयाऽनिर्वचनीयम् सद्ब्रह्मणि विज्ञानशब्दप्रवृत्तिनिमित्तं भवति। विज्ञानसामान्यालम्बनस्य विज्ञानव्यवहारगोचरत्वात्। विज्ञानप्रयुक्तार्थक्रियाकारित्वाच्च विज्ञानस्वभाव आनन्दो ब्रह्मेत्यानन्दस्यैव ब्रह्मतां प्रतिपादयति प्रसिद्धावद्योतकहिशब्देन। तस्मात् विज्ञानमानन्दं ब्रह्मेति ब्रह्मणः स्वरूपलक्षणं सिद्धम्।

---

# ३ शास्त्रयोनित्वाधिकरणम्

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं तदेव द्रढयन्नाह–

## शास्त्रयोनित्वात् ॥ ३ ॥

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न हीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति। यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात्संभवति, यथा

---

षष्ठवर्णकम्।

उत्तराधिकरणस्य पूर्वाधिकरणेन सङ्गतिं वक्तुं वृत्तं कीर्तयति—जगत्कारणत्वेति। निर्वाहकत्वलक्षणां सङ्गतिमभिप्रेत्य सूत्रमवतारयति—तदेवेति। शास्त्रस्य योनिः इति षष्ठीसमासमभिप्रेत्य सूत्रस्य विषयवाक्यमप्यर्थतः पठति—महत ऋग्वेदादेरिति। शास्त्रयोने" ब्रह्मणः सर्वज्ञत्वसम्भवाय शास्त्रीयविशेषणान्याह—अनेकेति।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥

इति विद्यास्थानानि। तैः उपबृंहितस्य व्याख्यातस्येति यावत्। अनेन मन्वादिशिष्टैः परिगृहीतत्वाच्छास्त्रस्याऽप्रामाण्यशङ्का निवर्तिता भवति। सर्वार्थप्रकाशकत्वादप्यस्य महाप्रदीपवदिति। ईषदपरिसमाप्तौ कल्पप्प्रत्ययः। तथा चाभ्यां विशेषणाभ्यां लौकिकवैदिकव्यवहारस्य सर्वस्याऽपि वेदप्रकाशितत्वं दर्शयति। एवं विशिष्टशास्त्रस्य योनिरिति सूत्रस्थयोनिपदस्य व्याख्या कारणमिति। विशेष्यं निर्दिशति—ब्रह्मेति। नन्वेतावताऽपि ब्रह्मणः सर्वज्ञत्वं कथं सिध्यतीत्याकाङ्क्षायां अन्यथानुपपत्त्या सिध्यतीत्याह—न हीदृशस्येति। विशेषणार्थं स्पष्टयति—ऋग्वेदादिलक्षणस्येति। अन्यथानुपपत्तिमाह—सर्वज्ञादन्यत इति। एवं विशिष्टशास्त्रस्य सर्वज्ञादन्यतोऽसम्भवात् तत्कारणं ब्रह्म सर्वज्ञमिति भावः। यो यच्छास्त्रकर्ता स ततोऽप्यधिकतरविज्ञानवान् इति सामान्यव्याप्तिमाह—यद्यदिति। तत्रोदाहरण-

व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके। किमु वक्तव्यमनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद्यस्मान्महतो भूताद्योनेः संभवः 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृह० २।४।१०) इत्यादिश्रुतेः। तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति। अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे। शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः। शास्त्रमुदाहृतं पूर्वसूत्रे—'यतो वा इमानि भूतानि जायन्ते' इत्यादि। किमर्थं तर्हीदं सूत्रं, यावता पूर्वमेवैवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्। उच्यते—तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात् जन्मादिसूत्रेण केवलमनुमानमुपन्यस्तमित्याशङ्क्येत तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते शास्त्रयोनित्वादिति ॥ ३ ॥

---

माह—यथा व्याकरणादीति। ज्ञेयैकदेशः शब्दलक्षणः अर्थो येन यस्येति वा तज्ज्ञेयैकदेशार्थं तद्व्याकरणादिशास्त्रम् यस्मात्पाणिन्यादेः पुरुषविशेषात्संभवति स पाणिन्यादिः ततोऽप्यधिकतरविज्ञानवानिति प्रसिद्धं लोक इत्यन्वयः। दृष्टान्तसिद्धमर्थं कैमुतिकन्यायेन दार्ष्टान्तिके निगमयति—किमु वक्तव्यं इत्यादिना। उक्तविशेषणविशिष्टस्य शास्त्रस्य महतो भूताद्योनेस्संभवः। तत्सर्वज्ञमिति किमु वक्तव्यम्। सर्वज्ञमेवेत्यर्थः। श्रुतिमुदाहरति—अस्य महत इति। अस्य महतो भूतस्य ब्रह्मणः एतदृग्वेदादिलक्षणं शास्त्रं निश्वसितं निश्वासवदयत्नलभ्यमिति श्रुत्यभिप्रायः।

षष्ठं वर्णकम् ॥

---

## ॥ शास्त्रयोनित्वात् ॥

षष्ठवर्णकम्

शब्दोपादानभावा ध्वनिगतविषयद्योतनाः शक्तयोऽमूः
ब्रह्मण्येव स्युरग्नेः विषयविषयिणी दीपशक्तिः खलूच्चैः ।
द्रष्टुश्च ज्ञानशक्तिः ननु न करणता किन्तु दीपप्रभावात
संयुक्तद्योतनैवेत्यपरमिह पुनस्साध्यते सर्ववित्त्वम् ॥

लक्षणद्वयपरेऽपि पूर्वसूत्रे प्रधानादिवैलक्षण्यसिद्ध्ये जगद्रचनोपपत्तये च सर्वज्ञत्वं ब्रह्मणः प्राधान्येन प्रतिपादितम् । तत्रैव हेत्वन्तरं उच्यते—**शास्त्रयोनित्वादिति** । अथवा सर्वजगत्कारणत्वेन सर्वज्ञत्वं न संभवति । जगदन्तःपातिनां वेदानामकर्तृकत्वादित्याक्षिप्य समाधीयते ।

अत्रेदं विचार्यते । अस्य महतो भूतस्य निश्वसितमेतद्यद्ऋग्वेद इत्यादिशास्त्रं किं ब्रह्मणो वेदहेतुत्वेन सर्वज्ञत्वं प्रतिपादयति , न वेति । नेति तावत्प्राप्तम् । तथा हि —किं ब्रह्मणः वेदोपादानत्वेन सर्वज्ञत्वम् । उत तत्कर्तृत्वेन । नाद्यः । उपादानस्य ज्ञानवत्त्वनियमाभावात् । मृदादेरप्युपादानत्वदर्शनात् । अविद्यायाः अपि उपादानत्वेन सर्वज्ञत्वप्रसङ्गाच्च । यद्यत विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात् भवति स ततोऽप्यधिकतरविज्ञानवान् यथा व्याकरणादि पाणिन्यादेरिति भाष्यकारस्य व्याप्तिप्रदर्शनानुपपत्तेश्च । पाणिन्यादेः व्याकरणादिकर्तृत्वात् । न द्वितीयः । कर्तृत्वं उपाध्यायवदुच्चारयितृत्वम् , उतार्थमुपलभ्य विवक्षापूर्वं विरचयितृत्वम् । नाऽद्यः । उपाध्यायवदेव सर्वज्ञत्वासिद्धेः । न द्वितीयः । तथा सति वेदस्य लौकिकवाक्यवत् पुरुषबुद्धिसापेक्षत्वेनाऽप्रामाण्यप्रसङ्गात ।

ननु प्रमाणान्तरेणार्थमुपलभ्य विवक्षितत्वा परस्मै विरचितः शब्दः पौरुषेय इत्युच्यते । तस्यैव च सापेक्षत्वम् । तत्रेदमनेन कर्तव्यमिति वक्तुरभिप्रायभेदः रागः पुरुषवचसामर्थः । तत्राऽनीश्वराणां अभिलषितसाधनज्ञानस्याऽनित्यतया तज्जन्यरागस्याऽप्यनित्यतया पुरुषवचसां प्रमाणान्तरसापेक्षत्वमुच्यते । ईश्वरस्य पुनः निखिलेष्टसाधनविषयज्ञानानां नित्यतया तन्मूलरागस्याऽपि नित्यत्वादीश्वरप्रणीतानामपि वैदिकवचसां नित्यरागविषयत्वादपौरुषेयत्वमिति चेन्न । ईश्वरस्य नित्याभिलषितसाधनज्ञानसत्त्वे नाऽनुमानं प्रमाणं, प्रत्यनुमानसंभवस्योक्तत्वात् । नाऽपि शब्दः । नित्यज्ञानमूलनित्यरागजन्यत्वे शब्दस्य अनपेक्षं प्रामाण्यम् । अनपेक्षत्वे च

शब्देन नित्यज्ञानसिद्धिरिति इतरेतराश्रयत्वात्। रागश्च नित्यो नित्याभिलषितज्ञानसाधनमिति च व्याहन्येत। अतः यत्किञ्चिदेतत्।

अथ व्यासाद्यभिप्रायभेदतात्पर्यवतां पुरुषवचसां सापेक्षत्वं प्रामाण्यञ्च। अध्ययनविधितात्पर्यवतां वेदवचसां सृष्टिकाले समुच्चारणं ईश्वरस्य वेदप्रणयनं नाम। ततश्च रागतात्पर्याभावाद्वेदप्रामाण्यं ईश्वरस्य सर्वज्ञता चेति चेत्; न, सः ईश्वरः किं सृष्टिकाले प्रमाणान्तरेणाऽर्थं उपलभ्य वेदवाक्यं व्यनक्ति। आहोस्विदुपाध्यायवत्पूर्वसिद्धवाक्यमुच्चारयति। तत्र पूर्वस्मिन्कल्पे पौरुषेयतापत्तिः। उत्तरस्मिन्नुपाध्यायवदेवासर्वज्ञतापत्तिः। अध्ययनविधितात्पर्यादभिप्रायतात्पर्याभावादपौरुषेयत्वमिति चेत्। उभयोरपि संभवात्। उपलभ्य रचनायां तत एवोपपत्तौ विधितात्पर्याभावाच्च। अतो नायमपि पक्षः साधुः। अथ ब्रह्मस्वरूपज्ञानस्य निर्विकल्पकत्वात् तत्पूर्वकाणि वेदवाक्यानि न सापेक्षतां अश्नुवते। लौकिकवचसां तु सविकल्पकज्ञानपूर्वकत्वात्सापेक्षत्वमिति चेत्; न, उपलभ्यरचनाया एव सापेक्षतानिमित्तत्वात्। स्वरूपज्ञानस्याप्यभिलषितसाधनोपरागे सविकल्पकत्वाच्च।

नन्वस्तु पौरुषेयः वेदः। न चापौरुषेयो वेदः, अविच्छिन्नव्यवहारत्वे सत्यस्मर्यमाणकर्तृकत्वादिति वाच्यम्। चिरवृत्तेष्वपीदानीं अनुमीयमानकर्तृकेष्वनैकान्तिकत्वाद्वेदानां कर्तुरनुमानागमाभ्यां प्रमीयमाणत्वात् बाधश्च। तथाहि—वेदो विशिष्टबहुज्ञपुरुषप्रणीतः बह्वर्थविषयवाक्यप्रमाणत्वात्, भारतवत्। इदं सर्वं असृजत। ऋचो यजूंषि सामानि इत्यागमः। तस्मात्पौरुषेयो वेद इति चेत; न, कपिलकाणादाक्षपादानां वेदपौरुषेयत्वे कथं प्रामाण्यं लभ्यते। सर्वज्ञप्रणीततयेति चेत; न तावदनुमानात् सर्वज्ञतासिद्धिरित्युक्तम्। अथागमात् सर्वज्ञसिद्धौ तत्प्रणीततया वेदप्रामाण्यं ततश्च सर्वज्ञसिद्धिः इति इतरेतराश्रयत्वात्। महाजनपरिगृहीतत्वादिति चेत्। किं तद्बहुजनपरिगृहीतत्वम्। उताऽऽप्तपरिगृहीतत्वम्? नाऽद्यः। बौद्धानामेव देशविशेषेष्वानन्त्यात्तदपरिग्रहात्। न द्वितीयः। देहात्मभावचन्द्रप्रादेशिकत्वादीनां तथाभूतानामपि प्रामाण्यदर्शनात्। अतो न प्रामाण्यं वेदस्य सिध्यति। मा भूत्प्रामाण्यमिति सुगतार्हताः। तैरिदं वक्तव्यम्। प्रत्यक्षदृष्टातिरिक्तः कर्मफलसंबन्धो विद्यते, न वेति। विद्यते चेत्। कथं अपौरुषेयागममन्तरेण तत्सिद्धिः। सर्वज्ञसुगतप्रणीतागमादिति चेत्; किं कपिलादयः सर्वज्ञा न भवन्ति? सर्वे तीर्थकराः सर्वज्ञा इति चेत्; धर्माधर्मयोर्विवादः कथं स्यात्। न चैकः सर्वज्ञो नेतर इति प्रमाणमस्ति। न च सर्वे सर्वज्ञप्रणीता धर्मा एवेति युक्तम्। अन्योन्यधर्मनिराकरणात्।

आह लोकायतः। माभूत्प्रत्यक्षदृष्टातिरिक्तः कर्मफलसम्बन्धः इति। स वक्तव्यः। किं लौकिकवचांसि प्रमाणानि न वेति। न चेत् न मया ते वादो युक्तः। शब्दैरेव परस्परविरुद्धार्थप्रतिपादनरूपत्वाद्वादस्य। अथ प्रमाणानि वेदवचोभिः किमपराद्धम्। तस्माद्वेदस्य पौरुषेयत्वे प्रामाण्यानुपपत्तेः ब्रह्मकर्तृकत्वे अपौरुषेयत्वानुपपत्तेश्च न वेदप्रणेतृत्वेन ब्रह्मणस्सर्वज्ञत्वादिसिद्धिरिति।

अत्रोच्यते। पौरुषेयत्वं नाम पुरुषरचिताभिनवानुपूर्विकत्वम्। न तु तत्कृतत्वमात्रम्। भारतादेः अस्मदीयत्वप्रसङ्गात्। न वा वर्णानां तत्कृतत्वम्। तेषां सृष्टिकालोत्पन्नत्वेन व्यासादिकर्तृकत्वानुपपत्तेः। न च तद्वेदेऽस्ति। अनादिप्रवाहत्वात्तस्य। तथा हि। सृष्टिकालीनं वेदाध्ययनं पूर्वतथाविधवेदाध्ययनानुस्मृतिनिबन्धनं वेदाध्ययनत्वात्। इदानींतन-वेदाध्ययनवत् इत्यनादित्वानुमानात्। न च भारतादिष्वपि तथाप्रसङ्गः। तेषां तेष्वेव कर्तुः-स्मरणात्। पुरुषपरंपरया व्यासादिकर्तृकत्वस्मरणाच्च। इहाऽपि वेदस्य कर्ता श्रुत्यैव प्रतिपाद्यत इति चेत्। न तावत् "स तया वाचा इदं सर्वं असृजत ऋचो यजूंषि सामानि" इति श्रुतिः वेदस्य ब्रह्मकर्तृकत्वमाह। उपक्रमवशात् तस्याः प्रजापतिविषयत्वात्। 'यो ब्रह्माणं विदधाति पूर्वं, यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतौ प्रागेव वेदसद्भावावगमात्। अस्य महतो भूतस्येति श्रुतिरीश्वरविषयापि प्रकरणसामर्थ्यात् वेदोपादानत्वमेव ब्रवीति।

नन्वाप्तेन प्रमाणान्तरेणाऽर्थमुपलभ्य तत्र प्रयुज्यमानः शब्दः प्रमाणम्। तदभावा-दनाप्तवाक्यवदप्रमाणं वेदः प्रसज्येतेति चेत्; न, शब्दानां संसृष्टार्थावबोधसामर्थ्यं स्वारसिक-मेव प्रयोगात् अवगतम्। तत्राऽनाप्तस्य भ्रान्त्युत्प्रेक्षाज्ञाने तन्मूलविरचितशब्दस्य कारणदोषतया शब्देऽपि दोषं प्रसञ्जयतः। ततश्च दुष्टकारणजन्यज्ञानमयथार्थप्रमाणमिति स्वतस्सिद्ध-सामर्थ्यप्रयुक्तप्रामाण्यस्य प्रतिबन्धकतया नाप्तोक्तत्वज्ञानमवतिष्ठते। आप्तज्ञानं च प्रतिबन्ध-निरासितया संपद्यते। वेदे तु पुरुषप्रतिबन्धाभावात् न प्रतिबन्धकनिरासापेक्षेति नाप्तप्रणी-तत्वमत्रोपयुज्यते।

अथ वा द्विविधः प्रयोगः प्रामाण्यहेतुः अर्थोपलब्धिप्रमानिबन्धनः पौरुषेये, पूर्वप्रयोगा-नुस्मृतिनिमित्तो वेदे तदुभयाभावादनाप्तवाक्यं अप्रमाणमिति। यद्वा तात्पर्याभावात् केवलेभ्यः शब्देभ्यो नार्थप्रमितिः। वेदे पुनरध्ययनविधितात्पर्यादाप्तप्रयोगाभावेपि प्रमितिरुत्पद्यते। अध्ययनविधिवाक्यस्यापि स्वेनैव तात्पर्यसिद्धेः। अतोऽनादिः वेदः।

नन्वर्थोपलब्धिपूर्वं ब्रह्मणो वेदकर्तृत्वाभावे कथं सर्वज्ञत्वसिद्धिरिति चेत्। न, पदानां वाक्यानां प्रकरणानां शास्त्राणां च प्रवाहरूपेण ब्रह्मोपादानत्वादेव तस्य सर्वज्ञत्वसिद्धेः। अत एव भगवता सूत्रकारेण शास्त्रयोनित्वादित्युक्तम्। योनिशब्दस्योपादानवाचित्वात्। ननु वेदस्य ब्रह्मोपादानत्वे विवर्तत्वेन मिथ्यात्वं स्यात्। तथा च तस्य ब्रह्मप्रतिपत्तिहेतुत्वं कथमिति चेत्; न, किं मिथ्यात्वे उपपादकं पृच्छसि? किं वा प्रतिपादकत्वानुपपत्त्या सत्यत्वं वक्तव्यमिति। नाऽद्यः। दुर्निरूपत्वाद्वेदस्य। किं वर्णमात्रं वेदः क्रमविशेषवन्तो वर्णा वा? नाद्यः, वर्णमात्रे तद्बुध्यभावात्। न द्वितीयः। दैशिकस्य कालिकस्य वा क्रमस्य नित्यसर्वगतेषु वर्णेष्वसंभवात्।

ननु वस्तुनिबन्धनोऽपि क्रमः संभवति यथा लेखने परिबृढानामिति; न, राजा जारेति रेफस्य युगपत्पूर्वापरभावानुपपत्तेः। ननूच्चारणक्रमो वर्णेषूपरज्यत इति चेत्। न, उच्चारणस्य ताल्वादिव्यापारस्य अप्रत्यक्षत्वेन तद्घटितवेदस्य अप्रत्यक्षत्वप्रसङ्गात्। उपलब्धिक्रमस्य वर्णेषु आरोपे अख्यातिवादिमते वर्णमात्रस्य क्रममात्रस्य वा वेदत्वाभावाद्विशिष्टस्य अन्यस्याऽनभ्युपगमादर्थावबोधो न स्यात्। अन्यथाख्यातौ विशिष्टप्रत्ययसत्त्वेऽपि विशिष्टार्थाभावाद्विज्ञानातिरिक्तो वेदो न स्यात्। अनिर्वचनीये तु पुनर्विशिष्टार्थतत्प्रत्यययोः भावान्न वेदबुद्धेर्निरालम्बनत्वम्। अतोऽनिर्वचनीयो वेदः। न द्वितीयः। अनिर्वचनीयत्वेऽपि अर्थक्रियासमर्थतया तुच्छव्यावृत्तसत्त्वाभ्युपगमादर्थावबोधसमर्थो वेद इति निरवद्यम्।

ननु पाणिन्यादिदृष्टान्तेन ब्रह्मणो वेदोपादानतैव यद्युच्येत तावता कथं सर्वज्ञत्वमिति चेत्; न, अस्ति तावद्वर्णानां क्रमसंख्यादिभेदेन पदभेदभाजां मुख्यलक्षणादिद्वारेण सर्वार्थप्रकाशनसामर्थ्यं अव्यपदेश्यस्य वस्तुनोऽभावात् तत्र कार्यगतं अर्थप्रकाशनसामर्थ्यं उपादानधर्म एव भवति। प्रदीपगतप्रकाशनसामर्थ्यस्याऽग्निधर्मत्वदर्शनात् कार्योपादानयोः शक्तिद्वयकल्पनायोगात्। अतः स्वार्थप्रकाशनसमर्थत्वात् सर्वज्ञं ब्रह्म।

ननु समर्थस्याऽपि नित्यवत् ज्ञानसंयोगो न भवति। नैष दोषः। यथा प्रकाशद्रव्यस्य स्वसन्निहिताशेषवस्तुप्रकाशिता। एवं प्रकाशस्वरूपस्य ब्रह्मणः सर्वोपादानतया सर्वसंसर्गिणः स्वसन्निहिताशेषवस्तुप्रकाशिता नित्यवद्भवतीति युक्तम्। वेदस्य कारणत्वात्तत्सामर्थ्यं कथं कर्तृब्रह्मसामर्थ्यं स्यादिति चेत्; न, किं यत्र कुत्रचित् करणत्वं वेदस्य, उत ब्रह्मणः सर्वविषयकज्ञानं प्रति? नाद्यः। तस्याऽविरोधित्वात्। न द्वितीयः। ब्रह्मणो विषयावगमं प्रति शब्दस्याऽकरणत्वात्।

ननु स्वयंप्रकाशितया सर्वसंसर्गित्वादेव सर्वज्ञता सिध्यति । किं सर्वप्रकाशकवेदोपादानत्वगवेषणेनेति चेत् । वाय्वाकाशरसगन्धादिव्यापिनः सवितृकिरणस्य तत्प्रकाशनायोग्यत्वदर्शनात् । ननु पाणिन्यादेः व्याकरणाद्यनुपादानत्वेन दृष्टान्तवैषम्यमिति चेत् । न, विशिष्टरूपेण कर्तुरपि स्वरूपेणोपादानत्वसंभावात् । तस्मात्सर्वार्थप्रकाशनसमर्थसर्वशब्दोपादानतया सर्वज्ञं ब्रह्मेति सिद्धम् ।

इति विवरणप्रमेयसंग्रहे षष्ठ-
वर्णकमवसितम् ॥

अथ सप्तमवर्णकम्

अथवा पूर्वसूत्रेण ब्रह्मणो लक्षणमुक्तम् । अत्र प्रमाणमुच्यते । लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः । अत्रेदं विचार्यते । तन्त्वौपनिषदं पुरुषं पृच्छामीत्यादिवाक्यं ब्रह्मणः शास्त्रैकगम्यत्वं प्रतिपादयति न वेति । तत्र नेति तावत्प्राप्तम् । अनुमानादेव जगत्कारणस्य ब्रह्मणः सिद्धेः । न च सर्वज्ञत्वाद्यसिद्धिः लाघवात्कारणैक्ये तस्याऽर्थात् सर्वज्ञत्वसिद्धेः इति प्राप्ते; उच्यते—

**शास्त्रयोनित्वात्** । शास्त्रं पूर्वसूत्रोदाहृतं यतो वा इत्यादि योनिः यथावत्स्वरूपावगमहेतुः यस्य तच्छास्त्रयोनित्वात् ।

ननु शास्त्रप्रमाणकमित्येतावद्वक्तव्यम् । हेतुनिर्देशस्याऽनन्वितत्वात् साकाङ्क्षं वचनमनर्थकं स्यात इत्ति चेत् । न, जन्माद्यस्य यतः तच्छास्त्रप्रमाणकत्वात् सर्वज्ञं सर्वशक्तीति पूर्वसूत्रेणैकवाक्यत्वात । अन्यथा जन्माद्यस्य यत इत्येतावति पूर्वसूत्रे जगत्कारणे अनुमानमेव प्रमाणमुक्तं इत्याशङ्का स्यात् । तथा च सर्वज्ञत्वाद्यसिद्धिः । तर्हि पृथक्करणं किमर्थम्? शास्त्रकारणत्वेन ब्रह्मणः सर्वज्ञत्वसाधनार्थत्वात् । न च सूत्रस्याऽनेकार्थत्वप्रसङ्गः । इष्टत्वात् । यथाहुः पौराणिकाः—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । इति । सूत्रस्य अनेकार्थतोच्यते । अत एव ब्रह्मणः उपनिषदेकगम्यत्वादौपनिषदमिति तद्धितप्रत्यय उपपद्यते । ननु किन्तत् ब्रह्म यज्जगत्कारणम् । न तावच्चिन्मात्रम् । तस्य कारणत्वानुपपत्तेः असङ्गस्वभावत्वात् । नान्यत् । तस्य जडत्वेन सर्वज्ञत्वाद्यनुपपत्तेः इति चेत् ।

अत्र केचित्। तत्र बिम्बस्थानीयं ब्रह्म मायाशक्तिमत्कारणम्। जीवाश्च प्रत्येकं अविद्यानुबन्धा इति। केचित्तु मायैवाविद्या। तत्प्रतिबिम्बितं ब्रह्म जगत्कारणं शुद्धम्। विशुद्धं ब्रह्मामृतत्वालम्बनम्। जीवाश्चाऽविद्योपाधिका इति। अन्ये तु जीवा एव स्वाविद्याशक्त्या प्रत्येकं प्रपञ्चाकारेण विभान्ति। सादृश्याच्च प्रपञ्चैकताऽवभासः। अनेकैरवगतद्विचन्द्रवत्। स्वरूपापेक्षया च ब्रह्म सर्वजगत्कारणमिति। अपरे तु ब्रह्मैकमेव स्वाविद्यया जगदाकारेण विवर्तते स्वप्नादिवदिति मुख्यसिद्धान्तः। न चैकमुक्तौ सर्वमुक्तिः, इष्टत्वात्। अन्यदपि शङ्कान्तरं स्वप्नदृष्टान्तेनैव प्रतिविधेयमिति ब्रह्मणः शास्त्रप्रमाणकत्वसिद्धिरिति।

ज्ञानानन्दैकरूपं निखिलजगदुपादानमीशं प्रभूणाम्
सर्वज्ञं ब्रह्म नित्यं विशदमतितरां निर्गुणं निष्क्रियं च।
एतत्कार्यावमृष्टिं निखिलभववर्तीं सम्यगुद्धूय विध्वा
त्वप्रामाण्यं श्रुतीनां श्रुतिभिरिदमजं ज्ञेयमित्युच्यतेऽस्मिन्॥

ननु कथं ब्रह्मणः शास्त्रप्रमाणकत्वम्? यावताऽऽम्नायस्य क्रियार्थत्वादानर्थक्यं अतदर्थानामित्यक्रियार्थानां आनर्थक्यमाह जैमिनिः। तस्य चैवमभिप्रायः। सिद्धार्थवाक्यानां प्रमाणान्तरसापेक्षत्वात् तत्सत्त्वे नानधिगतार्थगन्तृत्वम् अतोऽप्रामाण्यमित्यानर्थक्यम्। यथा स्मृतेः। तद्विरोधे च बाधितार्थत्वमप्रामाण्यम्, यथा अङ्गुल्यग्रे हस्तियूथशतमित्यादिवाक्यस्य।

अथ वा लोके प्रमाणान्तरसम्भिन्नार्थे शब्दशक्तिग्रहात् तदगोचराणां शब्दानामर्थशून्यत्वमिति। यद्वा सिद्धार्थानां प्रवृत्तिनिमित्तसाध्यप्रयोजनालाभात् अध्ययनविध्यवगतफलवदर्थावबोधतात्पर्याभावादप्रामाण्यमिति।

एवं च वेदान्तानामपि यदि प्रमाणान्तरापेक्षा तदा न प्रामाण्यं। अनधिगतत्वाभावात्। प्रत्यक्षादिविरोधादबोधकत्वञ्च। तथा प्रमाणान्तरसंवादाभावादपि न सिद्धार्थानां ब्रह्मणि प्रामाण्यम्। चक्षुरादीनां प्रमाणान्तरसंवादानपेक्षत्वेऽपि प्रत्यक्षातिरिक्तसिद्धार्थविषये तथा दर्शनात्। तथा इष्टानिष्टप्राप्तिपरिहारलक्षणं प्रयोजनं प्रवृत्तिनिवृत्त्यधीनम्। तच्च सिद्धार्थवेदान्तानां न संभवति। अप्रवर्तकत्वाच्च। अतोऽध्ययनविधिगम्यप्रयोजनवदर्थबोधजनकत्वलक्षणतात्पर्याभावात् अप्रामाण्यप्रसङ्गः। अतः कर्मापेक्षितकर्तृप्रतिपादकत्वेन देवतादिप्रतिपादकवाक्यवत्प्रामाण्यम्। तत्स्तावकत्वेन वा क्षेपिष्ठादिवाक्यवत् प्रामाण्यं। यदि कर्मप्रकरणाद्व्युत्थितत्वान्न कर्माङ्गम् तर्हि पर्णमयीन्यायेन वाक्यात्कर्माङ्गत्वम्। यदि कर्तुः अव्यभिचरितक्रतुसंबन्धाभावादसङ्गाद्वितीयादिरूप-

प्रतिपादने कर्माधिकाराभावाच्च नैवमभ्युपेयते । तर्हि स्वप्रकरणपठितोपासनाविधिशेषत्वमस्तु । न च तत्राऽप्यनुपपत्तिः अद्वितीयब्रह्मप्रतिपादने अधिकारोपमर्दस्य तुल्यत्वात् इति वाच्यम् । अद्वितीयाद्यारोपेणाऽप्युपासनसंभवादिति ।

अत्रोच्यते । किं तात्पर्याभावाद्वेदान्तानामेवंविधब्रह्मप्रतिपादकत्वं निन्हूयेत उत प्रमाणान्तरसापेक्षत्वादिति । बाधकसत्वान्नाद्यः । एवंविधे ब्रह्मणि वेदान्तानां समन्वयात् । न च तात्पर्याभावात् । स एवासिद्धः । उपक्रमादितात्पर्यलिङ्गसत्वात । ननु कोऽयं समन्वयो नाम । परस्परानवच्छिन्नार्थत्वे सत्यनन्याकाङ्क्षत्वं इति वदामः । क्रियाकारकसम्बन्धव्यावृत्यर्थं आद्यविशेषणम् । उद्भिदा यजेतेत्यादौ नामधात्वर्थयोरभेदान्वयव्यावृत्यर्थं द्वितीयविशेषणम् । तस्याऽपूर्वसाङ्क्षत्वात । एतदेवाखण्डार्थता । न चासिद्धिः । तथाहि । द्विप्रकारं हि वेदान्तवाक्यम् । किञ्चिज्जीवब्रह्मणोः ऐक्यपरं महावाक्यं तत्वमसीत्यादि । किंचित्तत्पदार्थप्रतिपादकं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि । तत्राऽऽद्यं तावदखण्डार्थं अकार्यकारणद्रव्यमात्रवृत्तित्वे सति समानाधिकृतत्वात । सोऽयं देवदत्त इति वाक्यवत् । मृद्घटो नीलो घटो गामानयेत्यादौ व्यभिचारवारणाय क्रमेण विशेषणानि । न च दृष्टान्ते साध्यवैकल्यम् । तत्र किं तद्देशैतद्देशादेवैशिष्ट्यं प्रतिपाद्यते । उत तद्विशिष्टयोः । उत तदुपलक्षितयोः ? नाद्यः । प्रत्यभिज्ञासमानविषयकं हीदं वाक्यम् । न च प्रत्यभिज्ञायां तद्देशादेः एतद्देशादेश्चैक्यं प्रतीयते । तयोः भेदात् । अत एव न तद्विशिष्टयोः । नाऽपि तदुपलक्षितस्य । तदैक्यस्याभिज्ञयोरेव सिद्धत्वेन प्रत्यभिज्ञायाः तत्राऽप्रामाण्यप्रसङ्गात् । अतः कालदेशाद्युपाधिनिमित्तभेदाभावोपलक्षितस्वरूपमात्रविषयतया औपाधिकभेदमात्रनिवर्तकत्वेन प्रामाण्यम् । तदुक्तमाचार्यैः । सिद्धं तु निवर्तकत्वादिति । तथा च सोऽयं देवदत्त इति वाक्यस्याऽपि विरुद्धांशपरित्यागेन देवदत्तस्वरूपमात्रे लक्षणया वृत्तिः इति न दृष्टान्तासिद्धिः ।

तथा सत्यं ज्ञानं ब्रह्मेत्यादिकं अखण्डार्थम् । लक्षणवाक्यत्वात । प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवत् । न च तत्राऽपि प्रकर्षप्रकाशचन्द्राणां वैशिष्ट्यानुभवात दृष्टान्तासिद्धिः । अस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति प्रश्नप्रतिवचनत्वेन हीदं वाक्यं प्रवृत्तम् । तच्च चन्द्रप्रातिपदिकार्थमात्रपरत्वेऽस्य वाक्यस्योपपद्यते । अन्यथा प्रश्नप्रतिवचनयोः वैय्यधिकरण्यप्रसङ्गात् । तथा च प्रकृष्टपदं प्रकर्षगुणाभिधानद्वारेण प्रकाशविशेषलक्षणया वर्तते । प्रकाशपदमपि प्रकाशसामान्याभिधानद्वारेण प्रकाशविशेषे लक्षणया वर्तते । तथा च सर्वेषां चन्द्रप्रातिपदिकार्थमात्रवृत्तित्वान्न दृष्टान्तासिद्धिः । तथा च वेदान्तानां एवंविधे ब्रह्मणि तात्पर्यलिङ्गानामुपक्रमोपसंहारा-

अथ सप्तम वर्णकम् ।

ननु जन्माद्यस्य यत इत्यत्र नामरूपाभ्यां व्याकृतस्येत्यादिविशेषणमहिम्ना अन्यथानुपपत्त्या श्रुतार्थापत्तिरूपया जगत्कर्तुः सर्वज्ञत्वं सर्वशक्तित्वं च सिद्धम् । निर्दुष्टश्रुतिसिद्धेऽर्थे सन्देहाभावेन दाढर्यार्थत्वमित्यस्यानुपपत्तेः सर्वत्राऽनाश्वासप्रसङ्गादिदं सूत्रमनारब्धव्यमिति अस्वरसात् पक्षान्तरमाह—अथवेति । पूर्वसूत्रेण यतो वेत्यादिवाक्यार्थनिर्णायकेनार्थात् सर्वज्ञत्वं साधितम् । इह तु उक्तलक्षणलक्षिते ब्रह्मणि प्रमाणमुपन्यस्तम् । लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायात् इत्यभिप्रेत्य सूत्रार्थमाह—यथोक्तमिति । ननु योनिशब्दस्य सर्वत्रोपादानकारणे प्रसिद्धत्वाच्छास्त्रोपादानकं ब्रह्मेत्यसमञ्जसम् । योनिशब्दस्य कारणसामान्यवाचित्वेऽपि शास्त्रकारणकं ब्रह्मेत्यसमञ्जसमिति पक्षद्वयेऽप्यरुच्या कारणसामान्यशब्दस्य विशेषपर्यवसानेन तत्राऽपि तत्वज्ञानप्रकरणवशात् तत्वज्ञानकरणमेव विवक्षितमित्याह—प्रमाणमिति । नन्वहमस्मीति ब्रह्मणः प्रत्यक्षविषयत्वेन शास्त्रानपेक्षितत्वादित्यत आह—यथावत्स्वरूपाधिगम इति । यद्यप्यहमिति ब्रह्म प्रत्यक्षम् । तथाऽपि यथावत्स्वरूपाधिगमो न भवति । ब्रह्मयाथात्म्यज्ञानं हि सकारणबन्धनिवर्तकत्वेन इह प्रमाणफलमपेक्षितम् । तच्च शास्त्रप्रमाणैकजन्यम् । अतः तत्वज्ञानाय शास्त्रमपेक्षितमेवेति दिक् । शास्त्रप्रमाणकत्वमेवोपपादयति—शास्त्रादेवेति । शास्त्रादन्यतो ब्रह्म नाऽधिगम्यते । किन्तु शास्त्रादेवेति सूत्रकाराशयमाह—इत्यभिप्राय इति । सूत्रकृत इति शेषः । शास्त्रयोनित्वाच्छास्त्रप्रमाणकत्वं हेतुः प्रतीयते । किमत्र साध्यम् । प्रकृतं तु सर्वज्ञत्वादिलक्षणलक्षितं ब्रह्म । तथा च ब्रह्म सर्वज्ञत्वादिलक्षणं शास्त्रप्रमाणकत्वादित्यत्राऽन्वयदृष्टान्ताभावः । व्यतिरेके कुलालादिदृष्टान्तसत्वेऽपि आश्रयस्य ब्रह्मणः प्रत्यक्षाद्यसिद्धत्वेनाऽश्रयासिद्धो हेतुस्स्यात् । शास्त्रप्रमाणादेव ब्रह्मणः प्रसिद्धत्वे आत्माश्रयादिदोषः स्यादिति चेत् । उच्यते । न वयं शास्त्रप्रमाणकत्वेन ब्रह्मणः सर्वज्ञत्वं साधयामः । येनोक्तदोषः स्यात् । किन्तु यथाशास्त्रमेवाऽवगन्तव्यं ब्रह्म नानुमानादिनेत्येव ब्रूमः । 'न चक्षुषा गृह्यते नाऽपि वाचा' 'नैषा तर्केण मतिरापनेया' इत्यादि श्रुतेः । तस्मादृग्वेदादिशास्त्रस्याऽनतिशङ्कनीयत्वाद्यथाशास्त्रं ब्रह्म प्रतिपत्तव्यमित्यनवद्यम् । ननु शास्त्रप्रमाणकं ब्रह्म यथाशास्त्रं प्रतिपत्तव्यमिति पूर्वसूत्रोदाहृतवाक्येनाऽवगतमेव । अत इदं सूत्रं अनर्थकमिति शङ्कते । शास्त्रं किमित्यत आह—यतो वेति । आदिपदेन यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नामरूपं अन्नं च जायत इत्यादि गृह्यते । अस्त्वेवंजातीयकं शास्त्रमुदाहृतम् । पूर्वसूत्रे तावत्तर्किते किमिष्टं सिद्धमित्यत आह—किमर्थं तर्हीति । अनेन सूत्रेण यन्निर्णेतव्यम् तत्पूर्वसूत्रेणैव वृत्तमिति

वैयर्थ्यहेतुमाह—यावतेति। एवं पूर्वपक्षे सिद्धान्तं वक्तुं प्रतिजानीते—उच्यत इति। पूर्वोत्तरसूत्रयोः विषयभेदं दर्शयन् सूत्रानर्थक्यं परिहरति—तत्रेति। पूर्वसूत्रे जिज्ञास्यब्रह्मलक्षणपरं शास्त्रमुदाहृतम्। तथापि शास्त्रत्वावच्छिन्नशास्त्रस्य सर्वस्याऽपि ब्रह्मण्येव तात्पर्यं सिद्धवत्कृत्य कृत्स्नशास्त्रस्य सूत्राक्षरेण स्पष्टमनुपादानात् यतो वेत्याद्येकदेशस्यैवोपादानात्कृत्स्नशास्त्रप्रमाणकं ब्रह्मैवेत्यनुपादानात् शास्त्रपदघटितैतत्सूत्राभावे पूर्वसूत्रोदाहृतमपि शास्त्रमनुदाहृतप्रायं अविवक्षितं स्यादिति जन्मादिकेवलमनुमानमुपन्यस्तमित्याशङ्का स्यात्। तामाशङ्कां निवर्तयितुं इदं सूत्रमिति सूत्रभाष्यकृतोरभिप्रायः।

इति सप्तमवर्णकम्।

---

दीनां विद्यमानत्वान्न तात्पर्याभावादप्रामाण्यम्। तथा हि—सदेव सौम्येत्युपक्रमः। ऐतदात्म्यमिदं सर्वं इत्युपसंहारः। तत्त्वमसीति नवकृत्वोऽभ्यासः। प्रमाणान्तरानधिगतत्वं च। तथा फलमपि तस्य तावदेव चिरमित्यादि। अर्थवादोऽपि अनेन जीवेनाऽऽत्मनाऽनुप्रविश्येत्यादिः। उपपत्तिरपि मृल्लोहतप्तपरशुदृष्टान्तादिरूपा। एवं भाष्योदाहृतासु सर्वासु श्रुतिषु तात्पर्यलिङ्गानां सत्वादेवंविधे ब्रह्मणि तात्पर्याभावादप्रामाण्यं न शक्यं वदितुम्। नाऽपि प्रमाणान्तरसंभवादप्रामाण्यम्। न हि संवादलक्षणं प्रामाण्यम्। अपि तु बोधकत्वलक्षणम्। चक्षुरादिषु तथा दर्शनात्। न च तद्व्यतिरिक्ते तथा वेदान्तव्यतिरिक्ते लौकिकवाक्ये संवादापेक्षेत्यपि वक्तुं शक्यत्वात्।

ननु लोके प्रमाणान्तराधिगतपदार्थे शक्तिग्रहाद्वेदेपि तदभावे अप्रामाण्यमिति चेत्। किं व्युत्पित्सोः यत् प्रमाणान्तरं तत्संभिन्ने शक्तिग्रहः, उत श्रोतुः, अथ वक्तुः? नाऽऽद्यद्वितीयौ। तयोः वाक्यप्रवृत्त्युत्तरकालीनत्वात्। नाऽपि तृतीयः। स्वप्रत्यक्षमूलव्यवहारे व्यवहर्तव्यज्ञानमात्रस्य कारणत्वेन कॢप्तत्वान्न वाक्यप्रयोगोपक्षीणवक्तृप्रमाणविशिष्टे शक्तिं कल्पयति। गौरवात्। नाऽप्युपजीव्यप्रत्यक्षादिप्रमाणविरोधादप्रामाण्यम्। तेषामेवाद्वितीये ब्रह्मणि तात्पर्यवद्भिर्वेदान्तैः बाधितत्वेन व्यवहारसमर्थवस्तुमात्रविषयत्वात्। न चोपजीव्यत्वात्तैरेव वेदान्तबाधः। किं स्वरूपेणोपजीव्यं प्रत्यक्षादि। उत परमार्थविषयत्वेन ? आद्ये न तस्य बाधः। व्यावहारिकस्य तस्याऽङ्गीकारात्। द्वितीये न तस्योपजीव्यत्वम्। किन्तु स्वरूपस्य। अतो न वेदान्तानां बाधितार्थकत्वम्।

नाऽपि प्रयोजनाभावात्फलवदर्थावबोधकत्वलक्षणप्रामाण्याभावः। इष्टप्राप्त्यनिष्टपरिहारलक्षणं हि प्रयोजनम् लोके द्विप्रकारं दृष्टम्। इष्टं तावत्किञ्चिदप्राप्तं प्राप्यते

ग्रामपश्वादि । किञ्चित्प्राप्तमेव भ्रान्त्या अप्राप्तमिव प्राप्यते । यथा स्वकण्ठगतविस्मृतसुवर्णादि । अनिष्टमपि किञ्चित्परिह्रियते । यथाऽहिकण्टकादि, किञ्चित् परिहृतमेव भ्रान्त्या अपरिहृतमिव परिह्रियते । यथा रज्ज्वामारोपितः सर्पः तत्राप्राप्तप्राप्त्यपरिहृतपरिहारयोः प्रवृत्तिनिवृत्तिसाध्यत्वेऽपीतरयोः न तत्साध्यत्वं भ्रान्तिमात्रव्यवहितत्वेन ज्ञानैकसाध्यत्वात् । तथा च प्रत्यगात्मनि प्रतीयमानार्थजातस्य मिथ्याज्ञानविलसितत्वेन तस्य यथावत्स्वरूपावगमेनानर्थनिवृत्तिः ब्रह्मानन्दस्य निरतिशयस्य प्राप्तिः इति सप्रयोजनतया शास्त्रप्रमाणकत्वं उपपद्यत इति **समन्वयसूत्रप्रथमवर्णकं सिद्धम्**।

**अष्टमवर्णकम्** ।

अत्रापरे प्रत्यवतिष्ठन्ते । यद्यपि शास्त्रप्रमाणकं ब्रह्म तथाऽपि प्रतिपत्तिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते । यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत् । कुत एतत् ? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य । तथा च शास्त्रतात्पर्यविदां वचनम् । दृष्टो हि तस्याऽर्थः कर्मावबोधनं इत्यादि ।

ननु नैकान्ततः प्रवृत्तिनिवृत्तिप्रयोजनं शास्त्रं सिद्धार्थानां अपि फलिता द्रुमाः पुत्रस्ते जात इत्यादीनां प्रयोजनवत्तादर्शनादिति चेत् । न, प्राथमिकव्युत्पत्तिवशात्खलु शब्दार्थप्रत्ययः । सा च कार्यान्विते न तु पदार्थमात्रे । नापीतरान्विते पदार्थे । तथा हि । प्रयोक्ता तावत् प्रयोज्यस्य प्रवृत्तिनिवृत्तिसाध्यं प्रयोजनं उद्दिश्य वाक्यं प्रयुङ्क्ते गामानयेति । अन्यः तच्छ्रवणसमनन्तरं प्रवर्तते । व्युत्पित्सुः तां प्रवृत्तिमुपलभ्य तया ज्ञानमनुमाय तत्र वाक्यसामर्थ्यं कल्पयति । तच्च प्रवर्तकं ज्ञानं कार्यान्वितपदार्थसंसर्गविषयकम् । स्वप्रवृत्तौ तस्य हेतुत्वावगमात् । पश्चादावापोद्वापाभ्यां पदार्थशक्तिकल्पनासमये कार्यान्वितपदार्थे शक्तिं कल्पयति । प्राथमिकव्युत्पत्त्यनुरोधात् । ननु लाघवादितरान्विते शक्तिरस्तु । अन्यथा प्रमाणान्तरसिद्धकार्यान्वितइत्यपि स्यादिति चेत् ; न, इतरान्वित इत्युक्ते किन्तदित्यपेक्षादर्शनात् कार्यानुरूपविशेषग्रहणं युक्तम्। न ततः परमाकाङ्क्षाऽस्ति। येन प्रमाणान्तरसिद्धत्वं विशेषणं स्यात् ।

ननु कार्यपदस्य कार्यान्तराभावादितरान्विते शक्तिः वक्तव्या। तद्वत्सर्वपदानां अस्त्विति चेत् ; न, धात्वर्थस्याऽपि कार्यत्वात्तदन्विते लिङादिपदशक्तिग्रहोपपत्तेः। ननु स्वप्रवृत्ताविष्टसाधनत्वज्ञानस्यैव हेतुत्वात्तत्रैव शक्तिकल्पना, न कार्यान्वित इति चेत् ; न, अतीतानागतेष्टसाधनज्ञानेऽपि प्रवृत्त्यभावेन तस्य कार्यत्वज्ञानोपक्षीणत्वात्। पुत्रस्ते जात इत्येवमादीनां

चैवमेवावधार्यतां इति कार्यान्वयः कल्पनीयः। तथा च वेदान्तानामपि प्राथमिकव्युत्पत्त्यनुरोधात् प्रतिपत्तिविधिशेषतयैव प्रामाण्यम्।

नन्वथातो ब्रह्मजिज्ञासेति पृथगारम्भाज्जिज्ञास्यवैलक्षण्यमवगतम्। वेदान्तानामपि कार्यपरत्वे तन्न स्यादिति चेत्। न। कर्मविधिज्ञानविधिरूपवैलक्षण्यादेव तदुपपत्तेः। नन्वत्र विधेः अश्रवणात्तच्छेषत्वं दूरनिरस्तमिति चेत्; न, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, आत्मेत्येवोपासीत, आत्मा वा अरे द्रष्टव्यः, इत्यादीनां विद्यमानत्वात्तद्विषयसमर्पणेन स्वरूपप्रतिपादकानां उपयोगोपपत्तेः। अतः प्राथमिकव्युत्पत्त्यनुरोधात् कार्यपरत्वम्। किञ्च नियोगाधीनप्रवृत्तिनिवृत्ती विना न प्रयोजनावाप्तिः। न च विस्मृतसुवर्णज्ञानवद्रज्जुरियमिति ज्ञानवच्च किं न स्यादिति वाच्यम्। तद्वदत्र प्रयोजनानुपलब्धेः। श्रुतब्रह्मणोऽपि यथापूर्वं संसारानुवृत्तिदर्शनात्। श्रवणानन्तरं मननादिसाधनान्तरविधानाच्च। तस्मात्प्रतिपत्तिविधिशेषतयैव वेदान्तैः ब्रह्म प्रतिपाद्यत इति प्राप्ते

अभिधीयते। न तावन्नियोगनिष्ठत्वं वेदान्तानां वक्तुं शक्यम्। नियोगविषयानिरूपणात्। तथाहि। किं शब्दज्ञानं विधेयम्। उत तदभ्यासः। किं वा ध्यानम्। अथवा ज्ञानान्तरम्? न तावदाद्यः। विदितपदपदार्थसङ्गतिकस्य वाक्यश्रवणमात्रसाध्ये तत्र विध्यनुपपत्तेः। नाऽपि द्वितीयः। किं तस्येष्टविषयज्ञानत्वात् मर्दनजन्यसुखवत् दृष्टसुखं प्रयोजनम्। उत साक्षात्कारः। नाऽद्यः। विधिवैयर्थ्यात्। न द्वितीयः। परोक्षज्ञानाभ्यासमात्रादपरोक्षज्ञानानुपपत्तेः। न हि लैङ्गिकज्ञानं शतशोऽप्यभ्यस्यमानमपरोक्षज्ञानजनकं दृष्टम्। नापि तृतीयः। तद्यपि शाब्दज्ञानाभ्यासाद्विलक्षणम्। ध्यानस्याऽऽरोपेणाऽपि संभवात्। तस्य ध्येयापरोक्षहेतुत्वमपि नष्टपुत्रसाक्षात्कारादावगतम्। तथाऽपि न भ्रमरूपसाक्षात्कारफलाय तद्विधिः, अन्वयव्यतिरेकसिद्धत्वात्। नापि प्रमारूपसाक्षात्काराय तस्य प्रमाणमात्रजन्यत्वेन ध्यानासाध्यत्वात। नापि मोक्षफलाय स किं साक्षात्फलम्। उतादृष्टद्वारा? नाद्यः, अविद्यानिवृत्तिलक्षणमोक्षस्य ज्ञानमात्रसाध्यत्वात्। न द्वितीयः; अदृष्टाधीनत्वे कर्मफलवदनित्यत्वप्रसङ्गात्। नाऽपि चतुर्थः। तत्किंकर्मकं किंकरणमिति वक्तव्यम्।

ननु किमत्र वक्तव्यम्। श्रूयते हि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति। अस्य चायमर्थः। श्रवणमनननिदिध्यासनैः करणैः वेदानुवचनयज्ञदानाद्यनुगृहीतैः मोक्षकामो ब्रह्मण्यपरोक्षज्ञानफलं कुर्यादिति। तन्न, तद्यदि प्रमारूपं ज्ञानम् तर्हि प्रमाणपरतन्त्रत्वान्न विधेयम्।

अप्रमात्वे पूर्वोक्तदोषः। किञ्च वेदान्तानां विधिपरत्वे ब्रह्मस्वरूपेऽपि तात्पर्यमस्ति, उत न? आद्ये वाक्यभेदः। द्वितीये ब्रह्मस्वरूपासिद्धिः।

ननु महातात्पर्यं विधौ अवान्तरतात्पर्यं ब्रह्मणि। यथा कर्मविधिपराणामपि मन्त्रदेवतादिप्रतिपादकत्वं इति चेत्। न। किं प्रत्यगभिन्नं ब्रह्म प्रतिपाद्यते। उत तद्भिन्नम्। नाऽद्यः। प्रत्यक्षादिप्रमाणविरोधात्। देवताविग्रहादौ तु प्रमाणान्तरविरोधाभावात् अवान्तरतात्पर्यवशात् प्रमाणत्वोपपत्तेः। ननु द्वितीयः पक्षः किन्न स्यात्। 'अथ यदतः परो दिवो ज्योतिः दीप्यत' इति ब्रह्मणो विकारवर्तित्वप्रतिपादनात्, तत्र च प्रमाणान्तरविरोधाभावात् देवताधिकरणन्यायेन ब्रह्मस्वरूपप्रतिपादनसम्भवात्। न चोपासनाकर्मजन्यत्वे मोक्षस्याऽनित्यत्वप्रसङ्ग इति वाच्यम्। न च पुनरावर्तते, इमम्मानवमावर्तन्नावर्तन्ते, इत्यादिश्रुतिवशादेव नित्यत्वसिद्धेरिति चेत्।

न, कर्मब्रह्मविद्यफलयोः वैलक्षण्यात्। कर्मफलं तावच्छरीरेन्द्रियादिजन्यमनित्यं सातिशयं च श्रुतिन्यायाभ्यामवगम्यते। तद्यथेह कर्मचितो लोकः क्षीयते इत्याद्या श्रुतिः। यत् कृतकं तदनित्यमिति न्यायः। तथोर्ध्वगतेष्वधोगनेषु शरीरेन्द्रियादिभिः उपभुज्यमानं सातिशयं सुखदुः खात्मकं कर्मफलं श्रूयते। मोक्षस्तु नित्यो निरतिशयोऽ शरीरत्वलक्षणः श्रुतिन्यायाभ्यामेवाऽवगतः। ब्रह्म वेद ब्रह्मेव भवति। विद्ययाऽमृतमश्नुते। ब्रह्मसंस्थोऽमृतत्वमेति। अथायमशरीरोऽमृतः प्राणो ब्रह्मैवेत्याद्या श्रुतिः। न्यायतश्च मोक्षस्य नित्यत्वं गम्यते। पुनरावृत्तौ पुनर्बन्धान्मोक्षशब्दस्योपचरितार्थता स्यादिति। यदि मोक्षस्य विधीयमानोपासनाफलत्वं स्यात, तदा देशकालकर्त्रतिशयात्सातिशयोपासनाफलस्य सातिशयत्वं अनित्यत्वं च प्रसज्यत इति श्रुतिन्यायसिद्ध क्रियाफलवैलक्षण्यं न स्यात्। तथा च शरीरेन्द्रियादिभिः भुज्यमानत्वं वैषयिकसुखादिसम्बन्धः स्यात्। तथा च 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिः अस्ति अशरीरं वाव न सन्तं प्रियाप्रिये स्पृशत' इति मुक्तिप्रतिपादिका श्रुतिरुपरुध्येत।

न चाशरीरत्वमपि कर्मजन्यम् कर्मणां विचित्रफलत्वादिति वाच्यम्। किं तत् सशरीरत्वं यस्याऽभावोऽशरीरत्वमुपासनाकर्मफलमुच्यते। न तावच्छरीरसंयोगः। निरवयवस्याऽऽत्मनः तदयोगात। नाऽपि समवायः। तदभावात्। नाऽपि तादात्म्यम्। गुणगुण्यादिभावाभावात्। तथा च केनाऽपि संबन्धेन सशरीरत्वासम्भवादाविद्यकं सशरीरत्वं कर्मणा निरस्यत इति वाच्यम्। नच तदुपपद्यते। अविद्याया विद्यामात्रनिवर्त्यत्वात्।

यदप्युक्तम् । कर्मजन्यत्वेऽपि मोक्षस्य नित्यत्वं श्रुतिवशादिति । तन्न, 'ब्रह्मलोकं अभिसंपद्यते न च पुनरावर्तते' इति श्रुतिस्तावत् नापुनरावृत्तौ तात्पर्यवती ब्रह्मलोकाभिसंपत्तिसमये पुनरावृत्तिप्रसक्त्यभावेन निषेधानुपपत्तेः । न च कालान्तरे प्रसक्तस्य निषेधो नच पुनरावर्तयिष्यत इति । यत्कृतकं तदनित्यमित्यनुमानविरोधेऽध्याहारानुपपत्तेः । अत एवंविधाः श्रुतयोऽर्थवादरूपत्वान्न नित्यत्वपराः । किं च न तेषामिह पुनरावृत्तिः इमम्मानवमावर्तं इत्यादौ इममिहेति विशेषणात्मानवान्तरे आवृत्त्यवगमान्न नित्यत्वसिद्धिः । अतः स्वतन्त्रादृष्टद्वारा उपासनया नोत्पाद्यो मोक्षः । नाप्याप्यत्वमुपासनया । ब्रह्मणः सर्वगतत्वेन नित्याप्तत्वात् । ब्रह्मणो विकारावर्तित्वेऽपि नाप्यत्वं, आप्तिः संयोगः उत तत्तादात्म्यम् । नाद्यः । संयोगस्य विप्रयोगावसानत्वेनाऽनित्यत्वप्रसङ्गात् । न द्वितीयः । पूर्वरूपे स्थिते नष्टे वा अन्यस्याऽन्यात्मताऽयोगात । नाऽपि विकार्यत्वम् । निर्विकारत्वश्रुतेः । नाऽपि संस्कार्यत्वम् । निर्गुणत्वेन गुणाधानस्याऽनुपपत्तेः । नाऽपि मलापकर्षः नित्यशुद्धत्वात् ।

ननु यथा मलिन आदर्शो निघर्षणक्रियया संस्क्रियते । तद्वत्किन्न स्यादिति चेत् । न । किं स्वाश्रयया क्रिययाऽऽत्मा संस्क्रियते । उतान्याश्रयया? नाद्यः निष्क्रियत्वश्रुतेः । न द्वितीयः । अन्याश्रयक्रियाया अविषयत्वादेव न तया संस्कार्यः । अतः तत्वज्ञानैकासाध्योऽविद्यानिवृत्तिलक्षणो मोक्षः सर्ववादिसंप्रतिपन्नः ।

अत एवानन्तं वै मनोऽनन्ता वै विश्वे देवा इतिवत् संपद्रूपत्वं, नाम ब्रह्मेत्यादिवत् अध्यासरूपत्वम् , वायु र्वाव संवर्ग इत्यादिवत् विशिष्टक्रियायोगोपास्तिर्वेत्यपास्तम् । मोक्षस्यानित्यत्वादिप्रसङ्गात् । अत एव ब्रह्म वेद ब्रह्मैव भवतीत्याद्या भाष्योदाहृताः श्रुतयः ब्रह्मज्ञानमोक्षयोः मध्ये कार्यान्तरं निवारयन्ति । अत एव च तरति शोकमित्याद्या अविद्यानिवृत्तिमात्रमेव मोक्षं दर्शयन्ति । किञ्च किं वेदान्तानां ब्रह्मणि तात्पर्याभावात् संपदादिपरत्वमुच्यते, उत कार्यान्वितव्युत्पत्तिबलात् । नाद्यः असिद्धेः । तथा हि—तत्वमसीति नवकृत्वोऽभ्यस्यानेन जीवेनाऽऽत्मनानुप्रविश्येत्यैक्यार्थसिद्ध्येऽर्थवादो गृह्यते । अथ येऽन्यथातो विदुः अन्यराजानः ते क्षय्यलोका भवन्तीति भेददर्शनं निन्द्यते । तथा अहं ब्रह्माऽस्मीत्यभ्यस्य, स एष इह प्रविष्ट इत्याद्यर्थवादः । अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीत्यादिभेदनिषेधश्च तात्पर्यहेतुः आदीयते । तथा एष त आत्मेति बहुकृत्वोऽभ्यस्तस्य नान्योऽतोऽस्ति द्रष्टेत्यादिभेदापवादेन तात्पर्यं ज्ञाप्यते । तथा स यश्चायं पुरुषे । यश्चासावादित्ये । सः

एकः इत्यस्य तत्सृष्ट्वा तदेवानुप्राविशदित्यर्थवादः । तथा उदरमन्तरं कुरुते । अथ तस्य भयं भवतीति भेददर्शनापवादः । अतो न तात्पर्याभावात् ब्रह्मपरत्वं प्रत्याख्यातुं शक्यम् । न द्वितीयः । न हि सर्वेषां पदार्थानां साक्षात्कार्यान्वयः संभवति । क्रियागुणादीनां द्रव्यमात्रान्वितत्वात् । तथा च तत्साधारण्यार्थं अन्विते शक्तिः इत्येव युक्तम् ।

किञ्च कार्यपदस्य कार्यान्तराभावादितरान्विते शक्तिः वाच्या । न च धात्वर्थरूपकार्यान्विते शक्तिः । नियोगकार्यत्वसिध्युत्तरकालीनत्वाद्धात्वर्थकार्यत्वस्य । तथा च परस्पराश्रयप्रसङ्गः । किञ्च व्याकरणादिभिः सिद्धेऽपि शक्तिग्रहसंभवात् न कार्यान्वितव्युत्पत्तिनियमः । अत एव फलिता द्रुमाः, पुत्रः ते जातः इत्यादावपि सिद्धार्थमात्रादन्वयबोधः । नाऽध्याहारे प्रमाणमस्ति । अपि च नियोगवादिनाऽपि न ब्राह्मणो हन्तव्यः, न सुरा पातव्येत्यादौ न कार्यान्वयो वक्तुं शक्यते । निषेधस्याऽक्रियात्वात् क्रियाऽसाधनत्वाच्च ।

नन्वेवं वाक्यं निषेधमात्रपर्यवसितम् । तथा हि—किं ब्राह्मण्यं निषिध्यते । उत हननम् । आहो तद्गतमिष्टसाधनत्वम् । नाऽद्यः । तस्य प्रत्यक्षसिद्धत्वात् । न द्वितीयः । पुरुषस्य हनने प्रवृत्तत्वात् । न तृतीयः । हननस्येष्टसाधनत्वाच्च । तस्माद्धननविरोधिसङ्कल्पो विधेयः, नेक्षेतोद्यन्तं आदित्यमित्यादावीक्षणाभावसङ्कल्पवदिति चेत् । न तत्र हि तस्य व्रतमिति व्रतशब्देनाऽनुष्ठेयवाचिनोपक्रमात् पर्युदासलक्षणया सङ्कल्पो विधेयः । नात्र लक्षणायां प्रमाणं अस्ति । न च प्रतिषेधान्वयानुपपत्तिरेव प्रमाणमिति वाच्यम् । विध्यर्थेनान्वयसम्भवात् । न च हननस्येष्टसाधनत्वात्तत्र निषेधान्वयानुपपत्तिरिति वाच्यम् । इष्टं हि नाम तत् यद्बलवदनिष्टासम्बन्धि । तथा च विध्यर्थेन नञ्सम्बन्धादर्थात् बलवदनिष्टसम्बन्धित्वज्ञाने सति हननान्निवृत्तिरुपपद्यते । सा च यद्यपि हननप्रागभावरूपत्वात् स्वरूपेण न साध्या । तथाऽपि हननकारणप्रतिबन्धद्वारेणोत्तरकालसंबन्धितया साध्यते । अत एव विधिप्रतिषेधरूपद्वैविध्यमुपपद्यते । सङ्कल्पलक्षणायां हि सर्वं विधिवाक्यमेवेति प्रतिषेधचोदन दत्तजलाञ्जलिस्स्यात् । तथा च तद्वदेव कार्यविधुरस्यापि वेदान्तवाक्यस्य प्रामाण्यसम्भवान्नाप्रामाण्यशङ्का संभवति ।

यदप्युक्तम् । वेदान्तानां स्वरूपनिष्ठत्वे प्रवृत्तिनिवृत्तिसाध्यप्रयोजनालाभ इति । तन्न । ज्ञानमात्रसाध्यस्याऽपि कण्ठगतविस्मृतसुवर्णादावुपपादितत्वात् । न च श्रुतब्रह्मणोऽपि यथापूर्वं संसारदर्शनान्नैवमिति वाच्यम् । असिद्धेः । तथा हि—कर्तृत्वादिलक्षणो हि संसारो देहेन्द्रियादिष्वहं ममाभिमाननिमित्तः । तत्वज्ञानेन चाऽभिमाने निवृत्ते कुतः तत्सम्भवः ?

न हि धनाभिमानिनः तदपहारनिमित्तं दुःखं दृष्टमिति धनाभिमानशून्यस्य तदपहारनिमित्तं दुःखं संभावयितुं शक्यम् ।

यदप्युक्तं ज्ञानोत्तरं मननादिसाधनान्तरविधानाद्विधिपरत्वं वेदान्तानामिति । तन्न । मनननिदिध्यासनयोरपि ज्ञानहेतुत्वेन तदुत्तरकालीनत्वादपरोक्षानुभवस्य तदनुरोधाद्विधिपरत्वकल्पनानुपपत्तेः । तत्वज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वेन कृत्यसिद्धत्वादपि न तत्र विधिसम्भवः । अतो वेदान्तेषु श्रूयमाणा अपि विधयोऽन्यविषयप्रवृत्तिविमुखीकरणेन विधिगुणयोगाद्वा अर्हार्थतया वा कथञ्चित् नेतव्याः । तथा च वेदान्तवाक्यात्प्रत्यगभिन्नब्रह्मावबोधे सत्यविद्यानिवृत्तौ विस्मृतसुवर्णप्राप्तिवत् ब्रह्मप्राप्तिलक्षणनित्यपुरुषार्थसिद्धेः । अत एव पृथक्छास्त्रारम्भोऽथाऽतो ब्रह्मजिज्ञासेति । अन्यथा वेदान्तानामपि कार्यनिष्ठत्वेऽथातो धर्मजिज्ञासेत्येव प्रतिज्ञातत्वात् पुनः प्रतिज्ञा व्यर्था स्यात् ! यदि मनोलक्षणसाधनभेदात् पुनः प्रतिज्ञा । तदा अथातः परिशिष्टधर्मजिज्ञासेति स्यात् । अथाऽतः क्रत्वर्थपुरुषार्थयोः जिज्ञासेतिवत् । न ब्रह्मग्रहणं अर्थवत् । अतः सर्वज्ञबादरायणप्रणीतब्रह्मजिज्ञासासूत्रानुरोधात् ब्रह्मात्मैक्यमात्रपरं वेदान्तवाक्यमिति तन्निर्णये निःश्रेयसप्राप्तिरिति समन्वयसूत्रद्वितीयवर्णकं सिद्धम् ।

---

# ४ समन्वयाधिकरणम् ।

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै० सू० १।२।१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्। अतो वेदान्तानामानर्थक्यं, अक्रियार्थत्वात्। कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वं, उपासनादिक्रियान्तर-विधानार्थत्वं वा। नहि परिनिष्ठितवस्तुप्रतिपादनं संभवति, प्रत्यक्षादि-

---

अथ अष्टमवर्णकम्

ननु पूर्वसूत्रेण शास्त्रप्रमाणकं ब्रह्मेति वदता शास्त्रस्य ब्रह्मण्येव तात्पर्यं अवगतम्। तदेव न सम्भवति। कार्यपरत्वात्कृत्स्नशास्त्रस्येति पूर्वमीमांसकः आक्षिपति—कथं पुनरिति। शास्त्रस्य कार्यपरत्वेन ब्रह्मणि तात्पर्याभावान्न शास्त्रप्रमाणकं ब्रह्मेत्यर्थः। ननु कार्यपरस्यापि शास्त्रस्य सिद्धब्रह्मपरत्वमप्यस्तु। संयोगपृथक्त्वन्यायादित्याशङ्क्य वाक्यभेदप्रसङ्गेन सिद्धब्रह्मबोधे फलाभावेन च न सिद्धपरत्वमिति निर्णेतुं स्वीयतन्त्र-सूत्रमाह—यावता आम्नायस्येति। अतदर्थानां कार्यव्यतिरिक्तसिद्धार्थबोधकवाक्यानां आनर्थक्यं फलवैधुर्यम्। अतोऽनित्यं अप्रमाणमुच्यत इति सूत्रतात्पर्यमित्याहुः। अस्तु पूर्वकाण्डे सिद्धार्थबोधकानां आनर्थक्यम्। माभूद्वेदान्तानां आनर्थक्यं इत्यत आह—अत इति। तत्र हेतुः अक्रियेति। ननु स्वाध्यायविध्युपादापितवेदभागस्य वेदान्तस्याऽनर्थक्ये तेन दृष्टान्तेन तदितरभागस्य कर्मकाण्डस्याप्यप्रामाण्यं स्यादित्याशङ्क्य वेदान्तानामपि कार्य-परत्वेनैव प्रामाण्यमित्याह—कर्तृदेवतेति। य आत्मा अपहतपाप्मा, अयमात्मा ब्रह्मेत्यादि-वाक्यानां कर्तृस्वरूपप्रतिपादनपरतया सर्वं खल्विदं ब्रह्म यस्सर्वज्ञः सर्वविदित्यादिवाक्या-नां देवतास्वरूपप्रतिपादनपरतया क्रियाङ्गत्वम्। यदि प्रकरणान्तरभयान्नैवं अभ्युपगम्यते। तथाऽपि स्वप्रकरणस्थितोपास्तिक्रियाविधिशेषत्वं वा अस्तु। अतो न वेदान्तानां सिद्धेऽर्थे प्रामाण्यमिति भावः। किञ्च प्रत्यक्षाद्यवगतपुरुषार्थोपायप्रकाशनपरत्वं वेदस्य निर्धारितं विधिकाण्डे, पुरुषार्थोपायश्च क्रियैव, अतस्तां विहाय सिद्धवस्तुप्रतिपादनं न संभवतीत्याह—न हि परिनिष्ठितेति। तत्र हेतुमाह—प्रत्यक्षेति। अनधिगताबाधितार्थ-बोधकं वाक्यं प्रमाणम्। इह तु प्रत्यक्षाद्यधिगतं परिनिष्ठितं ब्रह्मवस्तु प्रतिपादयच्छा-

विषयत्वात्परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्। अत एव 'सोऽरोदीत्' इत्येवमादीनामानर्थक्यं मा भूदिति 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' (जै० सू० १।२।७) इति स्तावकत्वेनार्थवत्त्वमुक्तम्। मन्त्राणां च 'इषे त्वा' इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम्। न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति, क्रियाविषयत्वाद्विधेः। तस्मात्कर्मापेक्षित-कर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम्। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते तथापि स्ववाक्यगतोपासनादिकर्म-परत्वम्। तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते—

---

स्त्रं अनुवादलक्षणोऽर्थवादः स्यादिति भावः। ननु फलवदर्थावबोधपरत्वात् शास्त्रस्य ब्रह्मविदाप्नोति परं इति ब्रह्मावबोधे फलभेददर्शनान्नार्थवादतेत्यत आह—तत्प्रतिपादने चेति। दुःखं हेयं सुखं उपादेयश्च पुरुषार्थः। परिनिष्ठितवस्तुबोधे सति न हेयं उपादेयं वा किञ्चिदस्ति। अतस्तत्प्रतिपादकस्य अर्थवादतेति भावः। सिद्धार्थबोधकवाक्यानां अध्ययन-विध्युपादापितानां आनर्थक्यमयुक्तमित्याशङ्क्य तत्रैव सिद्धान्तिसंमतमर्थमाह—अत एवेति। परिनिष्ठवस्तुप्रतिपादनफलाभावादेवेत्यर्थः। सिद्धार्थबोधकवाक्यानां सोरोदीत्येवमा-दीनां विधिशेषत्वेन विधेयप्राशस्त्यसमर्पकत्वेन विध्येकवाक्यतया प्रामाण्यं सिद्धान्तितम्। तथा मन्त्राणामपि क्रियाशेषत्वं सिद्धान्तितं इत्याह—मन्त्राणां चेति। इषेत्वेत्या-दयो मन्त्राः क्रत्वपेक्षितदेवतादिकं प्रकाशयन्ति क्रतावुपकुर्वन्तीति हि तेषां सिद्धान्तः। तदनुवदति—उक्तमिति। निष्कृष्टार्थमाह—अतो न क्वचिदिति। अलौकिकविषयत्वाददृष्टत्वं भूषणमेवेत्यत आह—उपपन्ना वेति। विधिनाऽनुष्ठितस्यैव कर्मणः फलावश्यंभावात् विधिं विनाऽनुष्ठानानुपपत्तेः पुरुषार्थसाधनत्वेन विध्यर्थस्यैव ज्ञेयत्वाद्विधिरेव श्रुत्यर्थ इति भावः। ननु सिद्धे वस्तुन्यपि विधिरस्त्वित्यतः आह—न चेति। तत्र हेतुः-क्रियाविष-यत्वादिति। क्रियावाचकत्वादित्यर्थः। पूर्वपक्षमुपसंहरति—तस्मादिति। भिन्नप्रकरणत्वा-

## तत्तु समन्वयात् ॥ ४ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । तद्ब्रह्म सर्वज्ञं सर्वशक्ति

---

त्कर्मविशेषकत्वं न संभवतीति शङ्कते—अथेति। परिहरति—तथाऽपीति। वेदान्तवाक्येष्वेव मनो ब्रह्मेत्युपासीत, आदित्यो ब्रह्मेत्यादेशः, स क्रतुं कुर्वीतेत्याद्युपास्तिविधयो दृश्यन्ते। तच्छेषतया सिद्धार्थबोधकवाक्यानां प्रामाण्यं सुवचम्। अतोऽस्य ब्रह्मणः शास्त्रप्रमाणकत्वं यदुक्तम् तन्न संभवतीत्युपसंहरति—तस्मादिति। पूर्वपक्षमनूद्य सिद्धान्तं वक्तुं प्रतिजानीते—इति प्राप्त इति।

सूत्रमादाय सिद्धान्तयति—तत्तु समन्वयादिति। अस्य सूत्रस्य वेदान्ता विषयाः। ते किं कार्यपराः, उत नित्यशुद्धब्रह्मपराः इति फलवत्वाफलवत्त्वाभ्यां संशये पूर्वतन्त्रे कृत्स्नवेदस्य कार्यपरत्वे निश्चिते वेदत्वसामान्याद्वेदान्तानामपि कार्यपरत्वमेवेत्यवधृतं पूर्वपक्षं तुशब्दो व्यावर्तयतीत्याह—तुशब्द इति। ननु शास्त्रप्रमाणकत्वं ब्रह्मणो दर्शितम्। शास्त्रयोनित्वादिति सूत्रे। तत्र जिज्ञास्ये ब्रह्मणि प्रमाणभूतं शास्त्रं किमित्याकाङ्क्षायां शास्त्रमेव विस्तरेणोदाहर्तव्यम्। तथा सतीदं सूत्रं नारब्धव्यम्। यदा शास्त्रप्रमाणकत्वं सन्दिह्येत तदा तस्य निर्णायकतया समन्वयसूत्रमारभ्येत। नैतद्युक्तं शास्त्रस्याऽनतिशङ्कनीयत्वात् इति तस्मान्नैतत्सूत्रं आरब्धव्यमिति प्राप्ते। उच्यते। न वयं शास्त्रप्रामाण्यसंशये सति तन्निर्णयायेदं सूत्रमिति ब्रूमः। कानि चित्सगुणब्रह्मपराणि। कानिचिन्निर्गुणब्रह्मपराणि च वाक्यानि दृश्यन्ते। तेषां सगुणे वा तात्पर्यं निर्गुणे वा उभयत्र वा अन्यत्र वा यत्र काऽपीति वा सन्देहे तन्निर्णयायेदमधिकरणम्। तर्हि वेदान्ताः सगुणब्रह्मपरा निर्गुणब्रह्मपराः वेत्येवमाकारः संशयो युक्तः। न तु कार्यपरा वा सिद्धपरा वेति। अस्तूभयविधोऽपि संशयः। वाक्यानां निर्विशेषब्रह्मणि समन्वये साधिते तदुभयविधः संशयोऽपि निवर्तत इति ब्रूमः। अतो नोक्तदोषः।

अथवा पूर्वसूत्र एव उक्तलक्षणलक्षितं ब्रह्म शास्त्रप्रमाणकमिति निर्णीतम्। शास्त्रं च ऋग्वेदादिकं विषयः। तत्किं कार्यतात्पर्यकम्, उत नित्यसिद्धब्रह्मतात्पर्यकमिति सफलत्वासफलत्वाभ्यां सन्देहे पूर्वकाण्डस्य सफलक्रियापरत्वे निश्चिते वेदान्तस्यापि वेदत्वसामान्यात् सफलकार्यपरत्वमिति पूर्वपक्षं प्रापय्य ब्रह्मविदाप्नोति परमित्यादिना सिद्धार्थज्ञानादपि फलश्रुतेः पुत्रस्ते जात इत्यादौ सिद्धेऽपि व्युत्पत्तिदर्शनाद्वेदान्तानां

जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्? समन्वयात्। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि। 'सदेव सोम्येदमग्र आसीत् एकमेवा-

---

सिद्धब्रह्मपरत्वं सिद्धान्तयितव्यम्। इह त्वस्य सूत्रस्य वेदान्ता विषयाः। ते उपास्तिक्रियाविषयत्वेन ब्रह्म बोधयन्ति, उत स्वप्रधानत्वेनेति सम्भवासम्भवाभ्यां सन्देहे वेदान्ता उपास्तिक्रियाविधिशेषत्वेनैव ब्रह्म बोधयन्ति फलवाक्यात् न प्रधानत्वेन फलाभावात् इति पूर्वपक्षं प्रापय्य सर्वपूर्वपक्षसिद्धान्तत्वेन तत्तु समन्वयादिति सूत्रं योजनीयम्। न चैतद्भाष्यविरुद्धमित्याशङ्कितव्यम्। तात्पर्यविरोधाभावात्। यस्माद्यागादिक्रियाविधिशेषत्वं सगुणब्रह्मपरत्वमुपास्तिक्रियाविधिविशेषत्वं च वेदान्तानां प्रतिषिध्य सिद्धब्रह्मैकतात्पर्यकत्वं साधयति भगवान्भाष्यकारः अतो न विरोधः। निर्विशेषपरा वेदान्ता इति वक्तुं विषयं कीर्तयति—तद्ब्रह्मेति। तच्छब्देन विवक्षितविशेषणान्याह—सर्वज्ञमित्यादिना। कल्पितसर्वज्ञत्वादिभिः धर्मैः लक्ष्यते वेदान्तवाक्यादवगम्यत इत्यत्र हेतुं पृच्छति—कथमिति। सौत्रं हेतुमाह—समन्वयादिति। हेतुं विवृणोति—सर्वेषु हीति।

अत्र केचिदनुमानमाहुः। तथाहि। ब्रह्म वेदान्तजन्यप्रमाविषयः वेदान्ततात्पर्यविषयत्वात्। यो यद्वाक्यतात्पर्यविषयः सः तद्वाक्यप्रमेयः। यथा कर्मवाक्यजप्रमाविषयो धर्मः इति प्रयोग इति। तत्र यदि सविशेषं ब्रह्म आश्रयत्वेन विवक्षितं स्यात् तदा तस्यैव वेदान्तजप्रमाविषयत्वं साध्यं विवक्षितं स्यात्। तथा सत्यपसिद्धान्तो दोषः। अविवक्षितार्थसिद्धिश्च हेतुस्वरूपासिद्धिश्च। उपक्रमादिना सविशेषे ब्रह्मणि वेदान्तानां तात्पर्यानवधारणात् निर्विशेष एव तात्पर्यावधारणात्। यदि पुनर्निर्विशेषं ब्रह्माऽऽश्रयत्वेन विवक्षितं स्यात् तस्य प्रमाणान्तरेणाऽसिद्धत्वे आश्रयासिद्धो हेतुः स्यात्। सिद्धत्वे वा सिद्धसाधनत्वं दोषस्स्यात्। तत्प्रतिपादकवेदान्तानामप्यनुवादकत्वेन स्वार्थे प्रामाण्यं न स्यात्। किञ्च धर्मरूपदृष्टान्तोऽप्यसमञ्जसः। तथाहि—धर्मस्य वेदेतरप्रमाणसिद्धत्वे तत्प्रतिपादकवाक्यानामनुवादकत्वं सिद्धम्। अनुवादकत्वे वा धर्मपक्षकानुमाने आश्रयासिद्धिः, अस्मिन्ननुमाने च दृष्टान्तासिद्धिरित्यादिदूषणगणग्रासान्नेदमनुमानं समञ्जसम्। वेदान्तविरुद्धत्वात्।

द्वितीयम्' (छान्दो० ६। १। ५) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐत० १।१।१) 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म

---

इदं त्विह वक्तव्यम्। तत्वमस्यादिवेदान्ताः संसर्गागोचरप्रमितिफलकाः संसर्गगोचरप्रमित्यफलकत्वे सति प्रमाणत्वात् व्यतिरेकेण ज्योतिष्टोमादिवाक्यवदिति। वेदस्य हि निरपेक्षं प्रामाण्यं अवधारितं पूर्वतन्त्रे। तदुक्तं—

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥

इति। यद्वा वेदान्तास्सर्वसंसर्गशून्यवस्तुमात्रतात्पर्यकाः। उपक्रमादिभिः लिङ्गैः अन्यत्र तात्पर्याभावावधारणादिति दिक्। यान्यखण्डार्थबोधकवाक्यानि तानि क्रमेणोदाहरति -सदेवेत्यादिना। उद्दालकः पुत्रमुवाच-हे सोम्य प्रियदर्शन। इदं सर्वं जगदग्रे उत्पत्तेः प्राक्काले सदबाधितब्रह्मैव सत्। एवकारेण जगतः पृथक्सत्ता निषिध्यते। सतः सजातीयविजातीयस्वगतभेदनिरासार्थं एकं एवाऽद्वितीयमिति पदत्रयम्। एवं अद्वितीयं ब्रह्मोपक्रम्य ऐतदात्म्यमिदं सर्वंइत्युपसंहरतीत्युपक्रमोपसंहारैकरूप्यं तात्पर्यलिङ्गम्। तथा तत्वमसीत्यादिनवकृत्वोऽभ्यासः रूपादिहीनाद्वितीयब्रह्मणो मानान्तरायोग्यत्वात् अपूर्वत्वमुक्तम्। अत्र वा व किल सत्सोम्य न निभालयस इति साङ्गाते स्थितं प्रत्यग्ब्रह्म न जानासीत्यर्थः। तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्य इति ब्रह्मज्ञानात्फलमुक्तम्। तस्य विदुषो यावत्कालं देहो न विमोक्ष्यत इति पुरुषस्य व्यत्ययेनाऽन्वयः। तावदेव देहपातपर्यन्तो विलम्बः। अथ देहपतनानन्तरं विद्वान्संपत्स्यत इत्यत्राऽपि पुरुषव्यत्ययः विदेहकैवल्यं प्राप्नोतीत्यर्थः। सेयं देवतैक्षत। हन्ताहमिमास्तिस्रः देवता इत्याद्यर्थवादः। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं इत्याद्युपपत्तिः। एवं षड्विधानि तात्पर्यलिङ्गानि व्यस्तानि समस्तानि वा प्रतिवेदान्तं दृश्यन्ते इत्यभिप्रेत्यैतरेयोपक्रमवाक्यं पठति—आत्मा वा इति। बृहदारण्यके मधुकाण्डोपसंहारवाक्यं सदात्मनो निर्विशेषत्वसिद्ध्यर्थमाह—तदेतदिति। तत् पूर्वप्रकृतं मधुत्वेनाभिहितं एतदपरोक्षमपूर्वं न विद्यते पूर्वं कारणं यस्य तत्। अनपरं न विद्यते अपरं कार्यं यस्य तत्। अनन्तरं अन्तरं न विद्यते यस्मात् तदनन्तरं सर्वान्तरमेकरसमित्यर्थः। अबाह्यं नैव विद्यते बाह्यं व्यापकं यस्य तत् अबाह्यम्। अद्वितीयम्। तस्य नित्यापरोक्षत्वमुपपादयति—अयमिति।

सर्वानुभूः' (बृह० २।५।१९) 'ब्रह्मैवेदममृतं पुरस्तात्' (मुण्ड० २।२।११) इत्यादीनि। नच तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। नच तेषां कर्तृस्वरूपप्रतिपादनपरताऽवसीयते, 'तत्केन कं पश्येत्' (बृह० २।४।१३) इत्यादि क्रियाकारकफलनिराकरणश्रुतेः। नच

---

सर्वा च साऽनुभूश्च सर्वानुभूः। नित्योपलब्धिमात्रमित्यर्थः। अथर्वणवाक्यं पठति-ब्रह्मैवेदमिति। पूर्वादिदिक्षु यद्ब्रह्मात्मभिन्नत्वेन प्रतिभातम् तत्सर्वं विद्वद्दृष्ट्याऽमृतम्। ब्रह्मैवेत्यर्थः। आदिपदेन सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यानि गृह्यन्ते। ननु कृत्स्न-वेदस्य कार्यपरत्वे निश्चिते वेदान्तानामपि वेदत्वसामान्यात्कार्यपरत्वमस्त्वित्यत आह-नचेति। तद्गतानां वेदान्तगतानां सत्यादिपदानां वाच्यतया जीवब्रह्मपदार्थेऽवगते लक्ष-णया प्रत्यगभिन्नब्रह्मणि वाक्यार्थरूपे समन्वये मुख्यतात्पर्यैःषड्विधलिङ्गैः अवगम्यमाने कार्य-परता न युक्तेत्यन्वयः। वेदान्ताः कार्यपराः वेदत्वात् पूर्वकाण्डवदित्यनुमाने जन्यफलकत्व-ज्ञानकरणत्वमुपाधिरिति भावः। तत्रैव दोषान्तरमाह—श्रुतहानीति। श्रुतब्रह्मतात्पर्य-कत्वहानिः। अश्रुतपरिग्रहः। अश्रुतस्य कार्यपरत्वस्य कल्पना परिग्रहः। तौ प्रसज्येयाता-मित्यर्थः। ननु ब्रह्मतात्पर्यकाणामपि वेदान्तानां कैमर्थ्यवशेन कर्मविध्यपेक्षितकर्तृदेव-तादिप्रकाशनपरतया यूपाहवनीयादिप्रकारवाक्यवच्छेष्यतया प्रामाण्यं स्यादित्यत आह—न च तेषामिति। तत्र हेतुमाह—तत्केन कं पश्येदिति। अयं भावः। कर्तृत्वं नाम स्वातन्त्र्येण क्रियानिर्वर्तकत्वम्, स्वतन्त्रः कर्तेति स्मरणाच्च। तत्र कर्मकरणाद्यपेक्षितम्। तत्र यदि सविशेषं ब्रह्म वेदान्तप्रमाणादवगतं स्यात् तदा यत्र वा अन्यदिव स्यात् तत्रान्योन्यत्पश्येदिति श्रुत्या प्रत्यक्षादिना च कर्तृत्वादिप्रकाशनपरत्वमवसीयेत अविद्यादशायां। विद्यादशायान्तु तदेतद्ब्रह्मापूर्वमनपरमनन्तरं अयमात्मा ब्रह्म सर्वानु-भूरित्यादिना प्रत्यस्तमितसर्वभेदं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्माऽवगतं स्यात्। तस्य कथं क्रियानिर्वर्तकत्वं विरोधादिति। ननु ब्रह्मणः परिनिष्ठितवस्तुत्वेन प्रत्यक्षादिविषयत्वात् तत्प्रतिपादकवाक्यानामनुवादकत्वेनाऽप्रामाण्यं स्यादित्यत आह—न च परिनिष्ठितेति। इन्द्रियसन्निकर्षाभावेन प्रत्यक्षाद्यविषयत्वे सति अहंवृत्तेश्चाहङ्कारादिविषयत्वेन ब्रह्मास्प-र्शितया प्रत्यक्षादिविषयत्वं यद्यपि प्रमात्रादिसाक्षित्वेन यत्साक्षादपरोक्षाद्ब्रह्मेति च नित्या-

परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' (छान्दो० ६।८।७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात् । यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, नैष दोषः, हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः । देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपसनार्थत्वेऽपि न कश्चिद्विरोधः । नतु तथा ब्रह्मण उपासनविधिशेषत्वं संभवति, एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । नह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपाद्येत ।

---

परोक्षं ब्रह्म भवति । तथाऽपि सकारणबन्धनिवर्तनसमर्थाखण्डाकारवृत्त्यभिव्यक्तस्वरूपब्रह्मसाक्षात्कारस्य शास्त्रं विनाऽनुदयाच्छास्त्रैकगम्यं ब्रह्मेत्यर्थः । ब्रह्मस्वरूपावगमे सति इष्टप्राप्त्यनिष्टपरिहारान्यतरस्याऽपि फलस्याऽभावादुपदेशानर्थक्यं इति यदुक्तम् तद्दूषयितुं अनुवदति—यत्त्विति । परिहरति—नैष दोष इति । फलाभावदोषो नेत्यर्थः । अधिष्ठानयाथात्म्यज्ञानविजृम्भितस्य मातृत्वादिबन्धस्याऽनर्थस्याऽधिष्ठानयाथात्म्यज्ञानादेव निवृत्तेः पुरुषार्थस्याऽनर्थनिवृत्तिलक्षणपरमानन्दस्य लब्धत्वान्नोपदेशानर्थक्यमिति भावः । उपासनाविधिशेषत्वं ब्रह्मणो यदाशङ्कितम् तत्सगुणेऽस्त्वित्यङ्गीकरोति—देवतादीति । न कश्चिद्विरोध इति । क्रियाकारकफलभेदवत्त्वादिति भावः । निर्विशेषस्य तु ब्रह्मणो जिज्ञासाकर्मणः विरोधान्नोपास्तिक्रियाविधिशेषत्वं इत्याह—न तु तथेति । तत्रोपपत्तिमाह—एकत्वमिति । एकमेवाद्वितीयम् । ऐतदात्म्यमिदं सर्वं तत्सत्यमित्यादिश्रुतिशतेभ्यो हेयोपादेयशून्यब्रह्मावगमे सति क्रियाकारकादिद्वैतविज्ञानस्योपमर्दितत्वात् न क्रियाशेषत्वम् । तद्वदस्याऽपि न विध्येकवाक्यतेति भावः । ननूपमर्दितस्याऽपि द्वैतविज्ञानस्य व्युत्थानदशायां द्वैतविज्ञानसम्भवात् उपासनाशेषत्वं स्यादत आह—न हीति । व्युत्थानदशायां बाधितानुवृत्त्या द्वैतविज्ञानसम्भवेऽपि तस्याऽकिञ्चित्करत्वात् नोपास्तिक्रियाशेषत्वमित्यभिप्रेत्याह—येनेति । न केनापि प्रमाणेन ब्रह्म विधिशेषत्वं प्रतिपद्यत इति भावः । ननु वेदान्तवाक्यं विध्येकवाक्यतया प्रमाणं विध्यतिरिक्तवेदवाक्यत्वात् ।

यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं, तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्। न चानुमानगम्यं शास्त्रप्रामाण्यं, येनान्यत्र दृष्टं निदर्शनमपेक्षेत। तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम्।

अत्रापरे प्रत्यवतिष्ठन्ते—यद्यपि शास्त्रप्रमाणकं ब्रह्म तथापि

---

अर्थवादादिवाक्यवदिति शङ्कते—यद्यपीति। ननु भूतार्थवादानां यन्नदुःखेन संभिन्नमित्यादीनां विधिसंबन्धं विनाऽपि स्वार्थावबोधकत्वेन प्रामाण्यं दृष्टम्; तद्वदिहाऽपि स्यादित्याशङ्क्य तत्राऽपि स्वर्गादिफलरूपसमर्पकत्वेन प्रामाण्यं दृष्टम्। तेन विना क्वाऽपि न दृष्टम्। दृष्टान्तबलेन वेदानामपि तथैव प्रामाण्यमिति वेदान्तानां सिद्धेऽर्थे प्रामाण्यं दुर्वारमिति पतितं आह—न तद्विषयस्येति। न वाक्यत्वं प्रयोजकम्। किन्तु फलवदर्थावबोधकरणत्वम्। तदेतदाह—आत्मविज्ञानस्येति। उक्तानुमाने फलशून्यज्ञानकरणत्वं उपाधिः इति भावः। एवं पूर्वपक्षे दूषिते वेदान्तानां सिद्धेऽर्थे प्रामाण्यं दुर्वारं इति पतितं आह—न तद्विषयस्येति। ननु दृष्टान्तबलेन विधीतरवाक्यानां विध्येकवाक्यतया प्रामाण्ये साधिते वेदान्तानामपि तथैव प्रामाण्ये सिद्धे तत्र श्रूयमाणफलत्वमप्यर्थवादः, अङ्गेषु फलश्रुतिरर्थवाद इति न्यायात् इत्यरुचेराह—न चानुमानेति। वेदप्रामाण्यस्याऽनुमानगम्यत्वे हि दृष्टान्तापेक्षा स्यात्। नैतदस्ति। वेदस्याऽपौरुषेयतया स्वतः प्रामाण्यस्य साधितत्वात् इति भावः। एवमुक्तलक्षणलक्षिते ब्रह्मणि विज्ञाते क्रियाकारकादिसमस्तभेदोपमर्दोपपत्तेः सकारणानर्थनिवृत्तिलक्षणपरमानन्दावाप्तिलक्षणफलस्य सिद्धत्वान्न किञ्चिद्विदुषः कर्तव्यमस्तीति मत्वा समन्वयसूत्रार्थमुपसंहरति—तस्मादिति। यस्मात्सर्वेषां वेदान्तानां तात्पर्येण ब्रह्मैकार्थावबोधकत्वेन समन्वयोऽवगतः तस्मादित्यर्थः।

इत्यष्टमं वर्णकम् ॥

---

अथ नवमं वर्णकम्

कार्यान्वितशक्तिवादिनां मतं निराकर्तुं अनुवदति—अत्राऽपर इति। शास्त्रप्रमाणकत्वं ब्रह्मणोऽङ्गीकरोति—यद्यपीति। अनन्यशेषत्वं तस्याऽसहमानः शङ्कते—तथापीति। प्रतिपत्तिज्ञानमुपासना। ब्रह्म वेद ब्रह्मैव भवति। आत्मेत्येवोपासीत आत्मानमेव लोक-

प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य। तथाहि शास्त्रतात्पर्यविदामनुक्रमणम्—'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति।

---

मुपासीत। आत्मा वा अरे द्रष्टव्यः। स विजिज्ञासितव्यः। तद्विजिज्ञासस्वेत्यादिश्रुत्या दर्शनादिक्रियाकर्मत्वेन प्राप्तस्य ब्रह्मणस्तत्वनिर्धारणाय प्रवृत्ता वेदान्ताःप्रतिपत्तिविधिविशेषणतयैव ब्रह्म बोधयन्तीति भावः। ननु लोके प्रत्यक्षादिभिः गृहीतशक्तिकानामेव तात्पर्यज्ञानवतां वाक्यार्थबोधदर्शनात्। इह तु प्रत्यक्षाद्यगोचरव्यवहारातीते ब्रह्मणि शक्तिग्रहस्याऽशक्यत्वात्कथं वाक्यार्थबोधस्स्यादित्याशङ्क्य शक्तिग्रहोऽपि वेदान्तैरेव भविष्यतीति सदृष्टान्तं उपपादयति—यथेति। अलौकिकानि लोकप्रमाणानवगतानि। यूपे पशुं बध्नातीति विधिशेषतया प्राप्तयूपपदार्थस्वरूपं यूपं तक्षति यूपमष्टाश्रीकरोतीति श्रुतिः स्वयमेव व्युत्पादयति तद्वत् इहाऽपि ब्रह्मपदार्थं श्रुतिः स्वयमेव व्युत्पादयतीत्याह—तद्वदिति। एवं कल्पनायां हेतुं पृच्छति—कुत एतदिति। हेतुमाह—प्रवृत्तीति। प्रवृत्तिश्च निवृत्तिश्च प्रवृत्तिनिवृत्ती। तयोः अन्यतरत् प्रयोजनं यस्य स तथा। प्रत्यक्षाद्यनवगते साधनं बोधयत्पुरुषस्य प्रवृत्तिजनकं किञ्चिच्छास्त्रम्। यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवाक्यम्। तथाविधानिष्टसाधनं बोधयत्ततो निवर्तयति किञ्चिच्छास्त्रम्। यथा न सुरां पिबेन्न हन्यादिति वाक्यम्। एवं सूत्रवेदान्तानामपि प्रवृत्तिनिवृत्त्यन्यतरफलकत्वं वक्तव्यम्। अतो विधिशेषत्वमिति भावः। तस्मिन्नर्थे तत्संप्रदायविदां संमतिमाह—तथाहीत्यादिना। अनुक्रमणं सूत्रादिक्रमेण तात्पर्यव्यञ्जकवाक्यं प्रयुक्तं दृश्यत इत्यर्थः। तत्र तद्भाष्यकारसम्मतिमाह—दृष्टो हीति। स्वाध्यायोऽध्येतव्यः षडङ्गो वेदोऽध्येतव्यः इति च बहुप्रयासेनाध्यापितस्य वेदस्याऽधिकारिणाऽधीतस्य निष्फलत्वानुपपत्तेः प्रयासानुगुणं फलं वक्तव्यम्। तत्किमदृष्टं दृष्टं वेति विचार्य दृष्टफलस्याऽनुपलम्भात् अदृष्टं फलं भविष्यतीति पूर्वपक्षं प्रापय्य सिद्धान्तितं भाष्यकारेण—दृष्टो हि तस्याऽर्थः कर्मावबोधनं नामेति। कर्म कार्यम् नियोगो विधिः धर्मोऽपूर्वमिति पर्यायः। स एव वेदार्थः। तथा च कर्मावबोधनं नाम कार्यज्ञानाख्यं पुरुषप्रवृत्तिजनकं दृष्टं फलमिति। तत्र चोदनासूत्रभाष्यं संवादयति—चोदनेतीति। क्रियाया नियोगस्येति कर्मणि षष्ठी। तथा च नियोगं कार्यं प्रति पुरुषनियोगयोः साध्यसाधनभावसम्बन्धं बोधयत् प्रवर्तयति यद्वाक्यम् सा

चोदनेति क्रियायाः प्रवर्तकं वचनम्' शा. भा-१-१-२। 'तस्य ज्ञानमुपदेशः—' (जै० सू० १।१।५) 'तद्भूतानां क्रियार्थेन समाम्नायः—' (जै. सू. १।१।२५) 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्—' (जै. सू. १।२।१) इति च। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्। तच्छेषतया चान्यदुपयुक्तम्। तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे

---

चोदनेत्युच्यते इत्यर्थः। भाष्यकारसंमतिं उक्त्वा सूत्रकारसम्मतिमाह—तस्य ज्ञानमिति। यद्यपि सूत्रभाष्यकारयोः ऐकमत्याद्भाष्यकारसम्मत्यैव सूत्रसम्मतिरुक्ता भवति। तथाऽपि भाष्यस्य श्रुतिसूत्रशङ्का माभूदित्येवमर्थं स्वपक्षप्राबल्यसिद्ध्यर्थं च बहुसम्मतिप्रदर्शनं द्रष्टव्यम्। तस्येति चोदनासूत्रोक्तधर्मः परामृश्यते। तस्य धर्मस्य ज्ञानमुपदेश इति समानाधिकरणे पदे अर्थैकत्वं गमयतः। व्याख्यानव्याख्येयभावेन धर्मो येन ज्ञायते यजेतेत्यादिवाक्येन तद्वाक्यं किमित्याकाङ्क्षायां आह—उपदेश इति। उपदिश्यतेऽज्ञातोऽर्थः ज्ञाप्यतेऽनेनेत्युपदेशः उक्तवाक्यमेव तेन धर्मज्ञानवाक्यस्य कार्यपरत्वे सिद्धेऽस्तिसंवाद इत्यर्थः। सिद्धार्थवाचकपदानां कार्यान्वितस्वार्थे शक्तिरित्यत्र सूत्रं पठति—तदिति। तद्भूतानां क्रियार्थेन समाम्नायः अर्थस्य तन्निमित्तत्वादिति सूत्रम्। तत्र वेदे भूतानां सिद्धार्थवाचकपदानां क्रियार्थेन लिङादिना समाम्नायः सम्यगाम्नायः पठनं कर्तव्यम्। अर्थस्य ज्ञायमानपदार्थस्य तन्निमित्तत्वात् कार्यरूपवाक्यार्थज्ञाननिमित्तत्वादित्यर्थः। एतावता सिद्धार्थानां कार्यशेषत्वमवगतम्। सिद्धस्य कार्यार्थत्वे सम्मत्यन्तरं सूत्रं पठति—आम्नायस्येति। व्याख्यातम्। चशब्द उक्तसमुच्चयार्थः। सिद्धार्थानां कार्यशेषत्वं प्रपञ्चितमुपसंहरति—अतः पुरुषमिति। अन्यदिति। सिद्धार्थवाचकपदवृन्दमित्यर्थः। यदर्थं पूर्वकाण्डोक्तं सिद्धार्थानामपि कार्यपरत्वं प्रपञ्चितम् तस्य फलमाह—तत्सामान्यादिति। तथैवेति कार्यशेषत्वेनैव स्वातन्त्र्येण स्वार्थे प्रामाण्यमित्यर्थः। ननु वेदान्ते हेयोपादेयशून्यब्रह्मात्मवस्तुनः प्रतिपाद्यतया विधिगोचरत्वाभावान्न विधिशेषत्वमित्याशङ्क्य क्रियायुक्त्या विधिशेषत्वं संपादयति—सति चेति। वेदत्वसामान्याद्विधिशेषत्वे साधिते सतीत्यर्थः। अत्र तु कस्य कस्मै फलाय किं साधनं विधीयत इत्याकाङ्क्षायां

यथा स्वर्गादिकामस्याग्निहोत्रादिसाधनं विधीयत एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् ।

नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्—कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति । तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम् । कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । 'आत्मा वा अरे द्रष्टव्यः' (बृह ०२।४।५) 'य आत्माऽपहतपाप्मा—सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छान्दो ०८।७।१) 'आत्मेत्येवोपासीत' (बृ० १।४।७) 'आत्मानमेव लोकमुपासीत' (बृ० १।४।१५) । 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३।२।९) इत्यादिविधानेषु सत्सु 'कोऽसावात्मा किं तद्ब्रह्म'

---

दृष्टान्तपूर्वकमुपपादयति । यथेत्यादिना । वैषम्यान्नायं दृष्टान्तो युक्त इति शङ्कते—नन्विनि । कर्मकाण्डे जिज्ञास्यवैलण्यं उपपादयति—भव्य इति । सिद्धान्ते तद्वैलक्षण्यमुपपादयति—इह त्विति । नित्यनिर्वृत्तं नित्यसिद्धमित्यर्थः । इतिशब्दः पूर्वपक्षोपसंहारार्थः । फलवैलक्षण्यमप्याह—तत्र धर्मविचारफलं धर्मज्ञानं तच्चाऽनुष्ठानापेक्षमेव स्वर्गादिफलाय भवति । ब्रह्मविचारफलन्तु ब्रह्मज्ञानमनुष्ठाननिरपेक्षमेव सफलं भवितुमर्हति । अतो ब्रह्मणो न विधिशेषत्वमिति भावः । पूर्वपक्षी स्वसिद्धान्तं साधयितुं सिद्धान्तिनोक्तां शङ्कां निराकरोति—नार्हत्येवमिति । तत्र हेतुमाह—कार्यविधीति । वेदान्तेऽपि विधिप्रदेशेषु कार्यविधिशेषत्वेनैव ब्रह्मणः प्रबोध्यमानत्वात् ब्रह्मणो विधिशेषत्वमेवेति भावः । विधिशेषत्वेनैवाऽऽत्मनः प्रतिपादकवाक्यान्याह—आत्मा वा अरे इति बृहदारण्यके । छान्दोग्यवाक्यमुदाहरति—य आत्मेति । सोऽन्वेष्टव्यः विचारयितव्यः । तरति शोकमात्मविदित्यादिपदार्थः । ननूदाहृतश्रुतयो विधिपरा भवन्तु । अन्याः श्रुतयःनित्यस्सर्वज्ञ इत्याद्याः सिद्धब्रह्मपरा भविष्यन्तीत्याशङ्क्य श्रुतितात्पर्यमाह—इत्यादिविधानेष्विति । विधिप्रत्ययलिङ्ग सहितवाक्यैकवाक्यतया नित्यस्सर्वज्ञ इत्यादिश्रुतीनां प्रामाण्यं वक्तुं सङ्गतिमाह—कोऽसाविति । आत्मा अन्वेष्टव्यः विजिज्ञासितव्य इति विधिविषयत्वेन

इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः—नित्यः सर्वज्ञःसर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति। कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासंभवात्, सप्तद्वीपा वसुमती, राजासौ गच्छतीत्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात्। ननु वस्तुमात्रकथनेऽपि रज्जुरियं नायं सर्प इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्। स्यादेतदेवं, यदि रज्जुस्वरूप-

---

सामान्यतः प्रतीयमानः कोऽसौ किंलक्षणकः। तद्विजिज्ञासस्वेति जिज्ञासाकर्मत्वेन प्रतीयमानं ब्रह्म किं किंलक्षणकमिति श्रोतुः जिज्ञासायां तल्लक्षणनिर्वचनेन तत्स्वरूपं बोधयन्तः वेदान्ता उपयुक्ता विध्येकवाक्यतयैव प्रामाण्यं लभन्त इत्यर्थः। कास्ताः श्रुतय इति जिज्ञासायां श्रुतीरुदाहरति—नित्यस्सर्वज्ञ इत्यादिना। ब्रह्मात्मकर्मकोपासनायाः किं फलमित्याकाङ्क्षायामाह—तदुपासनाच्चेति। ननु ब्रह्म वेद ब्रह्मैव भवतीति ब्रह्मविद्यायाः दृष्टफलत्वोक्तेः कथं उपासनाजन्यत्वे दृष्टफलकत्वमित्यत आह—शास्त्रदृष्ट इति। उपासनायाः क्रियारूपत्वात् क्रियाजन्यफलस्याऽदृष्टत्वात् शास्त्रदृष्टो मोक्षोऽप्यदृष्टं फलं भविष्यतीति भावः। ब्रह्मणः क्रियाविधिशेषत्वाभावे बाधकमाह—कर्तव्यविधीति। वस्तुमात्रकथनेनोपादानासम्भवादिष्टप्राप्त्यनिष्टपरिहारान्यतररूपफलस्या ऽ संभवादानर्थक्यं वेदान्तानामिति भावः। सिद्धार्थबोधात्फलं नास्तीत्यत्र दृष्टान्तमाह—सप्तद्वीपेति। सिद्धान्तिसिद्धार्थबोधकानामपि सार्थक्यं शङ्कते—ननु वस्तुमात्रेति। दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति—तथेहापीति। अनाद्यज्ञानविजृम्भितः अहं संसारी बद्धो दुःखीति शोचति। तदा कश्चित्कारुणिकःतं बोधयति—न त्वं संसारी बद्धः। किन्तु नित्यशुद्धबुद्धमुक्तः असीति बोधनेन संसारित्वभ्रान्तिनिवृत्तिरेव फलं भविष्यति। अतो ब्रह्मणः नान्यशेषतेति भावः। दृष्टान्ते दृष्टस्य फलवत्त्वस्य दार्ष्टान्तिके असिद्धिमाशङ्कते—स्यादेतदिति। रज्जुस्वरूपोपदेशेन रज्जुरेवाऽयं नायं सर्प इति भ्रमस्य निवृत्तौ भयकंपादिनिवृत्तिः फलं दृश्यते। एवं यदि ब्रह्मस्वरूपश्रवणमात्रेण संसारत्वभ्रमो निवर्तेत तदा

श्रवणमात्रेणेव सर्पभ्रान्तिः, संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत। नतु निवर्तते, श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृह०२।४।५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात्। तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति।

अत्राभिधीयते—न। कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं

---

तद्दृष्टान्तेन सफलं ब्रह्मज्ञानमापाद्येत। संसार्यहमिति भ्रमः तदधिष्ठानब्रह्मात्मैकत्वज्ञानबाध्यः भ्रमत्वात् रज्जुसर्पभ्रमवदित्यनुमाने हेतोः बाधितसाध्यकत्वं इत्यभिप्रेत्याह—न त्विति। बाधितत्वमेवाऽनुभवारूढं करोति—श्रुतब्रह्मणोऽतीति। श्रवणात्पूर्वं यथा तथैव संसारानुभवदर्शनान्न दृष्टान्तसाम्यमिति भावः। किञ्च श्रवणमात्रेण साक्षात्कारे फलस्याऽपि सिद्धत्वात् मनननिदिध्यासनयोः श्रुतिविहितयोः आनर्थक्यमिति दर्शयितुं श्रुतिं पठति—श्रोतव्य इति। मनननिदिध्यासनविधिशेषत्वं श्रुत्यैवाऽभिप्रेयत इत्यभिप्रायः। एतावता प्रबन्धेनाऽभिमतमर्थं उपसंहरति—तस्मादिति। अदृष्टविशेषः फलमित्युपगन्तव्यमिति पूर्वपक्ष्याशय इत्यापाद्य सिद्धान्तं वक्तुं प्रतिजानीते—अत्रेति। पूर्वपक्षं प्रतिषेधति—नेति। यदुक्तं उपासनादिविधिशेषत्वं ब्रह्मणः तदुपासनाद्यादृष्टं स्वर्गादिवत् जन्यमेव फलं भवतीति तदसम्भवहेतुं संगृह्णाति—कर्मेति। कर्मफलं स्वर्गादिजन्यं विनाशि। क्षीणे पुण्ये मर्त्यलोकं विशन्ति इति स्मरणात्। अथैतमेवाध्वानं पुनर्निवर्तन्त इत्यादिश्रुतेश्च। ब्रह्मविद्याफलन्तु "न च पुनरावर्तते न च पुनरावर्तते।" "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति"। "आनन्दं ब्रह्मणो विद्वान्" "न बिभेति कुतश्चनेति"। अभयं वै जनकप्राप्तोऽसीति श्रुतिशतेभ्यः ब्रह्मविद्याफलस्य बन्धनिवृत्तिरूपस्य ब्रह्माव्यतिरिक्ततया नित्यसिद्धत्वात् न जायते म्रियते वा कदाचित् इत्यादिजन्मादिप्रतिषेधदर्शनात् कर्मफलाद्वैलक्षण्यं ब्रह्मफलं यस्मादवगम्यते तस्मान्न विधिशेषत्वं ब्रह्मणः। विज्ञाते ब्रह्मणि क्रियाकारकादिसमस्तभेदोपमर्दनाच्च नाऽन्यशेषत्वं ब्रह्मणः इति भावः। फलवैलक्षण्यमेव प्रपञ्चयितुं तत्साधनधर्मस्वरूपं प्रपञ्चयति—शारीरमित्यादिना वर्णितं संसारमित्यनुवदन्तीत्यन्तेन।

वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यं, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै० सू० १।१।१) इति सूत्रिता, अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वाज्जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे। मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते। ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते। धर्मतारतम्यादधिकारितारतम्यम्। प्रसिद्धं चार्थित्वसामर्थ्यादिकृतमाधिकारितारतम्यम्। तथाच यागाद्यनु-

---

धर्मस्य स्वर्गादिफलसाधनस्य पुरुषतन्त्रत्वं दर्शयितुं धर्मजिज्ञासासूत्रमाह—यद्विषयेति। अथ वेदाध्ययनानन्तरं अतः वेदार्थस्य फलायाऽनुष्ठेयत्वाद्धर्मनिर्णयाय विचारः कर्तव्य इति सूत्रार्थः। धर्माख्यं धर्मनामकं विहितं कर्म। हेतुफलयोः अभेदोपचारान्न केवलं धर्म एव जिज्ञास्यः। किन्त्वधर्मोऽपि परिहाराय जिज्ञास्य इति सूत्राभिप्रायमाह—अधर्मोऽपीति। हिंसादिरधर्मः। न हिंस्यात्सर्वा भूतानीति प्रतिषिद्धत्वादित्याह—प्रतिषेधेति। तयोः स्वरूपभेदमाह—अर्थानर्थयोरिति। धर्मफलं सुखं अधर्मफलं दुःखम्। ते प्रत्यक्षमनुभूयमाने धर्माधर्मावनुमापयत इत्यर्थः। कथंभूते इत्यतः आह—शरीरेति। विशेषणद्वयं तयोः सुखदुःखयोः स्थानभेदमाह—ब्रह्मादीति। सुखतारतम्याधिष्ठानं विभजते—मनुष्यत्वेति। अनुश्रूयत इति। स एको मानुषः आनन्द इत्यारभ्य उत्तरोत्तरं शतगुणानन्दाधिक्यं उक्त्वा स एको ब्रह्मण आनन्दः इति तारतम्यं श्रूयत इत्यर्थः। सुखस्य कार्यस्य तारतम्यात्तत्कारणधर्मस्य तारतम्यं अनुमीयत इत्याह—ततश्चेति। ततः अधिकारितारतम्यं चानुमीयत इत्यारभ्य उत्तरोत्तरं शतगुणानन्दाधिक्यं उक्त्वा सः एको ब्रह्मण आनन्द इति तारतम्यं श्रूयत इत्यर्थः। सुखस्य कार्यस्य तारतम्यात्तत्कारणस्य धर्मस्य तारतम्यमनुमीयत इत्याह—ततश्चेति। ततः अधिकारितारतम्यं चानुमीयत इत्याह—धर्मेति। कर्माधिकारिणः ब्रह्मविद्याधिकारिणः सकाशाद्वैलक्षण्यमाह—प्रसिद्धमिति। अर्थित्वं स्वर्गादिफलकामित्वम्। सामर्थ्यं अनुष्ठानोपयोगिवित्तादिकम्। विद्वत्वं विचारजन्यं विधिनिषेधार्थरहस्यविज्ञानम्।

ष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनं, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् यावत्संपातमुषित्वा' (छान्दो० ५।१०।५) इत्यस्माद्गम्यते। तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः। तथोर्ध्वगतेष्वधो-

---

किञ्च धर्माधिकारिणां गतिवैचित्र्यमाह—तथा चेति। विद्योपासनं कर्माङ्गविषयकं ओमित्येतदक्षरमुद्गीथमुपासीतेत्यादिविधिसमधिगतं चित्तैकाग्र्यम् समाधिः। तेन विशेष उत्तरेण अर्चिरादिमार्गेण गमनम् तेऽर्चिषमभिसंभवन्तीति श्रुतिप्रदर्शितम्। केवलकर्मिणां गतिविशेषमाह—केवलैरिति। इष्टं यागादिः।

अग्निहोत्रं तपस्सत्यं वेदानाञ्चानुपालनम्।
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते॥

वापीकूपतटाकादि देवतायतनानि च।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते॥

शरणागतसन्त्राणं भूतानां चाऽप्यहिंसनम्।
बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते॥

ते धूममभिसम्भवन्तीत्यादिश्रुतेः। धूमादिक्रमेण चन्द्रलोकगमनं तेषां अप्यधिकारितारतम्यात् तत्साधनतारतम्याच्च फलतारतम्यमनुमीयत इत्याह—तत्राऽपीति। तेषामेव कर्मक्षये पुनरावृत्तिं सप्रमाणं उपन्यस्यति—शास्त्रादिति। सम्यक्पतत्यस्मादमुं लोकं इति संपातः। कर्म इति यावत्। तावत्कालमुषित्वा परलोकान्निवर्तन्त इति श्रुतिः एवं मनुष्यत्वादारभ्य ब्रह्मलोकान्तगतेषु देहवत्सु फलतत्साधनतदधिकारितारतम्यमुक्त्वा अधोगतेष्वपि तदाह—तथेति। तारतम्येन वर्तमानः सुखलवः सुखलेशः। अन्यथा देहधारणानुपपत्तेः। धर्मेण विना तदनुपपत्तेः। सोऽपि सुखलेशः धर्मसाध्य एवेति अनुमीयत इत्यर्थः। सुखदुःखतत्साधनधर्मतदधिकारिणां तारतम्यं क्रमेण प्रतिपाद्य ऊर्ध्वगतेषु यथोत्तरं सुखबाहुल्यं दुःखाल्पत्वं अधोगतेषु च स्थावरान्तेषु मनुष्यादिक्रमेण सुखाल्पत्वं दुःखभूयस्त्वं च दर्शयन्नाह—तथोर्ध्वगतेष्विति। ऊर्ध्वगतेषु सुखभूयस्त्वं दुःखाल्पत्वं च दर्शितम्। अधोगतेषु च दुःखभूयस्त्वं सुखाल्पत्वं च दृश्यते। तस्माद्दुःखाधिक्यदर्शनम् तद्धेतोः अधर्मस्य तारतम्यं

गतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्। तथाच श्रुतिः—'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छान्दो० ८।१२।१) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्यत्वे हि प्रियाप्रियस्पर्शन-

---

अनुमीयत इत्याह—तद्धेतोरिति। प्रतिषेधचोदनालक्षणस्येति। न हन्यान्न सुरां पिबेदित्यादिलक्षणस्येत्यर्थः। तदनुष्ठायिनामिति। अधर्मसाधनप्रतिषिद्धकर्मानुष्ठायिनां इत्यर्थः। यतो यतोऽधर्माधिक्यम् ततस्ततो दुःखबाहुल्यम्। धर्माधिक्ये च सुखबाहुल्यं च गम्यत इत्यर्थः। उक्तमर्थमुपसंहरति—एवमिति। अविद्यादीत्यादिपदेन अविद्यास्मितरागद्वेषाभिनिवेशाः पञ्च क्लेशा इति योगशास्त्रे प्रसिद्धा गृह्यन्ते। अथवा अविद्या अधिष्ठानयाथात्म्यावरणशक्तिः आदिपदेन विक्षेपशक्त्यहङ्कारादयो गृह्यन्ते। तद्वतां कार्यमाह—धर्माधर्मेति। धर्माधिक्यनिमित्तकं देवादिशरीरोपादानम्। तत्पूर्वकं सुखबाहुल्यम्। अधर्मबाहुल्यनिमित्तकम् तिर्यगादिशरीरोपादानं तत्पूर्वकञ्च दुःखबाहुल्यं सुखाल्पत्वं च तारतम्येनानुभूयमानं संसाररूपं श्रुतिस्मृतिप्रसिद्धमित्याह—श्रुतीति। तत्र श्रुतिमुदाहरति—तथाचेति। सशरीरस्य शरीराद्यभिमानवतः पुरुषस्य सतः प्रियं इष्टं सुखम् अप्रियं अनिष्टं दुःखम्। तयोः अपहतिः नाशः। न ह वै निश्चयेन नास्ति। मुक्तिर्न भवतीति भावः। यथावर्णितं संसाररूपं एषा श्रुतिः अनुवदतीत्यन्वयः। ब्रह्मविद्याफलस्य मोक्षस्य कर्मफलाद्वैलक्षण्यं दर्शयति—अशरीरमिति। तदपि धर्मकार्यमस्त्वित्यत आह—चोदनालक्षणेत्यादिना। गम्यत इति। शरीरसम्बन्धिसुखदुःखसम्बन्धः संसारः। यत्र सुखदुःखादिसंबन्धलक्षणः संसारः तत्र शरीरसम्बन्धो मनुष्यादिषु प्रसिद्धः। मुक्तपुरुषे शरीरसंबन्धस्य व्यापकस्याऽभावात् तद्व्याप्यसंसाराभाव इति भावः। विपक्षे बाधकमाह—धर्मकार्यत्वे हीति। शरीरसम्बन्धस्य धर्मकार्यस्य व्याप्यस्य सत्वात् व्यापकस्य सुखदुःखादिलक्षणसंसारस्याऽवश्यंभावात् तन्निषेधो नोपपद्यत इति भावः। ननु धर्मकार्यं सुखं न दुःखम्। तथा च केवलसुखस्य-

प्रतिषेधो नोपपद्यते। अशरीरत्वमेव धर्मकार्यमितिचेन्न, तस्य स्वाभाविकत्वात्। 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (काठ० १।२।२) 'अप्राणो ह्यमनाः शुभ्रः' (मुण्ड० २।१।२) 'असङ्गो ह्ययं पुरुषः' (बृह० ४।३।१५) इत्यादिश्रुतिभ्यः। अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नियमिति सिद्धम्।

तत्र किंचित्परिणामि नित्यं यस्मिन्विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते। यथा पृथिव्यादि जगन्नित्यत्ववादिनाम्। यथा च साङ्ख्यानां गुणाः। इदं तु पारमार्थिकं, कूटस्थनित्यं, व्योमवत्सर्वव्यापि सर्वविक्रियारहितं, नित्यतृप्तं, निरवयवं, स्वयंज्योतिःस्वभावम्।

---

रूपस्य मोक्षस्य धर्मकार्यत्वं इति शङ्कते—अशरीरत्वमेवेति। तत्प्रतिषेधति—नेति। तत्र हेतुमाह—तस्येति। नित्यसिद्धत्वादित्यर्थः। श्रुतिं प्रमाणयति—अशरीरं शरीरेष्विति। कर्मफलाद्वैलक्षण्यं उपक्रान्तं उपसंहरति—अत एवेति। अशरीरत्वस्य स्वाभाविकत्वादेवेत्यर्थः। सिद्धमिति। एकमेवाऽद्वितीयम्। नेह नानास्ति किञ्चन। अथात आदेशो नेति नेतीत्यादिश्रुतिभ्यो ब्रह्मणि ज्ञाते सर्वद्वैतप्रतिषेधेऽपि सर्वथा ब्रह्मणो नाऽन्यशेषत्वमिति भावः। ब्रह्मैव वियदाद्याकारेण परिणमत इति वदन्वादी शङ्कते—तत्रेति। तदेवोपपादयति—यदस्मिन्निति। तत्र मतान्तरसम्मतिमाह—यथेति। तत्रैव साङ्ख्यमतं संवादयति—यथा चेति। परिहरति—इदन्त्विति। तुशब्दः पूर्वपक्षव्यावृत्यर्थः। मोक्षस्वरूपमेवोपपादयति—पारमार्थिकमिति। कूटवन्निर्विकारेण तिष्ठतीति कूटस्थम्। अथ वा कूटो माया तदधिष्ठानरूपेण तस्मिन्तिष्ठतीति कूटस्थम। तच्च तन्नित्यं च कूटस्थनित्यम्। सर्वाधिष्ठानं अपि ब्रह्म स्वाधिष्ठेयसंस्पृष्टम्। तत्र दृष्टान्तमाह—व्योमवदिति। व्योमवत्परिच्छिन्नत्वं वारयति—सर्वाव्यापीति। व्योमादिसर्वविकाराणां आस्पदत्वेन विकारत्वं स्यादित्यत आह—सर्वविक्रियारहितमिति। एवंभूतस्याऽपि स्वाभीष्टसिद्ध्यर्थं प्रवृत्तिः स्यादित्यत आह—नित्यतृप्तमिति। तस्यानित्यत्वशङ्कां वारयति—निरवयवमिति। तस्य प्रमाणान्तराविषयत्वमाह—स्वयं ज्योतिःस्वभावं इति। धर्माधर्माभ्यां संसारित्वं स्यादित्यतः

यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' क० २।१४) इत्यादिश्रुतिभ्यः। अतस्तद्ब्रह्म यस्येयं जिज्ञासा प्रस्तुता, तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत, नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते, अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः।

अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३।२।९) 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' (मुण्ड० २।२।८)। 'आनन्दं ब्रह्मणो

---

आह—यत्रेति। रज्जुसर्पवदारोपितधर्माधर्मयोः सकार्ययोः कालत्रयेऽपि यस्मिन्ब्रह्मणि सम्बन्धो नास्ति। तदित्यन्वयः। तस्य मोक्षाख्यस्याधर्मफलाद्वैलक्षण्यप्रतिपादकश्रुतिं पठति—अन्यत्रेत्यादिना। अन्यत्राऽन्यदित्यर्थः। कृतात्कार्यादकृतात्कारणद्भूतात् अतीताद्भव्याच्च भविष्यतश्च चकाराद्वर्तमानाच्च यदन्यत्तत्वं पश्यसि तद्वदेत्यर्थः। आदिपदेन अन्यदेव तद्विदितादथो अविदितादधि इत्यादिसङ्ग्रहः। अनेन मोक्षफलस्यैकरूपत्वं दर्शितम्। एवं भूतस्य ब्रह्मणो विधिशेषत्वं नास्तीति सङ्गृहीतम् विस्तरेण प्रपञ्चितं च यत् तदुपसंहरति—अतस्तदिति। तस्य कर्मशेषत्वं कयाऽपि युक्त्या संभावयितुं अशक्यमित्यत आह—तद्यदीति। कर्तव्यशेषत्वे दोषमाह—अनित्य एव स्यादिति। कर्मफलात् वैलक्षण्यं च न सिद्ध्यत् इत्यत आह—तत्रैवं सतीति। इष्टापत्तिमाशङ्क्य परिहरति—नित्यश्चेति। मोक्षवादिभिरिति। आस्तिकैरित्यर्थः। परमप्रकृतमुपसंहरति—अतः इति। यतो ब्रह्मणः कार्यशेषत्वे दूषणान्युक्तानि अत इत्यर्थः। ब्रह्मणः कर्तव्यशेषत्वासंभवे श्रुतीरुदाहरति—अपि चेति। ब्रह्म वेद ब्रह्मैव भवतीत्येवमाद्याः। परश्चासाववरश्च परावरः। परः परमात्मा। अवरो जीवः। तस्मिन्दृष्टे साक्षात्कृते सति अस्य विदुषः कर्माणि सञ्चितानि क्षीयन्ते फलारम्भकाणि न भवन्तीत्यर्थः। एषा श्रुतिः दर्शनसमकालं

विद्वान् न बिभेति कुतश्चन' (तैत्ति० २।९)। 'अभयं वै जनक प्राप्तोऽसि' (बृह० ४।२।४)। 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृह० १।४।१०)। 'तत्र को मोह कः शोक एकत्वमनुपश्यतः' (ईशा० ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरमेव मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' (बृह० १।४।१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम्। यथा तिष्ठन्गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते। 'त्वं हि नः पिता योऽस्माकमविद्यायाः परंपारं तारयसि' (प्र० ६।८) 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु' (छान्दो० ७।१।३) 'तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान्सनत्कुमारः' (छान्दो० ७।२६।२) इति

---

मोक्षं दर्शयन्ती कार्यान्तरं वारयतीत्यर्थः। ब्रह्मणः स्वरूपभूतमानन्दं विद्वान्न बिभेति कुतश्चनेत्यन्वयः। उदाहृतश्रुतीनां तात्पर्यं दर्शयति—इत्येवमाद्या इति। अस्मिन् एवाऽर्थे प्रतिपत्तिदार्ढ्याय स्मारंस्मारं अन्याः श्रुतीरुदाहरति—तदा तद्धैतदिति। वामदेवो नामर्षिः तत्पूर्वोक्तजगत्कारणं एतत्प्रत्यगात्मस्वरूपं पश्यन् साक्षादनुभवन् अहमेव मनुस्सूर्यश्चाऽहमेवेति मत्तोऽन्यत्किञ्चिन्नास्तीति सर्वात्मकब्रह्मैव प्रतिपेदे इत्यन्वयः। तत्रैव लौकिकं दृष्टान्तमाह—यथेति। पुनरपि स्मृत्यन्तरं उदाहरति—त्वं हि न इति। च्छान्दोग्यश्रुतिमुदाहरति—श्रुतं हीति। पारं तारयत्विति नारदस्य प्रश्नः। तस्मै नारदाय सनत्कुमारोक्तमुपदेशरूपं वाक्यमनुवदति—तस्मा इति। मृदिताः क्षपिताः कषायाः रागद्वेषादयः येन स तथा। तस्मै नारदाय तमसः सकारणसंसारस्य पारं संसारबन्धरहितं आत्मस्वरूपं दर्शयति अनुभावयतीत्यर्थः। आदिशब्देन अथ सोऽभयङ्गतो भवतीत्याद्याः गृह्यन्ते। चशब्दोऽनुक्तसमुच्चयार्थः। उदाहृतश्रुतीनां परमतात्पर्यमाह—मोक्षेति। नित्यसिद्धस्य

चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति । तथाचाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्—'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या० सू० १।१।२) इति । मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति।

नचेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्। यथा 'अनन्तं वै

---

प्रतिबन्धः अज्ञानं विपरीतज्ञानं च । तन्निवृत्तिमात्रमेव ब्रह्मविद्याफलं दर्शयन्तीति भावः । एवं नित्यशुद्धबुद्धमुक्तस्वभावे ब्रह्मणि अज्ञानमेकं मुक्त्वा तथाविधात्मानुभवप्रतिबन्धकमन्यन्नास्तीत्यत्र शास्त्रान्तरसम्मतिमाह—तथा चेति । न्यायैः अनुग्रहीतृतर्कैः उपबृंहितं परिशोधिततात्पर्यकं गौतमाचार्यप्रणीतम्, अस्मदुक्तेऽर्थे सम्मतिः अस्तीत्यर्थः । दुःखमिति विषयसुखोपलक्षणार्थम्। तदप्यन्तवत्वादिदोषाद्दुःखमेव। तथा च सुखदुःखाद्यनुभवलक्षणः संसारः स एव बन्धः । तस्य कारणं जन्म शरीरारम्भः । आरब्धे हि शरीरे सुखाद्यनुभवो दृश्यते तस्य कारणं पुण्यापुण्यकर्मसु प्रवृत्तिः अनुष्ठानं, तस्याः कारणं रागादिदोषाः । प्रवृत्तिजन्मद्वारा दुःखहेतुत्वाद्दोषत्वम् तेषां रागादीनां, एतस्य सर्वस्याऽप्युपादानकारणं मिथ्याज्ञानम्। मिथ्या च तदज्ञानं चेति विग्रहः। तच्च भावस्वरूपं परैरपि तथाऽङ्गीकर्तव्यम्। अन्यथा तदितरभावोपादानत्वानुपपत्तेः। सर्वोपादानभूतस्य मिथ्याज्ञानस्य निवृत्तिः कस्मादित्यतः आह—ब्रह्मात्मैकत्वेति । तत्त्वज्ञानेन मिथ्याज्ञानस्य पाठक्रमेण सर्वोत्तरस्य बाधः। तस्मिन्नज्ञाने बाधिते ततोऽव्यवहितपूर्वस्योपादेयस्य दोषस्य बाधः। ततः तदुपादेयभूतायाः प्रवृत्तेः ततो जन्मनः ततो दुःखस्येति सकारणस्य संसारस्याऽधिष्ठानावशेषेण निवृत्तिरिति स्वसिद्धान्तसिध्या सूत्रार्थमभिप्रेत्य सम्मतित्वेनोपन्यस्तं आचार्यचरणैः। संसारस्याज्ञानकार्यत्वं अज्ञानस्य च ज्ञाननिवर्त्यत्वं इत्येतत्परैः अप्यङ्गीकर्तव्यमेवेति। भवतु ब्रह्मात्मैकत्वविज्ञानं नित्यसिद्धमोक्षाभिव्यञ्जकम्, तथाऽपि संपदादिरूपमस्त्वित्याशङ्क्य वस्तुपरिशोधनाय क्रमेण परिहरति—न चेदमित्यादिना। संपद्रूपमिति। आरोप्यस्य प्राधान्येन चिन्तनम् सम्पदुपासनं ; मनसि विश्वान्देवानध्यस्य उपासनं विधीयते। तत्राऽधिष्ठानं मनः। आरोप्या विश्वेदेवाः। अधिष्ठानारोप्ययोः सादृश्यं वक्तव्यम्। तत् किमित्यत आह—अनन्तमिति। वृत्तीनामानन्त्याद्वृत्तिवृत्तिमतोरभेदोपचारेण वै निश्चयेन मनोऽनन्तमिष्यते। अधिष्ठानसारूप्यमारोप्यमाणानामपि दर्शयति—

मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' (बृह० ३।१।९) इति। न चाध्यासरूपम्। यथा 'मनो ब्रह्मेत्युपासीत' (छान्दो० ३।१८।१) 'आदित्यो ब्रह्मेत्यादेशः' (छान्दो०३।१९।१) इति च मन-आदित्यादिषु ब्रह्मदृष्ट्यध्यासः। नापि विशिष्टक्रियायोगनिमित्तं 'वायुर्वाव संवर्गः' 'प्राणो वाव संवर्गः' (छान्दो० ४।३।१) इतिवत्। नाप्याज्यावेक्षणादिकर्मवत्कर्माङ्गसंस्काररूपम्। संपदादिरूपे हि

---

अनन्ता विश्वेदेवा इति। अनन्तवृत्तिमन्मनोऽभेदेन विश्वेदेवाश्चिन्तनीया इति श्रुत्यर्थः। तथोपासनफलमाह—अनन्तमेवेति। स उपासकः तेनोपासनेन अनन्तं लोकं जयति प्राप्नोत्येवेति। न चेति निराकरणहेतुः अग्रे वक्ष्यते। अध्यासरूपमाशङ्क्य निषेधति—न चेति। अध्यासरूपं प्रतीकोपासनं अधिष्ठानप्राधान्येन चिन्तनम्। तदुदाहरति—यथेति। अत्र मनोऽधिष्ठानं आरोप्यं, ब्रह्म; एवं च आरोपितब्रह्मवन्मनश्चिन्तनीयत्वेन उपदिश्यते। एवं आदित्यो ब्रह्मेत्यादावपि द्रष्टव्यमित्याह—आदित्य इति। आदेश उपदेशः इति यावत्। चशब्दोऽनुक्तसमुच्चयार्थः। तद्विवृणोति—मन आदिष्विति। विशिष्टक्रियायोगनिमित्तोपसनारूपत्वं आशङ्क्य निराकरोति—नाऽपीति। तदुदाहरति—वायुर्वावेति। अत्र वायुरुपास्यत्वेनोपदिश्यते। संवरणक्रियायोगात्। तथाहि श्रुतिः। वायुर्वाव संवर्गः। यदा वा अग्निः उद्वायति वायुमेवाऽप्येति। यदा सूर्योऽस्तमेति वायुमेवाप्येति। यदा चन्द्रोऽस्तमेति वायुमेवाऽप्येति। यदाप उच्छुष्यन्ति वायुमेवापियन्ति। वायुर्ह्येवैतान् सर्वान् संवृङ्क्ते इति। वायुः स्वस्वरूपेण एतान्देवान् संवृङ्क्ते उपसंहरति। इदं चाधिदैवतम्। अध्यात्मञ्च तदुपासनमाह—प्राणो वावेति। प्राणो वाव संवर्गः स यदा स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रम् प्राणं मन इति। प्राणो ह्येवैतान्सर्वान्संवृङ्क्ते। इत्युक्तार्थम्। इदं च विशिष्टक्रियायोगनिमित्तोपासनम्। तदपि नेत्यन्वयः। अङ्गावबद्धोपासनरूपमपि प्रतिषेधति—नापीति। यथा पत्नीसंयाजरूपकर्माङ्गस्याज्यस्य पत्न्यवेक्षणरूपसंस्कारो विधीयते, तद्वत्कर्तृत्वेन कर्माङ्गस्य आत्मनः संस्काररूपं ब्रह्मज्ञानम्। तदपि न संभवतीत्यन्वयः। चतुर्ष्वपि पक्षेषु साधारणं निराकरणहेतुमाह—संपादादिरूपे हीति। आत्मानं ब्रह्मत्वेन संपाद्य आत्मनि वा ब्रह्मत्वं अध्यस्य जन्मस्थित्यादिक्रियायोगाद्वा

ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि' (छान्दो० ६।८।७) 'अहं ब्रह्मास्मि' (बृ० १४।१०) 'अयमात्मा ब्रह्म' (बृह० २।५।१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मुण्ड० २।२।८) इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्। 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड० ३।२।९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन्। तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्। अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या। किं तर्हि, प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रैव। एवंभूतस्य ब्रह्मणस्तज्ज्ञा-

---

कर्मापेक्षितकर्तृसंस्कारार्थत्वेन वा ब्रह्मात्मैकत्वविज्ञाने अभ्युपगम्यमाने पदसमन्वयः पीड्येतेति हेतूपन्यासः। केषामित्याकाङ्क्षायामाह—तत्त्वमसीत्यादिना। तत्त्वमस्यादिवाक्यानि भ्रान्तिसिद्धं भेदमनूद्य तन्निराकरणपूर्वकं पारमार्थिकं जीवब्रह्मैक्यं बोधयन्ति। संपदादिरूपत्वे हि भिन्नयोर्जीवब्रह्मणोः ऐक्यमध्यस्यत इति तत्त्वमस्यादिवाक्यविरोधात्तत्पदसमन्वयः पीड्यतेत्याशयः। ननु पारमार्थिकब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने संपदादिवाक्यं पीड्येतेति चेत्। इष्टापत्तिरिति मत्वा श्रुतिमुदाहरति—भिद्यत इति। आदिपदेन अथात आदेशो नेति नेतीत्यादीनि वाक्यानि गृह्यन्ते। तत्रैव विरुद्धवाक्यान्तरमुदाहरति—ब्रह्म वेदेति; तद्भावापत्तिः जीवस्य ब्रह्मभावापत्तिः। संपदादिपक्षे तूक्तदोषमुपसंहरति—तस्मान्नेति। निषेधफलमाह—स पुरुषेति। संपदादिज्ञानं हि पुरुषेण कर्तुं अकर्तुं अन्यथाकर्तुं शक्यमिति पुरुषव्यापारतन्त्रम्। ब्रह्मविद्या तु न तथेत्यर्थः। तर्हि कथं ब्रह्मविद्योत्पद्यत इति पृच्छति—किन्तर्हीति। दृष्टान्तोक्तिपूर्वकं तदुत्पत्तिप्रकारमाह—प्रत्यक्षादीति। वस्तुतन्त्रैवेति। कर्तुमकर्तुमन्यथाकर्तुमित्यर्थः। संपदादिरूपत्वेन ब्रह्मणः कार्यानुप्रवेशपूर्वपक्षस्य निराकरणरूपसिद्धान्तमुपसंहरति—एवंभूतस्येति। ब्रह्मणः दध्यादिवत्कार्यानुप्रवेशो मा भवतु। तद्ज्ञानस्य तु स्यात् देवताज्ञानादिवदित्यत आह—तद्ज्ञानस्य वेति। एषोऽणुरात्मा चेतसा वेदितव्यः। आत्मा वा अरे द्रष्टव्यः इत्यादिश्रुतिषु ब्रह्मणो विदिक्रियाकर्मत्वं प्रतीयते।

नस्य वा न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्। न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः, अन्यदेव तद्विदितादथो अविदितादधि' (केन० १।३) इति विदिक्रियाकर्मत्वप्रतिषेधात्, येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृह० २।४।१३) इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति—यद्वाचानभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य, 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (केन० १।४) इति।

अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्। न।

---

तदेतदाशङ्क्य निषेधति—न चेति। तत्र हेतुमाह—अन्यत् एवेति। विदिताद्वेदनविषयादन्यदेव ब्रह्म, वेदनविषयो न भवति। तर्ह्यविद्याविषयः स्यात्, नेत्याह—अविदितादिति। तर्हि शून्यत्वं स्यादित्यत आह—अधीति। अविद्याविद्ययोः अधिष्ठानत्वेन सिद्धमित्यर्थः। अथो इति समुच्चयार्थः। श्रुतितात्पर्यमाह—विदिक्रियेति। श्रुत्यैव विदिक्रियाकर्मत्वं यस्मात् प्रतिषिध्यते तस्मात् न विदिक्रियाकर्मत्वं ब्रह्मण इति भावः। ननु चेतसा वेदितव्यः इति विदिक्रियाकर्मत्वं श्रूयते। अन्यदेव तद्विदितादिति क्रियाकर्मत्वं प्रतिषिध्यते। तथा चोभयोः विरोधे कस्योपादानं न्याय्यम्। कस्य वा हानमिति विशये प्रतिषेधवाक्यानुकूलं न्यायोपबृंहितं वाक्यं उदाहरति—येनेदमिति। येन स्वप्रकाशस्वरूपेणाऽऽत्मना प्रकाशितमिदं सर्वं विशेषेण जानाति विज्ञाता तं परमात्मानं केन कारणेन विजानीयात्। न कस्याऽपि ज्ञानस्य गोचर इत्यर्थः। वेदितव्य इत्यस्य परिहार अग्रे वक्ष्यते। उपास्तिक्रियाकर्मत्वमप्यत एव प्रतिषिध्यत इत्यत आह—तथेति। तत्र तत्प्रतिषेधकवाक्यमुदाहरति—अविषयत्वमिति। यद्वाचाऽनभ्युदितम् येन वागभ्युद्यते इनि वागाद्यविषयत्वं ब्रह्मणः उपन्यस्याह—तदेवेति। यदिदमिति। नोपासते जनाः। यदुपासना विषयो न भवति। तदेव ब्रह्म। इदमिति यदुपासते। इदं परब्रह्म न भवतीति उपस्तिक्रियाकर्मत्वप्रतिषेधात् न कार्यशेषत्वं ब्रह्मणः इति भावः। ब्रह्मणो विदिक्रियाकर्मत्वप्रतिषेधे शास्त्रप्रमाणकत्वं यत् उक्तम्। तदसङ्गतमित्याक्षिपति—अविषयत्व इति। आक्षेपमनूद्य निषेधति—इति चेन्नेति।

अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। नहि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि, प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृ-वेदनादिभेदमपनयति। तथाच शास्त्रम्—यस्याऽमतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं

---

स्वाभिप्रेतं हेतुमाह—अविद्येति। अविद्यापरिकल्पितो यो जीवपरभेदो यस्मिन् तत्रैव तन्निवृत्तिरूपदिश्यते शास्त्रेण। अतः शास्त्रप्रमाणकं ब्रह्मेत्युच्यत इति भावः। ननु यद्यत्र प्रमाणम् तत्तद्विषयकप्रमां जनयित्वैव तद्गताज्ञानादिनिवर्तकमिति नियमो दृष्टः। तथा सति ब्रह्मणः शास्त्रजन्यज्ञानविषयत्वाभावे तद्गताज्ञानादिनिवृत्तिरपि न संभवतीत्यतः आह—न हीति। ब्रह्मणः शास्त्रप्रमाणकत्वं नाम शास्त्रजन्यवृत्तिव्याप्यत्वं वा। उत शास्त्रजन्यवृत्त्यभिव्यक्तफलव्याप्यत्वं वा। द्वितीये वृत्त्यभिव्यक्तब्रह्मस्वरूपस्यैव प्रमाणफलत्वेन स्वस्य स्वविषयत्वासम्भवात् विषयत्वेन न प्रतिपादयिष्यति। न ह्यत्यन्तासंभावितं अर्थं प्रतिपादयत् शास्त्रं प्रमाणं भवतीति भावः। आद्यपक्षं उत्थापयति—किन्तर्हीति। यथाभूतार्थं प्रतिपादयदेव शास्त्रं प्रमाणं भवितुमर्हति। यथाभूतार्थस्तु प्रत्यगभिन्नं ब्रह्मैव सर्वप्रमाणविषयः। तेन रूपेण प्रतिपादयदखण्डाकार-साभासवृत्तिमुत्पादयदेवाऽनाद्यविद्यापरिकल्पितवेद्यवेदितृवेदनादिभेदमपनयतीति युक्तम्। प्रमाणस्यायं स्वभावः यत्स्वजन्यसाभासवृत्त्या विषयगताज्ञानादिकं निवर्तयतीति। तदुक्तम्—

वृत्तिधीस्थचिदाभासौ द्वावपि व्याप्नुतो घटम्।
तत्राऽज्ञानं धिया नश्येत् आभासेन घटस्स्फुरेत्॥

इत्युक्त्वा पुनरप्युक्तम्—

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।
फलव्याप्यत्वमेवाऽस्य शास्त्रकृद्भिर्निवारितम्॥

इति। तस्माच्छास्त्रजन्यसाभासाखण्डाकारधीवृत्त्यालम्बनत्वमेव ब्रह्मणः शास्त्रप्रमाणत्वम्। न फलव्याप्यत्वमपीति सिद्धम्। अस्मिन्नर्थे शास्त्रमुदाहरति—तथाचेति। यस्य विदुषः पक्षे ब्रह्म अमतं प्रमाणजन्यफलव्याप्यं न भवति। तस्य पक्षे मतं तेन सम्यग्ज्ञात-मित्यर्थः। यस्य मते पुनः मतं मया ज्ञातं इत्यभिमानः स न वेद। अविषयं विषयत्वेन जानन् मिथ्यादर्शी अज्ञ इत्यर्थः। उक्तां श्रुतिं श्रुतिः स्वयमेव व्याचष्टे—अवि-

विजानतां विज्ञातमविजानताम्' (केन० २।३) 'न दृष्टेर्द्रष्टारं पश्येः', 'न विज्ञातेर्विज्ञातारं विजानीयाः' (बृह० ३।४।२) इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः। यस्य तूत्पाद्यो मोक्षस्तस्य मानसं, वाचिकं, कायिकं वा कार्यमपेक्षत इति युक्तम्। तथा विकार्यत्वे च। तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यं,उत्पाद्यं वा घटादि, नित्यं दृष्टं लोके। नचाप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं, सर्वगतत्वेन नित्याप्त-

---

ज्ञातमिति। व्याख्यातार्थे श्रुत्यन्तरमाह—न दृष्टेरिति। दृष्टेः लौकिकदृष्टेः रूपाद्याकारायाः द्रष्टारं तत्साक्षिरूपं न पश्येः ज्ञानेन विषयीकुर्याः इति चक्षुर्जन्यज्ञानाविषयत्वं वदति। एवमुत्तरत्राऽप्यूह्यमिति चैवमादि शास्त्रं ब्रह्मणः सर्वप्रमाणाविषयत्वं आहेत्यन्वयः। शास्त्रस्य साभासाखण्डाकारान्तः करणवृत्त्युत्पादनेनाऽविद्यापरिकल्पितसंसारित्वभ्रान्तिनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्याऽनित्यत्वादिदोषाः प्रसज्येरन्नित्युपसंहरति—अत इति। उत्पत्तिराप्तिर्विकारस्संस्कार इति चतुर्विधं कर्मफलम्। तेष्वन्यतररूपं निश्श्रेयसं भविष्यतीत्याशङ्क्य क्रमेण निराचष्टे—यस्य त्वित्यादिना। मोक्षस्योत्पाद्यत्वे तदपेक्षितं कारणमाह—तस्येति। मत इति शेषः। यत्फलं तत्क्रियाजन्यं इत्यतिव्याप्तिं अभिप्रेत्याह—इति युक्तमिति। उक्तं विकार्यत्वपक्षेऽप्यतिदिशति—तथेति। पक्षद्वयेऽपि समुच्चित्य दूषणं आह—तयोरिति। यज्जन्यं तदनित्यं इति व्याप्तेरिति भावः। उक्तमर्थं दृष्टान्तेन स्पष्टयति—न हीति। दुग्धं आतञ्चनादिना दध्यादिरूपेण विक्रियत इति विकार्यम्। दधि आतञ्चनक्रियाफलम्। आदिशब्देनामिक्षादिपरिग्रहः। उत्पाद्यन्तु घटादि कुलालादिक्रियया उत्पद्यते। एतद्द्वयं नित्यं न दृष्टं हीत्यन्वयः। तर्ह्याप्यत्वेन क्रियाफलत्वमस्त्विवाशङ्क्य निषेधति—न चेति। अपिशब्दः उक्तदूषणसमुच्चयार्थः। यथा दोहनक्रियया दुग्धं प्राप्यते। एवं श्रवणादिक्रियया मोक्षः प्राप्यत इति अयं पक्षोऽपि न संभवतीति भावः। तत्र हेतुमाह—स्वात्मेति। नित्याप्तस्य आत्मस्वरूपस्य क्रियया प्राप्यत्वासंभवादिति भावः। आत्मस्वरूपव्यतिरिक्तो मोक्षः स चात्मना केन-

स्वरूपत्वात्सर्वेण ब्रह्मणः, आकाशस्येव। नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा। न तावद्गुणाधानेन संभवति, अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, यथाऽऽदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेत्। न। क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया क्रिया तमविकुर्वती नैवात्मानं लभते। यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत। 'अविकार्योऽयमुच्यते' इति चैवमादीनि

---

चिदुपायेन प्राप्यत इति मतमनूद्य दूषयति—स्वरूपेति। तत्र हेतुमाह—सर्वेति नहि प्राप्तं पुनः प्राप्यत इति भावः। आप्तस्याप्राप्यत्वे दृष्टान्तमाह—आकाशस्येति। यथा व्रीहीन्प्रोक्षतीति प्रोक्षणक्रियया व्रीह्यादिकं संस्क्रियते। एवं श्रवणादिक्रियया मोक्षस्संस्क्रियत इति पक्षमनूद्य निराकरोति—नापीति। तत्र हेतुं आह—येनेति। अतो न क्रियापेक्षा मोक्षस्येति भावः। नन्वविद्यादिदोषदूषितो मोक्षः श्रावणादिक्रियया संस्क्रियमाणोऽभिव्यक्तो भविष्यतीति पक्षं दूषयितुं विकल्पयति—संस्कारो हीति। तत्राऽऽद्यपक्षं निराकरोति—न तावदिति। तत्र हेतु माह—अनाधेयेति। द्वितीयं पक्षं दूषयितुं अनुवदति—नाऽपीति। तत्र हेतुमाह—नित्येति। प्रकारान्तरेण मोक्षस्य संस्कार्यत्वमाशङ्क्य निराकरोति—स्वात्मेति। तत्र दृष्टान्तमाह—यथेति। आदर्शस्य भास्वरत्वं धर्मः स मालिन्येन तिरोभूतस्सन् निघर्षणक्रियया मलापनयने सति स्वयमेवाऽभिव्यज्यते। एवमात्मधर्मः मोक्षोऽप्यभिव्यज्यत इति पूर्वपक्षमनूद्य निराकरोति—नेति। तत्र हेतुमाह—क्रियेति। आदर्शस्य निघर्षणक्रियया संस्कार्यत्वसंभवेऽप्यात्मनो निरवयवस्य सर्वसंस्काररहितस्य क्रियाश्रयत्वानुपपत्तेः न संस्कार्यत्वम्। अतो दृष्टान्तवैषम्यं इति भावः। दोषान्तरमाह—यदिति। लोके यदाश्रया जन्यते सा स्वाश्रये विकारं जनयित्वैव स्वयं जायते। अन्यथा न जायते। अतः आत्माश्रयक्रियया आत्मा संस्क्रियते चेत्। आत्मनः विक्रियत्वमनित्यत्वं च प्रसज्येत। इष्टापत्तिमाशङ्क्य श्रुतिविरोधेन परिहरति—अविकार्य इति। आत्मनः विक्रियावत्वे स्वीक्रियमाणे तु 'अविकार्योयमुच्यत' इत्यादि-

वाक्यानि बाध्येरन्। तच्चानिष्टम्। तस्मान्न स्वाश्रया क्रियाऽऽत्मनः संभवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयाऽऽत्मा संस्क्रियते।

ननु देहाश्रयया स्नानाचमनयज्ञोपवीतधारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः। न। देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलं अहमरोग इति यत्र बुद्धिरुत्पद्यते। एवं स्नानाचमनयज्ञोपवीतादिना अहं शुद्धः संस्कृत इति यत्र

---

श्रुतिविरोधः स्यात् इति भावः। तत्राऽपीष्टापत्तिमाशङ्क्य परिहरति—तच्चेति। तदिति। तत् श्रुतिबाधनम्। चकारात् आत्मनो विकारित्वमनित्यत्वं चेति तद्द्वयं मोक्षवादिनामनिष्टमिति भावः। आत्माश्रितक्रियया आत्मा संस्क्रियत इति मतदूषणमुक्तमुपसंहरति—तस्मान्नेति। अन्याश्रयक्रिययाऽऽत्मा संस्क्रियते इति पक्षं अनूद्य दूषयति—अन्येति। तत्र हेतुमाह—अविषयत्वादिति। लोके आदर्शाश्रितया निघर्षणक्रियया अन्यस्ताम्रादि न संस्क्रियते। अविषयत्वात्। एवं आत्मापीति भावः। उक्तनियमस्य व्यभिचारं शङ्कते—नन्विति। आत्मनोऽन्यो देहादि। तदाश्रयया क्रियया देही संस्क्रियमाणः इत्यन्वयः। परिहरति—नेति। देहाश्रितया क्रिययाऽऽत्मा न संस्क्रियत एव। किञ्च आत्मनोऽन्य एवेत्यभिप्रेत्याऽऽह—देहेति। स्नानाचमनादेःदेहाश्रयत्वमेव प्रपञ्चयति—प्रत्यक्षं हीति। युक्तमिति। देहादिसंघातस्याऽऽत्मनः संस्क्रियमाणत्वं युक्तमिति भावः। तत्रैव लौकिकदृष्टान्तमाह—यथा देहाश्रयेति। धातुवैषम्यात्प्राप्तरोगस्य चिकित्सया धातुसाम्ये सति देहादिसङ्गतमेवाऽऽरोग्यं तदभिमानिनि प्रतीयत इत्याह—अहमरोगः इति। दार्ष्टान्तिकमाह—एवमिति। स च संस्क्रियमाण आत्मा

बुद्धिरुत्पद्यते स संस्क्रियते। स च देहेन संहत एव। तेनैव ह्यहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति, 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति (मुण्ड० ३।१।१) इति मन्त्रवर्णात्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (काठ० १।३।४) इति च। तथा 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' (श्वेता० ६।११) इति। 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरँ शुद्धमपापविद्धम्' (ईशा० ८) इति च एतौ मन्त्रावनाधे-

---

न भवति। किन्तु देहे संहत एवेत्याह—स चेति। तत्र हेतुमाह—तेनैवेति। हिशब्दो निश्चयार्थः। तस्य स्वरूपं प्रपञ्चयति—अहं कर्त्रेति। अहमिति प्रत्ययोऽस्यास्तीति अहंप्रत्ययी- अहंकारः। स एव विषयः। तेन प्रत्ययिना विषयिणाऽऽत्मत्वेनाभिमतेन सर्वाः क्रियाः निर्वर्त्यन्ते। त्रिभिः विशेषणैः प्रत्यगात्मनः कर्तृत्वादि व्यावर्तते। अतो न प्रत्यगात्मा देहादिसंस्कारैः संस्क्रियते। किंतु साभासाहङ्कार एव। अतो न संस्कार्यो मोक्ष इत्यर्थः। नन्वात्मनः कर्तृत्वाभावेऽपि साङ्ख्यात्मवद्भोक्तृत्वमस्त्वित्यत आह—तत्फलमिति। तत्र श्रुतिं प्रमाणयति—तयोरन्य इति। आत्मनः अभोक्तृत्वे श्रुतिमुदाहरति—अनश्नन्निति। यस्मादकर्तृत्वमात्मनः तस्मादभोक्तृत्वमिति श्रुतितात्पर्यमाह—इतीति। देहाद्यभिमानिन एव भोक्तृत्वे श्रुतिमुदाहरति—आत्मेन्द्रियमिति। अत्राऽऽत्मशरीरेन्द्रियाद्यभिमानिनं भोक्तारं मनीषिणः आहुः इत्यन्वयः। शुद्धस्य प्रत्यगात्मनः भोक्तृत्वाभावे श्रुतिमुदाहरति—तथा चेति। कर्माध्यक्ष इति। क्रियतेऽनेनेति कर्माहङ्कारः। तस्याऽध्यक्षः सन्निधिमात्रेण सूर्यवत्प्रवर्तक इत्यर्थः। सर्वाणि भूतान्यधिवसन्त्यस्मिन्निति। सर्वेषु वा भूतेषु अधिष्ठानरूपेण वसत्ययमिति सर्वभूताधिवासः। स्पष्टार्थमन्यत्। अत्रैव श्रुत्यन्तरं उदाहरति—स पर्यगादिति। स परमात्मा परितः अगात् सर्वतो व्यापक इति यावत्। शुक्रं शुक्लं रलयोरभेदात्। अकायं सूक्ष्मदेहरहितम्। अव्रणम् अस्नाविरमित्याभ्यां स्थूलदेहराहित्यमुच्यते। शुद्धमज्ञानरहितमपापविद्धं तत्कार्यरहितम्। अनयोः मन्त्रयोः तात्पर्यमाह—इति चैताविति। नाधीयते उत्पाद्यते अतिशयो यस्मिन् तत्

यातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः। तस्मान्न संस्कार्योऽपि मोक्षः। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद्दर्शयितुम्। तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते।

ननु ज्ञानं नाम मानसी क्रिया। न। वैलक्षण्यात्। क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च। यथा 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्' इति। 'सन्ध्यां मनसा ध्यायेत्' (ऐ० ब्रा० ३।८।१) इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसं तथापि पुरुषेण

---

अनाधेयातिशयम्। अत एव नित्यशुद्धम्। तस्य भावस्तत्तामित्यर्थः। भवतु ब्रह्मणः नित्यशुद्धत्वेनासंस्कार्यत्वम्। मोक्षस्य तु स्यादित्यत आह—ब्रह्मभावश्चेति। ब्रह्मानन्यत्वान्मोक्षस्य न संस्कार्यमित्युपसंहरति—तस्मान्नेति। चतुर्विधक्रियाफलविलक्षणस्याऽपि मोक्षस्य क्रियाप्रवेशद्वारं अन्यद्भविष्यतीत्याशङ्क्य निराकरोति—अतोऽन्यदिति। दर्शयितुमशक्यमिति।— नास्त्येवेत्यर्थः। तदेतदुपसंहरति — तस्मादिति। स्थूणानिखननन्यायेन ब्रह्मस्वरूपलक्षणमोक्षस्य क्रियाशेषत्वं नास्तीत्येतद्द्रढयितुं प्रकारान्तरेण तदाशङ्कते—नन्विति। श्रवणजन्यज्ञानस्य मनोवृत्तिरूपस्य क्रियात्वात्तद्व्याप्यत्वेन क्रियाशेषत्वं ब्रह्मणो भविष्यतीत्यर्थः। पूर्वपक्षं प्रतिक्षिपति—नेति। तत्र हेतुमाह—वैलक्षण्यादिति। श्रवणादिजन्यज्ञानस्य मनोवृत्तित्वेऽपि न सा क्रिया। क्रियातो वैलक्षण्यात् इति भावः। ननु क्रिया नाम का, यतो वैलक्षण्यं ज्ञानस्य प्रतिपाद्यते त्वयेत्याकाङ्क्षायां क्रियास्वरूपमाह—क्रिया नामेति। मनोवृत्तित्वाविशेषेऽपि मानसक्रियाज्ञानयोः या वस्तुस्वरूपमनपेक्ष्य चोद्यते ध्यायेदित्यादिना, पुरुषतन्त्रा च भवति। सैव क्रियेत्यर्थः। तामेवोदाहरणमुखेन स्पष्टयति—यथेति। यां देवतामुद्दिश्याऽध्वर्युणा हविः गृहीतं स्यात्। तां देवतां वषट्करिष्यन् कर्ता ध्यायेदित्यन्वयः। उदाहरणान्तरमाह—सन्ध्यामिति। एवमादिष्विति। विधीयत इति शेषः। ध्यानशब्दार्थमाह—चिन्तनमिति। चिन्तनस्य ध्यानाद्वैलक्षण्यं उपपादयति—यद्यपीत्यादिना।

कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषयमतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्। केवलं वस्तुतन्त्रमेव तत्। न चोदनातन्त्रम्। नापि पुरुषतन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्। यथा च 'पुरुषो वाव गौतमाग्निः', 'योषा वाव गौतमाग्निः' (छान्दो० ५।७,८।१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च। या तु प्रसिद्धेऽग्नावग्निबुद्धिर्न सा चोदनातन्त्रा। नापि पुरुषतन्त्रा। किं तर्हि, प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति

---

उक्तमेव ज्ञानवैलक्षण्यं, तत्र हेतुः पुरुषतन्त्रत्वादिति। ज्ञानस्य क्रियावैलक्षण्यं तत्र हेतुः वस्तुतन्त्रत्वादिति। ज्ञानस्य क्रियावैलक्षण्यं आह—ज्ञानं त्विति। केवलचोदनाजन्या विषयनिरपेक्षा च मनोवृत्तिः क्रिया। यथाभूतवस्तुविषयिणी कार्यनिरपेक्षा प्रमाणजन्या या मनोवृत्तिः साभासा सा ज्ञानमित्यभिधीयते। ज्ञानस्य क्रियावैलक्षण्यमेव प्रपञ्चयति—अतो ज्ञानमिति। तर्हि ज्ञानस्य नियतविषयालम्बनेनोत्पत्तिः कथं स्यादित्यत आह—केवलमिति। पुरुषयत्नविषयमनपेक्ष्यैव वस्तुनः प्रमाणसम्बन्धेन अकामेनाऽपि जायते एव ज्ञानम्। फलितमाह—न चोदनेति। नापीति। या तु चोदनातन्त्रा पुरुषतन्त्रा च मनोवृत्तिः सैव क्रिया। केवलप्रमाणवस्तुपरतन्त्रा न क्रियेति भावः। ज्ञानस्य क्रियावैलक्षण्यमेवोपसंहारव्याजेन प्रपञ्चयति—तस्मादिति। ज्ञानस्य क्रियावैलक्षण्यं प्रपञ्चयितुं क्रियास्वरूपं उदाहरति—यथाचेति। पुरुषो वाव गौतमाग्निरिति पुरुषे अग्निदृष्टिः विधीयते तथा योषिति च। तयोरग्निभिन्नयोः अग्निबुद्धिः फलाय चोद्यमाना मानस्यपि केवलचोदनाजन्यत्वात् पुरुषतन्त्रत्वाच्च सा क्रियैवेत्यर्थः। ज्ञानस्य तद्वैलक्षण्यं उदाहरति—या त्विति। उक्तमर्थमन्यत्राप्यतिदिशति—एवमिति। फलितमाह—तत्रैवं सतीति। ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वे सतीत्यर्थः। ब्रह्मज्ञान-

यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्कुण्ठीभवन्त्युपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्, अहेयानुपादेयवस्तुविषयत्वात्।

किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि विधिच्छायानि वचनानि। स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः इष्टं मे भूयादनिष्टं मा भूदिति, नच तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविकात् कार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते 'इदं सर्वं यदयमात्मा' (बृह० २।४।६) यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्; केन कं विजानीयात्

---

मपि यथाभूतवस्तुविषयत्वान्न चोदनातन्त्रम्। किन्तर्हि? वस्तुतन्त्रमेवेत्यर्थः। आत्मानमेव लोकं उपासीत। सोऽन्वेष्टव्यः स विजिज्ञासितव्यः इति ब्रह्मणि विषये लिङादयः प्रयुज्यन्ते। तेषां का गतिरित्यत आह—तद्विषय इति। कुण्ठीभवन्तीति। न नियोजयन्तीत्यर्थः। कथमित्याकाङ्क्षायां आह—उपलादिष्विति। तत्र हेतुमाह—अनियोज्यविषयत्वादिति। लिङादेरनियोज्यविषयत्वं कथमित्यत आह—अहेयेति। नियोगो लिङादेरर्थः। तथा च द्रष्टव्य इत्यादिवाक्यानां अप्रामाण्यं स्यात् इत्यभिप्रेत्य शङ्कते—किमर्थानीति। प्रयोजनाभावादप्रामाण्यं स्यादिति भावः। परिहरति—स्वाभाविकेति। चित्तं स्वभावेनैव विषयाभिमुखं प्रवर्तते, तेन तदुपाधिको जीवः प्रवर्तत इत्युच्यते। इष्टानिष्टप्राप्तिपरिहाराय प्रवर्ततां नाम किमनिष्टं प्रसज्येतेत्यत आह—न चेति। तत्र बाह्यविषयकप्रवृतावित्यर्थः। लिङादिसहितानि वाक्यानि पुरुषस्य केन प्रकारेणोपकुर्वन्तीत्यत आह—तमिति। प्रत्यक्स्रोतस्तयेति प्रत्यगाभिमुख्येनेत्यर्थः। एवं प्रवृत्तं पुरुषं प्रति सिद्धार्थबोधकवेदान्तवाक्यैः किं क्रियत इत्यत आह—तस्येत्यादिना। एवं

विज्ञातारमरे केन विजानीयात्' बृह० ४।५।१५) 'अयमात्मा ब्रह्म' (बृह० २।५।१९) इत्यादिभिः ।

यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते । अलङ्कारो ह्ययमस्माकं यद्ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति । तथाच श्रुतिः—'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥' (बृह० ४।४।१२) इति । 'एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' । (भ० गी० १५।२०) इति च स्मृतिः । तस्मात् प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणम् ।

---

आत्मादिभिः अयत्नेन सिद्धज्ञानात् पुरुषार्थाभाव इति यदुक्तम् तत्परिहर्तुमनुवदति—यदपीति । यज्ज्ञानं पुरुषस्य प्रवर्तकं वा निवर्तकं वा न भवति तत् इष्टप्राप्त्यनिष्टपरिहारहेतुः न भवतीति ततः पुरुषार्थो न भवतीत्युक्तमिति भावः । स्वतस्सिद्धात्मयाथात्म्यज्ञानेपि पुरुषस्य प्रवृत्तिर्वा निवृत्तिर्वा न भवति । पुरुषार्थस्य सिद्धत्वादित्यतोऽस्माकं इष्टं सिद्धमेवेति । परिहरति –तत्तथैवेतीति । न केवलमभ्युपगममात्रमिदम् । किन्तु सहजालङ्कारोऽस्माकं इत्याह—अलङ्कारो हीति । हिशब्दो विद्वत्प्रसिद्धिद्योतनार्थः । ब्रह्मात्मैकत्वसाक्षात्कारे सति सर्वकर्तव्यतानिवृत्तेः कृतकृत्यो भवतीत्यत्र श्रुतिमुदाहरति—तथाचेति । आत्मानं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वविक्रियारहितं ब्रह्मैवाहं इति पुरुषो यदा निश्चयेन जानाति तदा आप्तव्यपुरुषार्थस्य काम्यस्य चाभावात् नित्यतृप्तत्वात् किमिच्छन् कस्य कामाय किं मोक्षाख्यफलं इच्छेत् । मोक्षस्य सिद्धत्वात् सिद्धे इच्छाविरहात् । कस्य कर्मणः काम्यत इति कामः स्वर्गादिफलम् । तस्माद्यथोक्तब्रह्मविज्ञाने सति कर्मप्रवर्तकक्रियाकारकादिसमस्तभेदस्योपमर्दितत्वात् कर्मैव न संभवतीति भावः । शरीरमनुसंज्वरेत्तप्यमानशरीरमनु सन्तप्येत । शारीरादिकर्मानुष्ठानं न करोत्येवेत्यर्थः । अस्मिन्नर्थे भगवद्वचनं प्रमाणयति—एतदिति । यथोपदिष्टं ब्रह्मेत्यर्थः । एवं सति ब्रह्मणः क्रियाशेषत्वं नास्तीत्येतदुपसंहरति—तस्मादिति । वेदान्तः विध्येकवाक्यतया प्रमाणम्

यदपि केचिदाहुः—'प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति' इति तन्न, औपनिषदस्य पुरुषस्यानन्यशेषत्वात्। योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' (बृह० ३।९।२६) इत्यात्मशब्दात्; आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात्। नन्वात्माऽहं प्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम्। न। तत्साक्षित्वेन प्रत्युक्तत्वात्

---

वेदत्वाद् अर्थवादादिवाक्यवत् इति केषाञ्चित्पक्षं दूषयितुं अनुवदति—यदपीति। दूषयति—तन्नेति। उक्तानुमाने स्वार्थविबोधात्फलविधुरत्वं उपाधिं मत्वा उपनिषन्मात्रसमधिगम्यस्य पुरुषस्य विज्ञाने शोकनिवृत्तिलक्षणं फलमस्तीत्यभिप्रेत्य तस्यानन्यशेषत्वं हेतुमाह—औपनिषदस्येति। उपनिषद्व्यतिरिक्तवेदभागस्य विधितच्छेषबोधकत्वनियमेऽपि उपनिषद्भागस्य स्वातन्त्र्येण फलवदर्थविबोधकस्य न विधिशेषतेति भावः। लोकवेदयोः अप्रसिद्धस्य पुरुषस्य उपनिषन्मात्रसमधिगम्यत्वं वाक्यतो लभ्यत इत्याशङ्क्य उपक्रमादिलिङ्गैः तात्पर्येण निर्णीतस्य प्रत्याख्यातुं अशक्यत्वात् विद्वदनुभवसिद्धत्वादात्मत्वाच्च तस्य नान्यशेषतेति अभिप्रेत्याह—योऽसाविति। अस्मिन्नर्थे श्रुत्यन्तरं प्रमाणयति—स एष नेति। मूर्तामूर्तादिसर्वद्वैतप्रतिषेधेऽपि सर्वाधिष्ठानस्याऽऽत्मनः प्रत्याख्यातुं अशक्यत्वात्। अधिष्ठानावशेषो हि नाशःकल्पितवस्तुन इति न्यायात्। तस्याऽपि निराकर्तुः अन्यस्याभावात्। यदि तस्यापि निराकर्ताऽन्योऽङ्गीक्रियते तथा सत्यनवस्था स्यात्। तस्मात्सर्वबाधावधित्वेन यस्सिद्धः स नित्यमुक्तस्वभाव एव आत्मेति सर्वमनवद्यम्। आत्मन उपनिषन्मात्रसमधिगम्यत्वं यदुक्तम् तदाक्षिपति—नन्विति। अहमहमिति सर्वैः अनुभूयमानत्वात् दत्तोत्तरत्वेन परिहरति—तत्साक्षित्वेनेति। अहमिति प्रत्ययोऽहं प्रत्ययः अहमाकारा साभासा धीवृत्तिः। तस्या विषयोऽहङ्कारः। तस्यैव कर्तृत्वभोक्तृत्वादिकं विषयीक्रियते अहं कर्ताऽहं भोक्तेति। एवं च सति कर्तृत्वभोक्तृत्वादिविशिष्ट एव अहंप्रत्ययविषयः। न तु तत्साक्षी उपनिषन्मात्रसमधिगम्य इत्यु-

न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा, अतः स न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः। सर्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। पुरुषो हि विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः। तस्मात् 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः, (काठ० १।३।११) 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृह० ३।९।२६) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्स्वेव प्राधान्येन प्रकाश्य-

---

च्यते। नन्वात्मनः अहंप्रत्ययगम्यत्वाभावेऽति शास्त्रान्तरसमधिगम्यत्वसम्भवान्मात्रपदवैयर्थ्यमित्याशङ्क्याऽऽह—न ह्यहमिति। शास्त्रान्तरेऽप्येवं विशिष्टपुरुषो यस्मात् नाधिगतः ततो न तत्समधिगम्यत्वं आत्मन इति भावः। तदेतदुपसंहरति—अतः इति। यतः षड्विधलिङ्गैः तात्पर्येणाधिगतः। प्रमाणान्तरेणानधिगतः पुरुषः : अत इत्यर्थः। प्रत्याख्यातुं अशक्योऽपि विधिशेषस्स्यादित्यत उक्तम्—विधिशेषत्वं वेति। आत्मनोऽप्रत्याख्यातत्वे हेत्वन्तरमाह—आत्मत्वादेव चेति। अहेयानुपादेयात्मस्वरूपत्वादप्रत्याख्यातत्वमिति भावः। तदेव विशदयति—सर्वं हीति। पुरुषान्तमिति। अधिष्ठानशेषत्वमित्यर्थः। तस्याऽपि नाशः कुतो न भवतीत्यत आह—पुरुषो हीति। हेत्वभावादिति। द्वितीयाभावादित्यर्थः। तर्हि विकारः स्यादित्यत हाह—विक्रियेति। अद्वितीयत्वादेव विकारहेत्वभावादविकारी कूटस्थनित्यः। द्वितीयाद्वै भयं भवतीति श्रुतेः। उक्तेभ्यो हेतुभ्यः सिद्धमर्थं अनुवदति शिष्यबुद्धिसौकर्याय—अत एवेति। उपनिषन्मात्रसमधिगम्यत्वमात्मनः उपक्रान्तं उपसंहरति—तस्मादिति। तत्र श्रुतिमुदाहरति—पुरुषादिति। इन्द्रियेभ्य इत्यारभ्य सर्वेभ्यः परः पुरुषः इति सर्वव्यापकत्वं पुरुषस्य प्रतिपाद्य ततोऽन्यव्यापकं प्रतिषिद्धं सर्वव्यापकत्वं तस्यैव प्रतिपादयति—पुरुषान्न परमिति। तस्यैवोपनिषन्मात्रसमधिगम्यत्वमाह—तन्त्विति। ननु मननादेरपि निर्णयहेतुत्वात् मात्रपदवैय्यर्थ्यं इत्यत आह—प्राधान्येनेति। मननसहकृतोपनिषद्वाक्येन प्रमाणेन प्रकाश्यमानत्वात्

मानत्वे उपपद्यते। अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम्। यदपि शास्त्रतात्पर्यविदामनुक्रमणम्—'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इत्येवमादि, तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्।

अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः। नहि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि

---

वाक्यजन्यस्य वृत्तावभिव्यज्यमानत्वादुपनिषन्मात्रसमधिगम्यत्वं उपपद्यत एवेति भावः। पूर्वपक्षे दूषणं उक्तं उपसंहरति—अत इत। साहसमात्रमिति। न तत्प्रामाणिकमिति भावः। पूर्वमीमांसाप्रवर्तकैः भाष्यकारादिभिः वेदस्य कार्यपरत्वं अनुक्रम्योक्तम्। तदनूद्य परिहरति—यदपीति। दृष्टमिति। भिन्नप्रकरणस्य वेदान्तस्य उपक्रमादिभिः फलवदर्थावबोधकस्य न कार्यपरत्वम्। तदर्थज्ञाने सति अविद्याप्रयुक्तक्रियाकारकादिभेदोपमर्दनेन कार्यस्य विरोधादिति भावः। सिद्धार्थबोधकवाक्यानां अत्यन्तमेवाऽनर्थक्यं चेत् तेषामेवाङ्गीकारविरोधः स्यादिति दूषयति—अपि चेति। भूतोपदेशानर्थक्यप्रसङ्ग इति। यूपाहवनीयस्वर्गादिपदार्थानां बोधकवाक्यस्याऽप्रामाण्यं स्यादिति भावः। ननु नाप्रामाण्यशङ्का स्यात् भूतं भव्यायोपदिश्यत इति न्यायात्। भूतार्थवादवाक्यावगतं भूतं वस्तु भव्याय कार्याय उपदिश्यत इति भूतोपदेशस्य सार्थक्यं स्यादिति पूर्वमीमांसको यदि ब्रूयात्, तर्हि सिद्धं नस्समीहितमिति सिद्धान्ती प्राह—प्रवृत्तीत्यादिना। स्वर्गकामो यजेतेति वाक्ये कोऽयं स्वर्गपदार्थ इत्याकाङ्क्षायां यन्न दुःखेन संभिन्नमित्यादिवाक्यं स्वर्गादिपदार्थं व्युत्पादयत् विशिष्य बोधयति भव्यार्थत्वेनेति त्वयाऽपि वक्तव्यम्। एवं सति तत्वमस्यादिवाक्यं कूटस्थनित्यं प्रत्यगभिन्नं ब्रह्म बोधयत्येवेति अस्माभिः अपि वक्तव्यम। तव तु भूतार्थं वाक्यं यथाभूतं वस्तूपदिशति। अस्माकं तत्वमसीत्यादिवाक्यं नोपदिशतीति को हेतुः। हेत्वभावः, उपदिशत्येवेत्यर्थः। उक्तमेवार्थं दृढीकुर्वन् आह—नहीति। तवापि पक्षे सिद्धं वस्तूपदिश्यमानं न भवति हि। तथा

भूतस्य क्रियासाधनत्वात्क्रियार्थ एव भूतोपदेश इति चेत्। नैष दोषः। क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव। क्रियार्थत्वं तु प्रयोजनं तस्य। न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति। उच्यते—अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन।

अपि च 'ब्राह्मणो न हन्तव्यः' इति चैवमाद्या निवृत्तिरुपदिश्यते। नच सा क्रिया। नापि क्रियासाधनम्। अक्रियार्थाना-

---

सत्पक्षेऽपीति भावः। पूर्वपक्षी स्वपक्षे विशेषं आशङ्कते—अक्रियात्वेऽपीति। नैवं त्वदभिमतब्रह्मोपदेश इति पूर्ववाद्यभिप्रायः। सिद्धान्ती परिहरति—क्रियार्थत्वेपीति। सिद्धस्य क्रियाशेषत्वेऽपीत्यर्थः। किमर्थमुपदिष्टं तत्राह—क्रियार्थत्वं त्विति। भूतोपदेशवाक्येन भूतवस्तुनि ज्ञाते तावता फलस्य सिद्धत्वात् फलवत्क्रियाशेषत्वसिद्धिः प्रयोजनं तस्य स्यादित्यर्थः। नन्वस्मत्पक्षे त्वयमेव विशेष इत्याशङ्क्य सिद्धस्य क्रियोपदिष्टस्य क्रियासंबन्धांशे विशेषसंभवेऽपि वस्तुज्ञापकत्वांशे विशेषो नास्तीत्यभिप्रेत्याह—न चैतावतेति। किन्तु उपदिष्टमेवेति भावः। अस्मत्पक्षे भूतोपदेशस्य क्रियास्वरूपलाभः प्रयोजनम्। त्वत्पक्षे प्रयोजनाभावादानर्थक्यमित्यभिप्रेत्याशङ्कते—यदि नामेति। सिद्धान्ती परिहरति—उच्यत इति। त्वत्पक्षे यथाऽनवगतस्वर्गादिवस्तूपदेशस्य स्वर्गादिवस्तुप्रमितिजनकत्वेन सार्थकत्वम् तथैवाऽस्मत्पक्षेपि तत्वमस्यादिवाक्यरूपानवगतात्मवस्तूपदेशश्च सार्थको भवितुं अर्हति। तत्वमस्यादिवाक्यं अनवगतस्वात्मवस्तुप्रमितिकरणं सिद्धार्थवाक्यत्वात्। भूतार्थवादादिवाक्यवदिति प्रयोगो द्रष्टव्यः। नन्वस्माकं क्रियास्वरूपलाभः प्रयोजनम्, तव न संभवतीत्युक्तमिति, तत्राऽऽह—तदवगत्येति। तथा च तत्त्वमस्यादिवाक्यानां फलवत्स्वार्थावबोधकरणानां प्रामाण्यं दुर्वारमेवेति भावः। आम्नायस्य प्रामाण्यं क्रियार्थत्वव्याप्यमित्येतत् एकान्तेनाभ्युपगच्छतां मते असाङ्गत्यं दूषणमाह—अपि चेति। अस्तु निवृतेरपि क्रियात्वमित्यत आह—न चेति। अभावरूपत्वादित्यर्थः। अत एव क्रियासाधनत्वमप्यस्याः प्रतिषेधति—नापीति। तावता किमनिष्टं आपादितं त्वयेत्यत आह—

मुपदेशोऽनर्थकश्चेत् 'ब्राह्मणो न हन्तव्यः इत्यादिनिवृत्त्युपदेशाना- मानर्थक्यं प्राप्तम्। तच्चानिष्टम्। नच स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्य- तिरेकेण। नञश्चैष स्वभावो यत्स्वसंबन्धिनोऽभावं बोधयतीति। अभावबुद्धिश्चौदासीन्यकारणम्। सा च दग्धेन्धनाग्निवत्स्वयमेवो- पशाम्यति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र प्रजापतिव्रतादिभ्यः।

---

क्रियार्थानामिति। ब्राह्मणो न हन्तव्य इत्यादिवाक्यानां क्रियार्थरूपव्यापकाभावात् तद्व्याप्यप्रामाण्याभावः इति प्राप्तमिति भावः। अस्त्वित्यत आह—तच्चेति। वेदैकदेशस्य निषेधवाक्यस्याप्रामाण्ये तद्दृष्टान्तेन सर्वस्यापि वेदस्याप्रामाण्यं अनिष्टं प्रसज्येतेत्यर्थः। निषेधवाक्येऽपि क्रियार्थत्वं कल्प्यत एवेति चेत् तत्राह—न च स्वभावेति। स्वभावतः विधिं विना द्वेषेण प्राप्तो हन्त्यर्थः। तत्संबन्धमात्रेण नञः क्रियावाचकत्वं प्राप्तं कल्पयितुं न शक्यम्। हन्तव्य इति तव्यप्रत्ययान्तेन शब्देन स्वभावप्राप्ता हननक्रिया अनूद्यते स शब्दो नञ्सबत्द्धस्सन् प्राप्तक्रियानिवृत्तिमेव बोध- यति। सा च पुरुषस्यौदासीन्यमेवेति। एतदाह—हननक्रियेति। अयमर्थः कुतो लभ्यत इत्यत आह—नञश्चैष इति। तमेव विवृणोति—यदिति। फलितमाह—अभावबुद्धिश्चेति। पुरुषस्यौदासीन्ये सत्यपि प्रवृत्तहननक्रियायाः उपरमे यत्नः स्यादित्यत आह—सा चेति। क्रियाप्रवृत्तिहेतुद्वेषस्य निवृत्तत्वात् द्वेष्यस्य विषयस्याभावाद्दग्धेन्धनाग्निवत्स्वय- मेवोपशाम्यतीति भाष्योक्तं समञ्जसम्। अन्यथा दग्धेन्धनानलवदिति दृष्टान्तो विरुध्येत। अनलो हि दाह्यं दग्ध्वैव निवर्तते। हन्ता तु हननमकृत्वैव निवर्तत इति। प्रतिषेधवाक्यस्य क्रियाप्रवर्तकत्वं नास्तीत्येतदुपसंहरति—तस्मादिति। अन्यत्रेति। प्राजापत्यव्रतादिष्वनुष्ठेयत्वेन केचन धर्मा उपादिष्टाः। तेषु च नेक्षेतोद्यन्तं आदित्यं इत्यादित्यविषयकमनीक्षणं नाम सङ्कल्पविशेषलक्षणं धर्मं लक्षणया नेक्षेतेत्यस्याऽर्थमाहुः। आदिपदेन अब्राह्मणः अनश्वः अधर्म इत्यादयो गृह्यन्ते। लोके हि तदन्यतद्विरुद्धतदभावा नञर्था इति वदन्ति। यथा गौः न संभवतीत्यगौः सुरो न भवतीत्यसुरः, धर्मो न भवतीत्यधर्मः इत्यादि। तत्र सास्नादिमत्पिण्डविशेषे शक्तं गौरिति पदं स्वार्थमुपस्था-

तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम् ।

---

पयति । तेन सह प्रयुक्तं नञ्पदं गोपदार्थादन्यं गोसदृशमेवोपस्थापयति नियमेन, नञिवयुक्तमिति न्याय्यात् । अन्यथा काष्ठादेरपि तदन्यपदार्थत्वे अगां बधानेत्युक्ते काष्ठादिबन्धनेनापि कृतकृत्यता स्यात् । नैवं दृश्यते । एवं तद्विरुद्धोऽपि व्याख्येयः । तदन्यत्वेन तुल्यत्वेऽपि घातकत्वादिविशेषमाश्रित्य पृथगुदाहरणं द्रष्टव्यम् । पक्षद्वयेऽपि भावान्तरमेव नञर्थः । स एव पर्युदास इत्युच्यते । तं केचिदन्योन्याभाव इति व्यवहरन्ति इत्यन्यदेतत् । ब्राह्मणो न हन्तव्य इत्यत्र तु प्रसज्यप्रतिषेध पक्ष एव आश्रीयते । पर्युदासाश्रयणे तु ब्राह्मणो हन्तव्यभिन्नः इत्यर्थस्स्यात् । तथा च ब्राह्मणादन्यस्य हननं विहितं स्यात् । तथा सति ब्राह्मणहननप्रयुक्तदोषोद्भावनं न स्यात् । प्रसज्यप्रतिषेधाश्रयणे तु ब्राह्मणकर्मकं हननं यत् प्रसक्तं तन्नेति प्रतिषिध्यत इति युक्तम् । ननु हननं यदि प्राप्तं प्राप्तमेव तदिति प्रतिषेधानुपपत्तिः । यद्यप्राप्तं सुतरां तदापत्तिः । यदि च हननविषयकेच्छा प्रतिषिध्येत तदा वाक्यान्वयो विरुध्येतेति चेत् । उच्यते । ब्राह्मणहननं बुद्धावालिख्य इदं मदिष्टसाधनं इति जानन् तज्जिघांसया प्रवृत्तः पुरुषः । तं प्रत्युपदिशति श्रुतिः - ब्राह्मणो न हन्तव्यः इति । अत्र हननं न प्रतिषिध्येत । अप्रसक्तत्वात् । तदिच्छायास्तु प्रवृत्तत्वादेव प्रतिषेधानुपपत्तिः । तर्हीष्टसाधनताज्ञानं इच्छाजनकं प्रतिषिध्यत इति वक्तव्यम् । तन्न । प्रमाणवस्तुपरतन्त्रस्य तस्य प्रतिषेद्धुं अशक्यत्वात् । अतः हननगतं यदिष्टसाधनत्वं पुरुषस्य भ्रान्तिसिद्धम् । तदिह प्रतिषिध्यत इति गम्यते । ननु पुरुषेण निश्चितस्य इष्टसाधनत्वस्य प्रतिषेधः कथमुपपद्यते । विरोधादिति चेत् । उच्यते । यद्यपि त्वयेष्टसाधनत्वं निश्चितं वर्तते । तथाऽपि बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वं नास्ति । विशेषणाभावात् । तथा च प्रमाणबलेन बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभावनिश्चये सति बलवदनिष्टानुबन्धित्वज्ञानं जायते । तेन हननविषयकेच्छा निवर्तते । ततश्च हननक्रियायां प्रवृत्तोऽपि पुरुषः तत उपरम्य औदासीन्यं भजते । तदेतदाह भगवान्भाष्यकारः । अभावबुद्धिश्चौदासीन्ये कारणमिति । तस्मात् ब्राह्मणो न हन्तव्य इत्यत्र प्रत्ययार्थेनेष्टसाधनत्वेन सह नञ्संबन्धादिष्टसाधनत्वाभावबोधकं इदं वाक्यं यथा प्रमाणं अक्रियार्थमपि तथा ब्रह्मात्मैकत्वबोधकं तत्वमस्यादिवाक्यं च प्रमाणं इति भाष्याभिप्रायः । अतदर्थानां प्रतिषेधादिवाक्यानां आनर्थक्यं न संभवति चेत् अतदर्थानामानर्थक्यमिति सूत्रं निर्विषयं स्यादित्याशङ्कां परिहरन् उपसंहरति—तस्मादिति ।

यदप्युक्तं—कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् 'सप्तद्वीपा वसुमती' इत्यादिवदिति, तत्परिहृतम्। रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्। ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्। अत्रोच्यते—नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। नहि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। नहि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। नच कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वा-

---

पूर्वपक्षे प्रतिषेधादिवाक्यस्य सिद्धान्ते तत्त्वमस्यादिवाक्यस्य च फलवदर्थावबोधकरणत्वेनाऽऽनर्थक्याभावेऽपि साक्षात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादिनां अतदर्थानां आनर्थक्यसंभवात्तद्विषयकपूर्वपक्षं विध्यपेक्षितप्राशस्त्यादिसमर्पकत्वेन विध्येकवाक्यतया प्रामाण्यमिति सिद्धान्तश्च तद्विषय एवेति साधु पर्यालोचनीयमिति भावः। वस्तुमात्रबोधे फलं नास्तीत्युक्तं अनुवदति—यदपीति। दत्तोत्तरमिति स्मारयति—तदिति। स्थूणानिखननन्यायेन ब्रह्मसाक्षात्कारस्य साक्षात् मोक्षफलकत्वं दृढीकर्तुं उक्तं पूर्वपक्षं स्मारयति—नन्विति। सिद्धान्तं वक्तुं प्रतिजानीते—अत्रोच्यत इति। सिद्धान्तं उपपादयति—नेत्यादिना। तत्र हेतुमाह—ब्रह्मात्मेति। हेत्वभावं दर्शयन् ब्रह्मविदः संसाराभावं दृढयति—न हीति। तत्र दृष्टान्तमाह—न कुण्डलिनः इति। अवगतब्रह्मात्मभावस्य यथापूर्वं संसारो नाऽस्तीत्यत्र श्रुतिमाह—तदुक्तं श्रुत्येति।

भिमाननिमित्तं सुखं भवति। तदुक्तं श्रुत्या—'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छान्दो० ८।१२।१) इति। शरीरे पतितेऽशरीरत्वं स्यात्, न जीवत इति चेन्न, सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वान्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न, शरीरसंबन्धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैषानादित्वकल्पना। क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः। सन्निधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न, धनदानाद्युपार्जितभृत्यसंबन्धित्वात्तेषां कर्तृत्वोपपत्तेः। न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किञ्चि-

---

शङ्कते—शरीर इति। परिहरति—नेति। तत्र हेतुमाह—सशरीरत्वस्येति। मिथ्याज्ञाननिमित्तत्वमेव संसारस्य व्यतिरेकमुखेन द्रढयति—न ह्यात्मन इति। आत्मनः कर्मणा शरीरसंबन्धो भवति। नेत्याह—नित्यमिति। तत्र चोक्तं हेतुं स्मारयति—अकर्मनिमित्तत्वादिति। ननु मनुष्यदेवतिर्यगाद्युच्चावचशरीरसंबन्धात् तत्कृतधर्माधर्मेण कारणे कल्प्येते इत्याशङ्कते—तत्कृतेति। यस्य यादृशं शरीरमुपलभ्यते तद्धेतुभूतौ धर्माधर्मौ अनुमीयेते इत्यर्थः। परिहरति—नेति। तत्र हेतुमाह—शरीरसंबन्धस्येति। धर्माधर्मावात्मना संपाद्येते इत्यतः आह—धर्माधर्मयोरिति। कुतोऽसिद्धिरित्याशङ्क्याऽन्योन्याश्रायदोषेणेत्याह—शरीरसंबन्धस्येति। बीजाङ्कुरवदनादिकल्पनान्नान्योन्याश्रयदोष इत्यत आह—अन्धपरंपरेति। अन्धपरंपरायाः कारणमाह—क्रियासमवायेति। अक्रियात्वादात्मनः कर्तृत्वं न संभवत्येवेत्यत्राशङ्कते—सन्निधानेति। दृष्टान्तवैषम्येण परिहरति—न धनेति। दृष्टान्ते तदुपपत्तिमुक्त्वा दार्ष्टान्तिके तदभावमाह—न त्वात्मन इति। किञ्चिदिति। किमपि निमित्तं कल्पयितुं न शक्यं इत्यर्थः। कर्ता अहमिति

च्छक्यं कल्पयितुम् । मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः । एतेन यजमानत्वमात्मनो व्याख्यातम् ।

अत्राहुः—देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो न मिथ्येति चेन्न, प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः । यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः सिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य । तस्य त्वन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ । यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा

---

अभिमानपूर्वकं कर्तृत्वं दृश्यते तत्कुत इत्यत आह—मिथ्याभिमानस्त्विति । अत एव यजमानवदात्मनः कर्तृत्वमपि नेत्याह—एतेनेति । यजमानवत्कर्तृत्वं नेति व्याख्यातमित्यर्थः । मिथ्याभिमाननिमित्त एवाऽऽत्मनश्शरीरसंबन्धहेतुरित्युक्तम् । तत्र परेषां मतमुपन्यस्यति—अत्राऽऽहुः इति । सिंह्यो माणवकः अग्निरधीतेनुवाकमित्यादिप्रत्ययवद्गौण एव न मिथ्येत्यर्थः । तेषां पक्षं दूषयति—नेति । गौणमिथ्याप्रत्यययोः वैरूप्यं वक्तुं गौणप्रत्ययस्वरूपं उपपादयति—प्रसिद्धेति । सङ्गृहीतं अर्थं प्रपञ्चयति—यस्य हीत्यादिना । अन्वयव्यतिरेकाभ्यामिति । आवापोद्वापाभ्यामित्यर्थः । सिंह्यपदवाच्यादन्यः पुरुषः प्रसिद्ध इत्याह—तश्चेति । यावत्सिंहगुणयोगे सति सिंह्यात्पृथक्त्वं पुरुषस्य कथमित्यत आह—प्रायिकैरिति । कतिपयैरित्यर्थः । तानेव दर्शयति । क्रौर्येति । उक्तगुणसंपन्ने पुरुषे सिंहशब्दप्रयोगः सिंह्यप्रत्ययश्चेत्येतौ गौणौ भवतः इत्यर्थः । ततो भेदेन मिथ्याप्रत्ययं विशिनष्टि—नाऽप्रसिद्धेति । यस्य पुरुषस्य वस्तुनो-भेदः अप्रसिद्धः तस्येत्यर्थः । एवकारं विशिनष्टि—गौणाविति । लोकप्रसिद्धं मिथ्याप्रत्ययं उदाहरति—यदेति । दृष्टान्तान्तरमाह—यथा वेति । दार्ष्टान्तिकमाह—तद्वद्देहादीति । निरुपचारिकत्वस्फुरणेनेत्यर्थः । अविवेकिनामनात्मन्यात्मप्रत्ययस्य मिथ्याप्रत्ययत्वेऽपि

शुक्तिकायामकस्माद्रजतमिति निश्चितौ शब्दप्रत्ययौ, तद्वद्देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्ययावात्मानात्मविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्। आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः। तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः। तस्मान्मिथ्याप्रत्ययनिमित्तत्वात्सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्। तथाच ब्रह्मविद्विषया श्रुतिः—'तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते। अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृह० ४।४।७) इति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव

---

विवेकिनां न गौणो भवितुमर्हतीत्यत आह—आत्मानात्मेति। विवेकिनामधिष्ठानारोप्यभेदज्ञानवतां पण्डितानां अविद्याकल्पितानात्मप्रविलापनेन आत्मयाथार्थ्यं जानतां व्यवहारकाले अजाविपालकानामिवाऽनात्मन्यात्मशब्दप्रत्ययौ मिथ्यैव भवत इत्यर्थः। एतच्च पश्वादिभिश्चाविशेषादित्यत्र प्रपञ्चितम्। उक्तमर्थं उपसंहरति—तस्मादिति। सशरीरत्वस्य मिथ्याप्रत्ययहेतुकत्वमुक्तम्। सिद्धान्तपसंहरति—तस्मान्मिथ्येति। अशरीरत्वं तु वास्तवम्। तच्च कालत्रयेऽप्येकरूपम्। तथा च जीवतोऽपि विदुषोऽशरीरत्वं मोक्षाख्यं सिद्धमेवेति भावः। तत्रैव श्रुतिं प्रमाणयति—तथाचेति। तत्तस्मिन्नर्थे; यथाऽयं दृष्टान्तः। अहेस्सर्पस्य निर्ल्वयनी निर्मुक्ता त्वग्वल्मीके मृता प्राणैर्विनिर्मुक्ता प्रत्यस्ता प्रातिलोम्येन त्यक्ता शयीत शेते। एवमेवंविदुषः इदं शरीरं विद्यया परित्यक्तं आत्मभिन्नत्वेन मरूमरीच्युदकादितुल्यमात्मासंस्पृष्टमेव शेत इव। प्रारब्धानुवृत्त्या भासत इत्यर्थः। अथ परमार्थतः अयमात्मा अशरीरः शरीरसंबन्धरहितः। अमृतः मरणादिधर्मरहितः। प्रकर्षेण अनिति चेष्टते सर्वजगदस्मिन्निति प्राणो ब्रह्मैव। तेज एव स्वयंज्योतिस्स्वरूपमेवेति श्रुतिः आत्मनः नित्यमुक्तस्वभावं दर्शयति। तत्रैव श्रुत्यन्तरमाह—सचक्षुः इति। विद्वान्परमार्थतः अचक्षुरपि प्रातीतिकदृष्ट्या स चक्षुरिव। एवमुत्तरत्राप्यूह्यम्। स्मृतिमपि तत्र प्रमाणयति—तथाचेति। प्रजहाति यथाकामानित्यारभ्य विदुषस्स्थितप्रज्ञलक्षणान्याचक्षाणा स्मृतिरपि सर्वप्रवृत्त्यसंभवं दर्श-

सवागवागिव समना अमना इव सप्राणोऽप्राण इव इति च। स्मृतिरपि च—'स्थितप्रज्ञस्य का भाषा' (भ० गी० २।५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति। तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्। यस्य तु यथापूर्वं संसारित्वं नासाववगतब्रह्मात्मभाव इत्यनवद्यम्।

यत्पुनरुक्तं श्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति। न। श्रवणवदवगत्यर्थत्वान्मनननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वम्। नतु तदस्ति, मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्। एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत। आरभ्य-

---

यन्नित्यमुक्तत्वमात्मनो दर्शयन्तीति भावः। विदुषो यथापूर्वं संसारित्वं नास्तीत्युपक्रान्तमुपसंहरति—तस्मान्नेति। कस्यचिद्यथापूर्वं संसारित्वं दृश्यत इत्यत आह—यस्य तु इति। यस्य यथापूर्वं संसारो दृश्यते असौ ब्रह्मविदेव न भवति। अविद्याकार्यस्य स्थितत्वादिति भावः। अस्मिन् अर्थे न किञ्चिद्बाधमस्तीत्यभिप्रायेणाह—अनवद्यमिति। श्रवणानन्तरभाविमननविध्यन्यथानुपपत्त्या ब्रह्मणो विधिशेषत्वं कल्पनीयमिति पूर्वोक्तं दूषयितुं अनुवदति—यत्पुनरिति। दूषयति—नेति। तत्र हेतुमाह—श्रवणवदिति। उक्तं हेतुं व्याचष्टे—यदिहीति। व्याख्यातार्थं वाक्यम्। परमप्रकृतधर्मो वेदार्थः। स च कार्यरूपस्सिद्धरूपश्च। कार्यरूपधर्मविचारः प्रतिज्ञातः पूर्वं अथातो

माणं चैवमारभ्येत—'अथातः परिशिष्टधर्मजिज्ञासा', इति 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै०४।१।१) इतिवत्। ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः—'अथातो ब्रह्मजिज्ञासा' इति। तस्मात् 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः

---

धर्मजिज्ञासेति। विचारितश्च। अथ सिद्धरूपधर्मः वेदार्थो विचारणीयः उपास्यत्वेन। तदिदमाह—अथातः परिशिष्टेति। तत्र पूर्वतन्त्रप्रसिद्धदृष्टान्तमाह—अथातः क्रत्वर्थेति। तदा प्रतिज्ञातत्वाभावादथातो ब्रह्मजिज्ञासेत्येवं ब्रह्मात्मैक्यावगतिफलकविचारस्य अप्रतिज्ञातत्वात्। पूर्वतन्त्रे च ब्रह्मात्मैक्यस्याप्रतिपादनात् तेन गतार्थत्वाभावात् ब्रह्मात्मैक्यावगत्यर्थः शास्त्रारम्भो युक्त इत्यभिप्रेत्याऽऽह—ब्रह्मात्मैक्येति। कृत्स्नशास्त्राभिप्रायं शिष्यबुद्ध्यारोहाय संगृह्णन्नुपसंहरति—तस्मादहमिति। अहं ब्रह्मास्मीत्येवमाकारानुभवः अवसानं परिसमाप्तिः येषां ते। तथा विशेष्यं निर्दिशति—सर्वे इति। कर्तृकर्मक्रियाफलभेदज्ञानपूर्वकं हि विधयः प्रवर्तन्ते। प्रमात्रादिभेदमाश्रित्य हि प्रमाणानि च प्रवर्तन्ते। तदेतद्ब्रह्मापूर्वं अनपरमनन्तरं अबाह्यमयमात्मा ब्रह्म सर्वानुभूर्ब्रह्मैवेदं अमृतं पुरस्तात् ब्रह्म पश्चात् ब्रह्म दक्षिणतश्चोत्तरेण। यत्र नान्यत्पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यत्रत्वस्य सर्वं आत्मैवाऽभूत् तत्केन कं पश्येत् तत् केन कं विजानीयात् इत्यादिश्रुतिशतेभ्यः

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कङ्घातयति हन्तिकम्॥

एकः समस्तं यदिहास्ति किञ्चित्
तदच्युतो नास्ति परं ततोऽन्यत्।
सोऽहं स च त्वं स च सर्वमेतत्
आत्मस्वरूपं त्यज भेदमोहम्॥

इत्यादिस्मृतिशतेभ्यः।

मत्तो नान्यत्किञ्चिदत्रास्ति दृश्यं
सत्यं बाह्यं वस्तु मायोपमेयम्।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वैते भाति तस्माच्छिवोऽहम्॥

सर्वाणि चेतराणि प्रमाणानि । न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति । अपि चाहुः— 'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् । सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत् ॥ अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः । अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः । देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्' इति ॥४॥

---

'मायामात्रमिदं द्वैतं अद्वैतं परमार्थतः । ज्ञाते द्वैतं न विद्यते इति विद्वदनुभवाच्च श्रद्धाभक्तिसंपन्नस्य ब्रह्मैवाहमस्मीत्यनुभवे सति प्रवर्तकज्ञानाभावात् सर्वे विधयः परिसमाप्यन्ते । सर्वाणि चेतराणि प्रमाणानि भर्जितबीजवत्कार्यकराणि न भवन्तीति भावः । उक्तमेवार्थं व्यतिरेकमुखेन स्पष्टयति—नहीति । अहेयानुपादेयाद्वैतात्मावबोधेन शब्दादिविषयाणां बाधितत्वात् । प्रमातुश्च बाधितत्वात् । हेत्वभावात् भेदबोधकप्रमाणानि न भवन्त्येवेत्यर्थः । अस्मिन्नर्थे प्राचीनसंमतिमाह—अपि चेति । सद्ब्रह्मात्मैवाहं इत्येवं बोधे सति पुत्रदेहादीनां बाधितत्वात् गौणमिथ्यात्मनोः असत्त्वे कार्यं कथं भवेत् । कर्तृप्रवर्तकभेदबुद्धेः निवृत्तत्वात् कार्यं कथमपि न भवेदेवेत्यर्थः । नन्वात्मनः प्रमातृत्वस्य सर्वात्मना बाधे वेदान्तप्रमाणस्याप्यप्रवृत्तेः कथं वेदान्तजन्यं ज्ञानं स्यात् । अत आह—अन्वेष्टव्येति । य आत्मा अपहतपाप्मा सोऽन्वेष्टव्य इति अपहतपाप्मत्वादिलक्षणो योऽयमात्मा ज्ञातव्यत्वेन प्रतिज्ञातस्तादृशात्मविज्ञानात्प्रागात्मनः प्रमातृत्वं स्यात् । अन्विष्य सम्यग्विचार्य यदा ज्ञातस्तदा प्रमातैव प्रमातृत्वोपाधिपरित्यागेन पाप्मदोषविवर्जितः अपहतपाप्मत्वादिलक्षणस्स्यादित्यर्थः । ननु प्रत्यक्षादिभेदबोधकप्रमाणविरोधात् कथमद्वैतात्मेति विज्ञानं स्यादिति चेन्न । वेदान्तप्रमाणस्य सर्वतः प्रबलत्वात्प्रत्यक्षादिप्रमाणविषयसर्वद्वैतोपमर्देनैव जायमानमद्वैतात्मविज्ञानं जायते । प्रत्यक्षादेरेव प्राबल्याद्वेदान्तप्रमाणबाधकत्वं किं न स्यादिति चेन्न । तस्यानुपसञ्जातविरोधित्वाद्भेदप्रत्यक्षन्तु प्रागेव सिद्धम् । तत्तु बाध्यम् । शुक्तिरजतादिप्रत्यक्षवत्पश्चाद्वेदान्तजन्यमद्वैतज्ञानं जायमानं प्रत्यक्षादिविषयसर्वद्वैतोपमर्देनैव सामर्थ्याज्जायते । तावत्पर्यन्तमेव हि प्रत्यक्षादिषु प्रमाणव्यपदेशः । यावता आत्मनिश्चयः । आ आत्मनिश्चयादिति विभागः । आत्मनिश्चये सति न किञ्चिद्द्वैतप्रमाणमुपपद्यत इति भावः । तत्र दृष्टान्तमाह—देहात्मेति ।

देहातिरिक्तात्मवादिनां मते देहाभिन्नात्मप्रत्ययः तद्भिन्नात्मनिश्चयात्प्राक्प्रमाणत्वेन कल्पितः। आत्मयाथात्म्यनिश्चये सति अप्रमाणमिति निश्चितः तद्वदिति भावः।

एतावता प्रबन्धेन नित्यसिद्धमेवामृतत्वं अज्ञानमात्रव्यवहितम्। अविचारितसिद्धिकोऽयं संसारबन्धः। अयं च यथोक्ताधिकारिणो विचारजन्यविज्ञानेन ब्रह्मात्मैक्यावलम्बनेनाज्ञाननिवृत्तौ निवर्तते। अयञ्चाधिकारी नित्यमुक्त एव सन्मुच्यत इत्युपचर्यते। विमुक्तश्च विमुच्यत इति श्रुतेः। तस्माच्छास्त्रविचारजन्यात्मसाक्षात्कारात् मुक्तो भवतीति व्यवस्थितम्।

अत्र वदन्ति। अनेके जीवा अनेकान्यज्ञानानि ब्रह्मविषयाणि प्रतिजीवं व्यवस्थितानि। ईश्वरश्च सर्वज्ञः सर्वशक्तिः जगदुत्पत्तिस्थितिकारणं यः सर्वज्ञः सर्वविदित्यादिश्रुतेः। तदीया माया विचित्रशक्तिमती।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।'

इत्यादिश्रुतेः। यस्य मायया मोहिताः सर्वे जीवाः ब्रह्मादयोऽपि संसरन्तो यद्भयदेव स्वस्वकार्येषु नियमेन वर्तन्ते। भीषाऽस्माद्वातः पवते इत्यादिश्रुतेः। ते च जीवा ईश्वरश्चानादिसिद्धाः। तदुक्तम्—

जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा।
अविद्या तच्चितोर्योगः षडस्माकमनादयः॥

इति। सर्वे च जीवा स्वप्रकाशचिदात्मानः परमेश्वरात्मान एव सन्तः स्वाविद्योपाधिसंबन्धात्परिच्छिन्ना इव संसारिणो वयं कर्तारो भोक्तारश्चेत्यभिमन्यमानाश्शोकसागरपतिता दृश्यन्ते हि। तत्र कोऽपि किलाऽऽत्मानं परमात्मानं जानन् निवृत्ताज्ञानतत्कार्यः सन्मुक्तो भवति। अन्ये तु बद्धा एव। केचित्किल संसारदुःखं असहमानाः संसारबन्धनान्मुमुक्षवो यतयः श्रीगुरुहरिचरणसेवामात्रपरायणा दृश्यन्ते। अतः नानाजीवाः अन्यथा जीवैकत्वे एकमुक्तौ सर्वमुक्तिप्रसङ्ग इति नानाजीववादिनः। अत्र तु परिणामवादस्यानिरसनीयत्वान्नात्र निरस्यते। अनाद्यनिर्वचनीयमायया वियदादिक्रमेण चराचरात्मकं जगत्कचिदधिष्ठाने रज्जुसर्पमरुमरिच्युदकादिवद्विवर्त इति वक्तव्यम्। तदधिष्ठानं किं जीवा उत परमात्मा वा। नाद्यः। उपाधिपरिच्छिन्नानां तेषां एवंविधजगदधिष्ठानत्वानुपपत्तेः परमेश्वर एव सकलजगदधिष्ठानमिति वक्तव्यम्। तथा चैकस्मिन्ब्रह्मणि अधिष्ठाने प्रत्येकमेकमेकं जगत्कल्पयन्ति। उत संभूय एकमेव जगत्।

तथा सति आत्मनः ब्रह्मभिन्नत्वे त्वात्मनि प्रतीयमानबन्धस्यान्यदीयज्ञानादनिवृत्तेः अनिर्मोक्षप्रसङ्गः। तदन्यत्वे एकस्यैवाधिष्ठानयाथात्म्यज्ञानेन सकलजगदुपादानसर्वजीवोपादानसर्वजीवभेदोपाध्युपादानभूतमायाया निवृत्तत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्गस्तुल्य एव। संभूयैकमेव जगत्कल्पयन्तीत्यस्मिन्पक्षे सर्वेषां जगद्भ्रमनिवृत्तिं विना कस्यापि मुक्तिः न स्यात्। युगपद्वा सर्वेषां मुक्तिस्स्यात्। यदि कश्चिद्ब्रूयादेकस्यां रज्जौ दशानां युगपत्सर्पभ्रमे तत्तद्बुद्धिपरिकल्पिता दशसर्पाः, अधिष्ठानैकत्वप्रयुक्तप्रत्यभिज्ञानमिति च तत्र यस्याधिष्ठानज्ञानं तस्य तत्कल्पितसर्पनिवृत्या भयकंपादिनिवृत्तिः प्रयोजनं सिद्ध्यति। नान्यस्येति। तद्वद्यस्य ब्रह्मात्मैकत्वज्ञानम् तस्य तत्कल्पितविश्वभ्रमनिवृत्त्या सुखदुःखलक्षणबन्धनिवृत्तिः मुक्तिः स्यात्। नान्येषामिति।

तं प्रति ब्रूयात्। सर्वाधिष्ठानाद्रज्जुस्वरूपात् अन्ये दश पुरुषाः प्रसिद्धा एव। नैवं अधिष्ठानब्रह्मस्वरूपादन्ये जीवा निरूपयितुं शक्यन्ते। तस्मादुक्तदोषात् पक्षद्वयेऽपि असामञ्जस्यमिति।

अत्रोच्यते। जीवैकत्वं जीवनानात्वं वा न शास्त्रप्रतिपाद्यं एकत्वनानात्वयोः प्रत्यक्षसिद्धत्वात्। किन्तु प्रत्यक्षसिद्धं जीवं मुमुक्षुं कश्चिदालक्ष्य तस्य स्वतस्सिद्धमेव ब्रह्मभावं बोधयितुं प्रवृत्तम्। तथा च श्रुतिः—तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यं अयं आत्मा ब्रह्म सर्वानुभूः इति। इदं ब्रह्मेदं क्षत्रं इमे लोकाः इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मेत्यादयः श्रुतयः प्रत्यक्षसिद्धमेव तिर्यगादिभेदभिन्नं सकलमपि जगत् अनूद्य बाधायां सामानाधिकरण्येन ब्रह्मात्मना प्रविलाप्य ब्रह्मात्मैकत्वमेव बोधयन्ति। तथाविधबोधात्प्राक्प्रतीयमाने जगति अविद्याविजृंभिताः जीवा नाना वा भवन्तु। एको वा भवतु। न तत्र श्रुतेः आग्रह इति गम्यते। शुकवामदेवादीनां मुक्तिश्रुतिरपि प्रत्यक्षसिद्धं भेदं अनूद्य तत्प्रविलापनपूर्वकं अखण्डैकरसं वाक्यार्थं बोधयितुं प्रवृत्ता। तदुक्तं—

अव्यावृत्ताननुगतं वस्तु ब्रह्मेति भण्यते।
ब्रह्मार्थो दुर्लभस्तस्माद्द्वितीये सति वस्तुनि॥ इति।

एवं शास्त्रतात्पर्ये निर्णीते सति एको वा नाना वा जीवा इत्यस्थाने विचार इत्युपरम्यते॥



[इति चतुस्सूत्री भाष्यसुखबोधिनी]

असमर्थसमर्थने सतां
यदि सामर्थ्यमिहाऽस्तु सार्थकम् ।
परमार्थफलार्थिनां कृते
किल नारायणतीर्थसत्कृतिः ॥

हरिः ओम् ॥

रामस्य यदि भक्तोऽहं स च भक्तादरो यदि ।
करकल्पितमागो मे शमयेद्विद्वदाकृतिः ॥